CC-0. In Public Domain. Digitization by eGangotri

Almira 2
Shelf 3
U2

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४००५ १०५

श्री श्री । श्री

॥ अथ वाजसनेयसंहिताउत्तरविंशति प्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संहि॰ ॥श्रीगणेशायनमः॥ हरिः ॐम्॥ इमम्मेवरुणश्रुधीहवमद्याचमृडय॥ त्वा उ॰अ॰
१ मवस्युराचके॥१॥ तत्त्वा॥ यामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः २१
॥अहेडमानोवरुणेहबोध्युरुशꣳसमानऽआयुःप्रमोषीः॥२॥ त्वन्नः॥ त्वन्नोऽ
अग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः॥ यजिष्ठोवह्नितमःशो
शुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत्॥३॥ सत्वम्॥ सत्वन्नोऽअग्ने
वमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ॥ अवयक्ष्वनोवरुणꣳरराणो
वीहिमृडीकꣳसुहवोनऽएधि॥४॥ महीमूषु॥ मातरꣳसुव्रतानामृतस्यप-
त्नीमवसेहुवेम॥ तुविक्षत्रामजरन्तीमुरूचीꣳसुशर्माणमदितिꣳसुप्रणी १
तिम्॥५॥ सुत्रामाणम्पृथिवीम्॥ सुत्रामाणम्पृथिवीन्द्यामनेहसꣳसुश

CC-0. In Public Domain. Digitization by eGangotri

र्म्माणमदितिर्ठ्ठं सुप्प्रणीतिम् ॥ दैवीन्नावꣳ स्वरित्त्रामनागसमस्स्रवन्तीमारुहे
मास्वस्त्तये ॥६॥ सुनावमारुहेयम् ॥ सुनावमारुहेयमस्स्रवन्तीमनागसम् ॥ शता
रित्त्राꣳ स्वस्त्तये ॥७॥ आनः ॥ आनोमित्त्रावरुणाघृतैर्ग्गव्यूतिमुक्षतम् ॥ मद्ध्वा
रजाꣳसि सुक्रतू ॥८॥ प्रबाहवा ॥ सिसृतञ्जीवसेनऽआनोगव्यूतिमुक्षतङ्घृ
तेन ॥ आमाजनेश्श्रवयतंय्युवानाश्श्रुतम्मेमित्त्रावरुणाहवेमा ॥९॥ शन्नः ॥
शन्नोभवन्तुवाजिनोहवेषुदेवतातामितद्द्रवः स्वर्क्काः ॥ जम्भयन्तोहिंवृकꣳ
रक्षाꣳसि सनेम्म्यस्म्मद्युयवन्नमीवाः ॥१०॥ वाजेवाजेवत ॥ वाजिनोनोधने
षुविप्प्राऽअमृताऽऋतज्ञाः ॥ अस्यमद्ध्वः पिबतमादयद्ध्वन्तृप्प्तायातपथिभिर्द्दे
वयानैः ॥११॥ समिद्धोऽअग्निः ॥ समिधासुसमिद्धोवरेण्यः ॥ गायत्त्रीछन्दऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संहि इन्द्रियन्त्र्यविर्गौर्वयो दधुः ॥१२॥ तनूनपाच्छुचिव्रतः ॥ तनूनपाच्छुचिव्रतस्तनू उ.अ.
२ पात्सरस्वती ॥ उष्णिहा छन्दऽ इन्द्रियन्दित्यवाड्गौर्वयो दधुः ॥१३॥ इडाभि २१
रग्निः ॥ इडाभिरग्निरीड्यः सोमो देवोऽअमर्त्यः ॥ अनुष्टुप्छन्दऽ इन्द्रियम्प
ञ्चाविर्गौर्वयो दधुः ॥१४॥ सुबर्हिरग्निः ॥ पूषण्वान्त्स्तीर्णबर्हिरमर्त्यः ॥ बृ
हती छन्दऽ इन्द्रियन्त्रिवत्सो गौर्वयो दधुः ॥१५॥ दुरो देवीः ॥ दुरो देवीर्दिशो महीर्
ब्रह्मा देवो बृहस्पतिः ॥ पङ्क्तिश्छन्दऽ इहेन्द्रियन्तुर्यवाड्गौर्वयो दधुः ॥१६॥ उषे
यह्वी सुपेशसा विश्वे देवाऽअमर्त्याः ॥ त्रिष्टुप्छन्दऽ इहेन्द्रियम्पष्ठवाड्गौर्वयो
दधुः ॥१७॥ दैव्या होतारा भिषजेन्द्रेण सयुजा युजा ॥ जगती छन्दऽ इन्द्रियमनड्वा २
न्गौर्वयो दधुः ॥१८॥ तिस्रऽइडा ॥ तिस्रऽइडा सरस्वती भारती मरुतो विशः ॥

दै दैव्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विराड्छन्दऽ इहेन्द्रियन्धेनुर्गौर्न्न वयो दधुः ॥१९॥ त्वष्टा तुरीपः ॥ त्वष्टा तुरीपोऽअ
द्भुतऽ इन्द्राग्नी पुष्टिवर्द्धना ॥ द्विपदा छन्दऽ इन्द्रियमुक्षा गौर्न्न वयो दधुः ॥२०॥ शु
मितानः ॥ शमिता नो वनस्पतिः सविता प्प्रसुवन्भगम् ॥ ककुप्छन्दऽ इहेन्द्रि
यं वशा वेहद्वयो दधुः ॥२१॥ स्वाहा यज्ञम् ॥ स्वाहा यज्ञं वरुणः सुक्षत्रो भेषजङ्क
रत् ॥ अतिछन्दाऽ इन्द्रियम्बृहदृषभो गौर्वयो दधुः ॥२२॥ वसन्तेनऽ ऋतुना देवा
वसवस्त्रिवृता स्तुताः ॥ रथन्तरेण तेजसा हविरिन्द्रे वयो दधुः ॥२३॥ ग्रीष्मेण
ऽऋतुना देवा रुद्राः पञ्चदशे स्तुताः ॥ बृहता यशसा बलँ हविरिन्द्रे वयो दधुः
॥२४॥ वर्षाभिर्ऋतुनादित्याः स्तोमे सप्तदशे स्तुताः ॥ वैरूपेण विशौजसा हवि
रिन्द्रे वयो दधुः ॥२५॥ शारदेनऽ ऋतुना देवाऽ एकविँशऽ ऋभवः स्तुताः ॥

संहि॰ वैराजेनश्रियाश्रियँहविरिन्द्रेवयोदधुः॥२६॥हेमन्तेनऽऋतुना॥देवास्त्रिणवे उ.अ.
३ मरुतस्तुताः॥बलेनशक्करीःसहोहविरिन्द्रेवयोदधुः॥२७॥शैशिरेणऽऋतुना २१
॥देवास्त्रयस्त्रिँशेमृतास्तुताः॥सत्येनरेवतीःक्षत्रँहविरिन्द्रेवयोदधुः॥२८
होतायक्षत्॥होतायक्षत्समिधाग्निमिडस्पदेश्विनेन्द्रँसरस्वतीमजोधूम्रो
नगोधूमैःकुवलैर्भेषजम्मधुशष्पैर्न्नतेजऽइन्द्रियम्पयःसोमःपरिस्रुताघृत-
म्मधुव्यन्त्वाज्यस्यहोतर्य्यज॥२९॥होतायक्षत्तनूनपात्सरस्वतीम्॥होता
यक्षत्तनूनपात्सरस्वतीमविर्म्मेषोनभेषजम्पथामधुमताभरन्नश्विनेन्द्रा
यवीर्य्यम्बदरैरुपवाकाभिर्भेषजन्तोक्मभिःपयःसोमःपरिस्रुताघृतम्मधु ३
व्यन्त्वाज्यस्यहोतर्य्यज॥३०॥होतायक्षन्नराशँसन्न॥नग्नहुम्पतिँसुर

याभेषजम्मेषःऽ सरस्वतीभिषग्ग्रथोनचन्द्र्याश्विनोर्वपाऽ इन्द्रस्यवीर्य्यम्ब
दरैरुपवाकाभिर्भेषजन्तोक्मभिः पयः सोमः परिस्रुताघृतम्मधुव्यन्त्वाज्ज्य
स्यहोतर्य्यज ॥३१॥ होतायक्षदिडेडितःऽ ॥ होतायक्षदिडेडितऽ आजुह्वानः सर
स्वतीमिन्द्रम्बलेनवर्द्धयन्नृषभेणगवेन्द्रियमश्विनेन्द्रायभेषजंय्यवैः कर्क
न्धुभिर्म्मधुलाजैर्न्नमासरम्पयः सोमः परिस्रुताघृतम्मधुव्यन्त्वाज्ज्यस्यहोत
र्य्यज ॥३२॥ होतायक्षद्बर्हिरूर्णम्म्रदाः ॥ होतायक्षद्बर्हिरूर्णम्म्रदाभिषङ्ना
सत्याभिषजाश्विनाश्वाशिशुमतीभिषग्धेनुःऽ सरस्वतीभिषग्दुहऽ इन्द्रा
यभेषजम्पयः सोमः परिस्रुताघृतम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्यज ॥३३॥ होता
यक्षद्दुरोदिशः कवष्ष्योनव्यचस्वतीरश्विभ्यान्नदुरोदिशऽ इन्द्रोनरोदसीदुघे

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुहे धेनुः सरस्वत्यश्विनेन्द्राय भेषजᳬं शुक्रन्नज्योतिरिन्द्रियम्पयः सोमः प
रिस्रुता घृतम्मधु व्यन्त्वाज्ज्यस्य होतर्य्यज ॥३४॥ होता यक्षत्सुपेशसोषे नक्तन्दि
वाश्विना सम्ञ्जाते सरस्वत्या त्विषिमिन्द्रे न भेषजᳬं श्येनो न रजसा हृदा श्रिया
न मासरम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्ज्यस्य होतर्य्यज ॥३५॥ होता
यक्षद्दैव्या होतारा ॥ भिषजाश्विनेन्द्रन्न जागृवि दिवा नक्तन्न भेषजैः शूषᳬं
सरस्वती भिषक्सीसेन दुहऽ इन्द्रियम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वा-
ज्ज्यस्य होतर्य्यज ॥३६॥ होता यक्षत्तिस्रो देवीः ॥ होता यक्षत्तिस्रो देवीर्न्न भेष
जन्त्रयस्त्रिधातवोऽपसो रूपमिन्द्रे हिरण्ययमश्विनेडा न भारती वाचा सरस्व
ती महऽ इन्द्राय दुहऽ इन्द्रियम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्ज्यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

होतुर्य्यजि ॥ ३७ ॥ होतायक्षत्सुरेतसमृषुभम्म् ॥ होतायक्षत्सुरेतस मृषुभन्नर्य्या
पसुन्त्वष्टारमिन्द्रमुश्विनाभिषजुन्नसरस्वतीमोजोनजुतिरिन्द्रियं घृकोनरभसो
भिषग्ग्यशुः सुरयाभेषुज छं श्रियानमासरम्पयुः सोमः परिस्त्रुताघृतम्मधुव्य
न्त्वाज्ज्यस्युहोतुर्य्यजि ॥ ३८ ॥ होतायक्षद्वनस्पतिं शमितारम् ॥ होतायक्षद्व
नुस्पतिं शमितारं शुतक्रतुम्भीमन्नमुन्युं राजानंव्याघ्रन्नमसाश्वि
नाभामुं सरस्वतीभिषगिन्द्रायदुहऽ इन्द्रियम्पयुः सोमः परिस्त्रुताघृतम्म
धुव्यन्त्वाज्ज्यस्युहोतुर्य्यजि ॥ ३९ ॥ होतायक्षदग्निं छं स्वाहा ॥ होतायक्षदग्नि
छं स्वाहाज्ज्यस्यस्तोकाना छं स्वाहा मेदसाम्पृथक्त्वाहाछागमुश्विभ्यां छं स्वा
हा मेषं सरस्वत्यैस्वाहऽ ऋषुभमिन्द्रायसिं हायुसहसऽ इन्द्रियं स्वाहा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्निन्नभैषजꣳ स्वाहा सोममिन्द्रियꣳ स्वाहेन्द्रꣳ सुत्रामाणꣳ सवितारं वरुण
म्भिषजाम्पतिꣳ स्वाहा वनस्पतिम्प्रियम्पाथो न भेषजꣳ स्वाहा देवा ऽआ-
ज्यपा जुषाणो ऽअग्निर्भेषजम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य
होतर्य्यज ॥ ४० ॥ होता यक्षदश्विनौ छागस्य ॥ वपाया मेदसो जुषेताꣳ हवि
र्होतर्य्यज होता यक्षत्सरस्वतीम्मेषस्य वपाया । मेदसो जुषताꣳ हविर्होत
र्य्यज ॥ होता यक्षदिन्द्रमृषभस्य वपाया मेदसो जुषताꣳ हविर्होतर्य्यज ॥ ४१
होता यक्षदश्विनौ सरस्वतीम् ॥ होता यक्षदश्विनौ सरस्वतीमिन्द्रꣳ सुत्रा
माणमिमे सोमाः सुरामाणश्छागैर्न्न मेषैर्ऋषभैः ऽ सुताः ऽ शष्पैर्न्न तोक्मभि
र्लाजैर्म्महस्वन्तो मदा मासरेण परिष्कृताः शुक्राः ऽ पयस्वन्तोऽमृताः प्रस्थिता-

CC-0. In Public Domain. Digitization by eGangotri

तावो मधुम्मुतुस्तानुश्विनासरस्वतीन्द्रः सुत्रामावृत्रहाजुषन्ताꣳ सोम्म्यम्म
धुपिबन्तुमदन्तुव्यन्तुहोतुर्य्यजे ॥४२॥ होतायक्षदुश्विनौछागस्य ॥ हविषऽ
आर्तामुद्यमंध्यतोमेदुऽउद्भृतम्पुराद्वेषोभ्यः पुरापौरुषेय्याग्गृभोघस्तान्नून
ङ्घासेऽ अज्राणांय्यवसप्रथमानाꣳ सुमत्क्षराणाꣳ शतरुद्रियाणाम-
ग्निष्वात्तानाम्पीवोपवसनानाम्पार्श्वतः श्रोणितः शितामुतऽउत्सादतोङ्गा
दङ्गादवत्तानाङ्करतऽएवाश्विनाजुषेताꣳ हविर्होतुर्य्यजे ॥४३॥ होतायक्षत्स
रस्वतीम्मेषस्य हविषऽ आवयदद्यमंध्यतोमेदुऽ उद्भृतम्पुराद्वेषोभ्यः पुरापौ
रुषेय्यागृभोघसन्नूनङ्घासेऽ अज्राणांय्यवसप्रथमानाꣳ सुमत्क्षराणाꣳ श
तरुद्रियाणामग्निष्वात्तानाम्पीवोपवसनानाम्पार्श्वतः श्रोणितः शितामु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संहि तऽउत्सादतोऽङ्गादङ्गादवत्तानाङ्करदेवꣳ सरस्वतीजुषताꣳ हविर्होतर्य्यज ॥ उ.अ.
६ ॥४४॥ होतायक्षदिन्द्रमृषभस्यहविषऽआवयदद्यमध्यतोमेदऽउद्भृतम्पुरा २१
द्वेषोभ्यः पुरापौरुषेय्यागृभोघसन्नूनङ्घासेऽअज्राणांयवसप्रथमा
नाꣳ सुमत्क्षराणाꣳ शतरुद्रियाणामग्निष्वात्तानाम्पीवोपवसनाना
म्पार्श्वतः श्रोणितः शितामतऽउत्सादतोऽङ्गादङ्गादवत्तानाङ्करदेवमिन्द्रोजु
षताꣳ हविर्होतर्य्यज ॥४५॥ होतायक्षद्वनस्पतिमभिहिपिष्टतमयारभि
ष्ठयारशनयाधित ॥ यत्राश्विनोश्छागस्यहविषः प्रियाधामानियत्रसर
स्वत्यामेषस्यहविषः प्रियाधामानियत्रेन्द्रस्यऋषभस्यहविषः प्रिया ६
धामानियत्राग्नेः प्रियाधामानियत्रसोमस्यप्रियाधामानियत्रेन्द्रस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सुत्राम्णः प्रियाधामानि यत्र सवितुःऽ प्रियाधामानि यत्र वरुणस्य प्रिया
धामानि यत्र वनस्पतेः प्रियापाथाꣳसि यत्र देवानामाज्यपानां प्रिया-
धामानि यत्राग्नेर्होतुः प्रियाधामानि तत्रैतान्प्रस्तुत्येवोपस्तुत्येवोपावस्रक्ष
द्रभीयसऽइव कृत्वी करदेवं देवो वनस्पतिर्जुषताꣳ हविर्होतर्यज ॥ ४६ ॥
होता यक्षदग्निꣳ स्विष्टकृतम् ॥ होता यक्षदग्निꣳ स्विष्टकृतमयाडग्निरश्वि
नोश्छागस्य हविषः प्रियाधामान्ययाट् सरस्वत्या मेषस्य हविषः प्रियाधा
मान्ययाडिन्द्रस्यऽऋषभस्य हविषः प्रियाधामान्ययाडग्नेः प्रियाधामान्य
याट् सोमस्य प्रियाधामान्ययाडिन्द्रस्य सुत्राम्णः प्रियाधामान्ययाट् सवितुः
प्रियाधामान्ययाड्वरुणस्य प्रियाधामान्ययाड्वनस्पतेः प्रियापाथाꣳस्य

याद्देवानामाज्यपानाम्प्रियाधामानियक्षदग्नेर्होतुः प्रियाधामानियक्ष
त्स्वम्महिमानमायजतामेज्या ऽइषः कृणोतु सो ऽअध्वराजातवेदाजुषताꣳ
हविर्होतर्यज ॥४७॥ देवम्बर्हिः सरस्वती सुदेवमिन्द्रे ऽअश्विना ॥ तेजोनच
क्षुरक्ष्योर्बर्हिषादधुरिन्द्रियं वसुवने वसुधेयस्यव्यन्तुयज ॥४८॥ देवीर्द्वा-
रः ॥ देवीर्द्वारो ऽअश्विनाभिषजेन्द्रेसरस्वती ॥ प्राणन्नवीर्यन्नसिद्वारो
दधुरिन्द्रियं वसुवने वसुधेयस्यव्यन्तुयज ॥४९॥ देवी ऽउषासौ ॥ देवी ऽउषा
सावश्विनासुत्रामेन्द्रेसरस्वती ॥ बलन्नवाचमास्य ऽउषाभ्यान्दधुरिन्द्रियं व
सुवने वसुधेयस्यव्यन्तुयज ॥५०॥ देवीजोष्ट्री ॥ देवीजोष्ट्रीसरस्वत्यश्विने
न्द्रमवर्द्धयन् ॥ श्रोत्रन्नकर्णयोर्यशोजोष्ट्रीभ्यान्दधुरिन्द्रियं वसुवने वसुधे

CC-0. In Public Domain. Digitization by eGangotri

यस्यव्यन्तुयजं ॥५१॥ देवीऽऊर्ज्जाहुती ॥ देवीऽऊर्ज्जाहुतीदुघेसुदुघेन्द्रेसरस्व
त्यश्विनाभिषजावतः ॥ शुक्रन्नज्योतिस्तनयोराहुतीधत्तऽइन्द्रियंवसुवनेव
सुधेयस्यव्यन्तुयजं ॥५२॥ देवादेवानाम् ॥ देवादेवानाम्भिषजाहोताराविन्द्र
मश्विना ॥ वषट्कारैःसरस्वतीत्विषिन्नहृदयेमतिर्ठ॰होतृभ्यान्दधुरिन्द्रियंव
सुवनेवसुधेयस्यव्यन्तुयजं ॥५३॥ देवीस्तिस्रः ॥ देवीस्तिस्रस्तिस्रोदेवीर॒-
श्विनेडासरस्वती ॥ शूषन्नमध्येनाभ्यामिन्द्रायदधुरिन्द्रियंवसुवनेवसुधेय
स्यव्यन्तुयजं ॥५४॥ देवऽइन्द्रः ॥ देवऽइन्द्रोनराशर्ठ॰संस्त्रिवरूथःसरस्वत्या
श्विभ्यामीयतेरथः । रेतोनरूपममृतञ्जनित्रमिन्द्रायत्वष्टादधदिन्द्रियाणि
वसुवनेवसुधेयस्यव्यतुयजं ॥५५॥ देवोदेवैः ॥ देवोदेवैर्व्वनस्पतिर्हिरण्पय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संहि पयोऽ अश्विभ्याꣳ सरस्वत्यासुपिप्पलऽ इन्द्रायपच्यतेमधु ॥ ओजोनजूतिर्ऋ उ.अ.
८ षभोनभामंवनस्पतिर्नोदधदिन्द्रियाणिवसुवनेवसुधेयस्यव्यन्तुयज ॥ ५६ २१
देवम्बर्हिः ॥ देवम्बर्हिर्वारितीनामध्वरेस्तीर्णमश्विभ्यामूर्णम्रदाः सरस्व-
त्यास्योनमिन्द्रतेसदः ॥ ईशायैमन्युꣳ राजानम्बर्हिषादधुरिन्द्रियंवसुवने
वसुधेयस्यव्यन्तुयज ॥ ५७ ॥ देवोऽ अग्निः स्विष्टकृद्देवान्यक्षद्यथायथꣳ -
होताराविन्द्रमश्विनावाचावाचꣳ सरस्वतीमग्निꣳ सोमꣳ स्विष्टकृत्स्विष्ट
ऽ इन्द्रः सुत्रामासवितावरुणोभिषगिष्टोदेवोवनस्पतिः स्विष्टादेवाऽ आ
ज्यपाः स्विष्टोऽ अग्निरग्निनाहोताहोत्रे स्विष्टकृद्यशोनदधदिन्द्रियमू ८
र्जमपचितिꣳ स्वधांवसुवनेवसुधेयस्यव्यन्तुयज ॥ ५८ ॥ अग्निमद्यहो

तोरमवृणीतायंय्यजमानः पचन्पक्तीः पचन्पुरोडाशम्बध्नन्नश्वि-
भ्याञ्छागᳬं सरस्वत्यै मेषमिन्द्रायऽऋषभᳬं सुन्वन्नश्विभ्याᳬं सरस्वत्या
ऽइन्द्राय सुत्राम्णे सुरासोमान्त्सूपस्थाऽअद्य ॥५९॥ सूपस्थाऽअद्य देवो
वनस्पतिरभवदश्विभ्याञ्छागेन सरस्वत्यै मेषेणेन्द्रायऽऋषभेणाक्षँस्तान्मे-
दस्तः प्रति पचताग्गृभीषतावीवृधन्त पुरोडाशैरपुरश्विना सरस्वतीन्द्रः सु-
त्रामा सुरासोमाँस्त्वामद्य ॥६०॥ त्वामद्यऽऋषऽआर्षेयऽऋषीणान्नपादवृ-
णीतायंय्यजमानो बहुब्भ्यऽआसङ्गतेब्भ्यऽएष मे देवेषु वसु वार्य्यायक्ष्यतऽइति
ता या देवा देव दानान्यदुस्तान्यस्माऽआ च शास्स्वा च गुरस्वेषितश्च होतरसि
भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहि ॥६१॥ इति वाजसनेयसं-

हितायांएकविंशोऽध्यायः॥२१॥ तेजोसिशुक्रममृतमायुष्पाऽआयुर्म्मे
पाहि॥देवस्यत्वासवितुःप्प्रसवेऽश्विनोर्ब्बाहुब्भ्यांम्पूष्णोहस्ताब्भ्यामाददे॥१
॥इमामगृब्भ्णन्॥इमामगृब्भ्णन्नशनामृतस्यपूर्व्वेऽआयुषिविदथेषुकव्या॥सा
नोऽअस्मिन्त्सुतऽआबभूवऽऋतस्यसामन्त्सरमारपन्ती॥२॥अभिधाऽअ
सि॥अभिधाऽअसिभुवनमसियन्तासिधर्त्ता॥सत्वमग्निंवैश्वानरंसप्प्र
थसङ्गच्छस्वाहाकृतः॥३॥स्वगात्वा॥देवेब्भ्यःप्प्रजापतयेब्ब्रह्मन्नश्वम्भन्त्स्या
मिदेवेब्भ्यःप्प्रजापतयेतेनराध्यासम्॥तम्बधानदेवेब्भ्यःप्प्रजापतयेतेनराध्नु
हि॥४॥प्रजापतयेत्वा॥प्रजापतयेत्वाजुष्टम्प्प्रोक्षामीन्द्राग्निब्भ्यान्त्वाजुष्टम्प्प्रोक्षा ९
मिवायवेत्वाजुष्टम्प्प्रोक्षामिविश्वेब्भ्यस्त्वादेवेब्भ्योजुष्टम्प्प्रोक्षामिसर्व्वेब्भ्यस्त्वादेवे

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भ्यो जुष्टम्प्रोक्षामि ॥ योऽअर्वन्तञ्जिघांछंसति तमुभ्यमीति वरुणः ॥ पुरोमर्त्तः
पुरः श्वा ॥ ५ ॥ अग्नये स्वाहा ॥ अग्नये स्वाहा सोमाय स्वाहा पाम्मोदाय स्वाहा स
वित्रे स्वाहा वायवे स्वाहा विष्णवे स्वाहेन्द्राय स्वाहा बृहस्पतये स्वाहा मित्रा
य स्वाहा वरुणाय स्वाहा ॥ ६ ॥ हिङ्काराय स्वाहा ॥ हिङ्काराय स्वाहा हिङ्कृताय
स्वाहा क्रन्दते स्वाहावक्रन्दाय स्वाहा प्रोथते स्वाहा प्रप्रोथाय स्वाहा ग-
न्धाय स्वाहा घ्राताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा सन्दिताय स्वा
हा वल्गते स्वाहासीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा
कूजते स्वाहा प्रबुद्धाय स्वाहा विजृम्भमाणाय स्वाहा विचृताय स्वाहा सछंहा
नाय स्वाहोपस्थिताय स्वाहायनाय स्वाहा प्रायणाय स्वाहा ॥ ७ ॥ यते स्वाहा

CC-0. In Public Domain. Digitization by eGangotri

॥ सुतेस्वाहाधावतेस्वाहोद्द्रावायस्वाहोद्द्रुतायस्वाहाशूकारायस्वाहाशूकृता
यस्वाहानिषण्णायस्वाहोत्थितायस्वाहाजवायस्वाहाबलायस्वाहावि
वर्त्तमानायस्वाहाविवृत्तायस्वाहाविधून्वानायस्वाहाविधूतायस्वाहाशु
श्रूषमाणायस्वाहाशृण्वतेस्वाहेक्षमाणायस्वाहेक्षितायस्वाहावीक्षिता
यस्वाहानिमेषायस्वाहायदत्तितस्मैस्वाहायत्पिबतितस्मैस्वाहायन्मू
त्रङ्करोतितस्मैस्वाहाकुर्वतेस्वाहाकृतायस्वाहा ॥८॥ तत्सवितुः ॥ तत्स-
वितुर्वरेण्यम्भर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥९॥ हिर
ण्यपाणिमूतये ॥ सवितारमुपह्वये ॥ सचेत्तादेवतापदम् ॥१०॥ देवस्यचेत
तः ॥ देवस्यचेततोमहीम्प्रसवितुर्हवामहे ॥ सुमतिꣳसत्यराधसम् ॥११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुष्टुतिꣳ सुमतीवृधः ॥ सुष्टुतिꣳ सुमतीवृधो रातिꣳ सवितुरीमहे ॥ प्रदेवायम
ती विदे ॥१२॥ रातिꣳ सत्पतिम् ॥ रातिꣳ सत्पतिम्महे सवितारमुपह्वये ॥ आ
सवन्देववीतये ॥१३॥ देवस्यसवितुः ॥ देवस्यसवितुर्म्मतिमासवंविश्वदेव्यम्
॥ धियाभगम्मनामहे ॥१४॥ अग्निꣳ स्तोमेन । बोधयसमिधानोऽअमर्त्यम् ॥
हव्यादेवेषुनोदधत् ॥१५॥ सहव्यवाट् ॥ सहव्यवाडमर्त्यऽउशिग्दूतश्चनोहि
तः ॥ अग्निर्धियासमृण्वति ॥१६॥ अग्निन्दूतम्पुरोदधे हव्यवाहमुपब्रुवे ॥ दे
वाꣳ२ऽआसादयादिह ॥१७॥ अजीजनोहिपवमानसूर्य्यंविधारेशक्मनापयः
॥ गोजीरयारꣳहमाणः पुरन्ध्या ॥१८॥ विभूर्म्मात्रा ॥ प्रभूः पित्राश्वो
सिहयोस्यत्योसिमयोस्यर्वासिसप्तिरसिवाज्यसिवृषासिनृमणाऽअसि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 षयुर्म्मासिशिशुर्म्मास्यादित्यानुम्यत्वान्निहिदेवाऽआशापालाऽएत
 न्देवेब्भ्योऽश्श्वम्मेधायप्प्रोक्षितठं॰ रक्षतेहरन्तिरिहरमतामिहधृतिरिहस्वधृ
तिः स्वाहा ॥१९॥ कायस्वाहा ॥ कायस्वाहाकस्म्मैस्वाहाकतमस्म्मैस्वाहास्वा
हाधिमाधीतायस्वाहामनः प्प्रजापतयेस्वाहाचित्तंविज्ञातायादित्त्यैस्वा
हादित्त्यैमह्यैस्वाहादित्त्यैसुमृडीकायैस्वाहासरस्वत्त्यैस्वाहासरस्वत्त्यैपा
वकायैस्वाहासरस्वत्त्यैबृहत्त्यैस्वाहापूष्णेस्वाहापूष्णेप्प्रपत्थ्यायस्वाहा
पूष्णेनरन्धिषायस्वाहात्त्वष्ट्रेस्वाहात्त्वष्ट्रेतुरीपायस्वाहात्त्वष्ट्रेपुरुरूपायस्वा
हाविष्ण्णवेस्वाहाविष्ण्णवेनिभूयपायस्वाहाविष्ण्णवेशिपिविष्टायस्वाहा
॥२०॥ विश्श्वोदेवस्य ॥ नेतुर्म्मर्तोवुरीतसक्ख्यम् ॥ विश्श्वोरायऽइषुद्ध्यति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्युम्म्नंवृणीतपुष्ष्यसेस्वाहा ॥२१॥ आब्रह्मन्न् ॥ आब्रह्मन्न्ब्राह्मणोब्र
ह्मवर्च्चसीजायतामाराष्ट्रेराजन्न्यःश्शूरऽइषव्व्योतिव्व्या ॥धीमहारथोजा
यतान्दोग्ध्रीधेनुर्व्वोढानड्वानाशुः सप्तिःपुरन्धिर्य्योषाजिष्णूरथेष्ठाः
सभेयोयुवास्ययजमानस्यवीरोजायतान्निकामेनिकामेनःपर्ज्जन्न्योवर्ष
तुफलवत्त्योनऽओषधयःपच्यन्तांय्योगक्षेमोनः कल्प्पताम् ॥२२॥ प्राणाय
स्वाहा ॥ पानायस्वाहाव्यानायस्वाहाचक्षुषेस्वाहाश्श्रोत्रायस्वाहावाचेस्वाहा
मनसेस्वाहा ॥२३॥ प्राच्च्यैदिशे । स्वाहार्वाच्च्यैदिशेस्वाहादक्षिणायैदिशेस्वाहा
र्वाच्च्यैदिशेस्वाहाप्प्रतीच्च्यैदिशेस्वाहार्वाच्च्यैदिशेस्वाहोदीच्च्यैदिशेस्वाहार्वा
च्च्यैदिशेस्वाहोर्द्ध्वायैदिशेस्वाहार्वाच्च्यैदिशेस्वाहावाच्च्यैदिशेस्वाहार्वाच्च्यैदिशे

संहि स्वाहा ॥२४॥ अद्भ्यः स्वाहा वार्भ्यः स्वाहोदकाय स्वाहा तिष्ठन्तीभ्यः स्वाहा स्र उ.अ.
१२ वन्तीभ्यः स्वाहा स्पन्दमानाभ्यः स्वाहा कूप्याभ्यः स्वाहा सूद्याभ्यः स्वाहा धा २२
र्याभ्यः स्वाहार्णवाय स्वाहा समुद्राय स्वाहा सरिराय स्वाहा ॥२५॥ वाताय
स्वाहा ॥ धूमाय स्वाहाभ्राय स्वाहा मेघाय स्वाहा विद्योतमानाय स्वाहा स्तनय
ते स्वाहावस्फूर्जते स्वाहा वर्षते स्वाहाववर्षते स्वाहोग्रं वर्षते स्वाहा शीघ्रं वर्षते
स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा प्रुष्णते स्वाहा शीकायते स्वाहा प्रुष्वाभ्यः
स्वाहा ह्रादुनीभ्यः स्वाहा नीहाराय स्वाहा ॥२६॥ अग्नये स्वाहा ॥ अग्नये स्वाहा
सोमाय स्वाहेन्द्राय स्वाहा पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहा दिग्भ्यः १२
स्वाहाशाभ्यः स्वाहोर्व्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा ॥२७॥ नक्षत्रेभ्यः स्वाहा ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नक्षत्रियेभ्यः स्वाहाहोरात्रेभ्यः स्वाहार्द्धमासेभ्यः स्वाहा मासेभ्यः स्वाहाऽऋ
तुभ्यः स्वाहार्तवेभ्यः स्वाहा संवत्सराय स्वाहा द्यावापृथिवीभ्याᳬं स्वाहा च
न्द्राय स्वाहा सूर्य्याय स्वाहा रश्मिभ्यः स्वाहा वसुभ्यः स्वाहा रुद्रेभ्यः स्वाहादि-
त्येभ्यः स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा मूलेभ्यः स्वाहा शाखाभ्यः
स्वाहा वनस्पतिभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहौषधीभ्यः स्वाहा ॥
॥२८॥ शतम् ॥१३००॥ पृथिव्यै स्वाहा ॥ पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वा
हा सूर्य्याय स्वाहा चन्द्राय स्वाहा नक्षत्रेभ्यः स्वाहाद्भ्यः स्वाहौषधीभ्यः स्वाहा
वनस्पतिभ्यः स्वाहा परिप्लवेभ्यः स्वाहा चराचरेभ्यः स्वाहा सरीसृपेभ्यः स्वाहा
॥२९॥ असवे स्वाहा ॥ असवे स्वाहा वसवे स्वाहा विभुवे स्वाहा विवस्वते स्वाहा

CC-0. In Public Domain. Digitization by eGangotri

संहि गणश्रियेस्वाहागणपतयेस्वाहाऽभिभुवेस्वाहाऽधिपतयेस्वाहाशूषायस्वाहास उ·अ·
१३ ꣳसर्प्पायस्वाहाचन्द्रायस्वाहाज्ज्योतिषेस्वाहामलिम्म्लुचायस्वाहादिवापत २२
यतेस्वाहा॥३०॥ मधवेस्वाहा॥ मधवेस्वाहामाधवायस्वाहाशुक्रायस्वाहाशु
चयेस्वाहानभसेस्वाहानभस्यायस्वाहेषायस्वाहोर्ज्जायस्वाहासहसेस्वाहास
हस्यायस्वाहातपसेस्वाहातपस्यायस्वाहाꣳहसस्पतयेस्वाहा॥३१॥ घा
जायस्वाहा॥ प्रसवायस्वाहापिजायस्वाहाक्रतवेस्वाहास्वः स्वाहामूर्द्ध्नेस्वा
हाव्यश्नुविनेस्वाहान्त्यायस्वाहान्त्यायभौवनायस्वाहाभुवनस्यपतयेस्वाहा
धिपतयेस्वाहाप्रजापतयेस्वाहा॥३२॥ आयुर्य्यज्ञेन॥ कल्पताꣳस्वाहाप्रा १३
णोयज्ञेनकल्पताꣳस्वाहापानोयज्ञेनकल्पताꣳस्वाहाव्यानोयज्ञेनकल्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ताꣳ स्वाहोदानोयज्ञेनकल्पताꣳ स्वाहासमानोयज्ञेनकल्पताꣳ स्वाहाचक्षु
र्यज्ञेनकल्पताꣳ स्वाहाश्रोत्रंयज्ञेनकल्पताꣳ स्वाहावाग्यज्ञेनकल्पता
ꣳ स्वाहामनोयज्ञेनकल्पताꣳ स्वाहात्मायज्ञेनकल्पताꣳ स्वाहाब्रह्मा-
यज्ञेनकल्पताꣳ स्वाहाज्ज्योतिर्यज्ञेनकल्पताꣳ स्वाहास्वर्यज्ञेनकल्पता
ꣳ स्वाहापृष्ठंयज्ञेनकल्पताꣳ स्वाहायज्ञोयज्ञेनकल्पताꣳ स्वाहा ॥३३॥
एकस्मैस्वाहाद्वाभ्याꣳ स्वाहाशतायस्वाहैकशतायस्वाहाव्युष्ट्यैस्वाहास्व
र्गायस्वाहा ॥३४॥ इतिश्रीवाजसनेयसंहितायांदीर्घपाठेद्वाविंशोऽध्यायः
॥२२॥ हिरण्यगर्ब्भः सम् ॥ हिरण्यगर्ब्भः समवर्त्तताग्ग्रेभूतस्यजातः
पतिरेकऽआसीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम ॥

संहि ॥१॥ उपयामगृहीतोसि ॥ प्रजापतये त्वा जुष्टं गृह्णाम्येषते योनिः सूर्यस्ते म उ.अ.
१४ हिमा॥ यस्तेहन्त्संवत्सरे महिमासम्बभूव यस्ते वायावन्तरिक्षे महिमासम्बभू २३
व यस्ते दिवि सूर्ये महिमासम्बभूव तस्मै ते महिम्ने प्रजापतये स्वाहा दे
वेभ्यः ॥२॥ यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव॥ यऽ
ईशेऽअस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम॥३॥ उपयामगृही
तोसि॥ प्रजापतये त्वा जुष्टं गृह्णाम्येषते योनिश्चन्द्रमास्ते महिमा॥ यस्ते रात्रौ
संवत्सरे महिमासम्बभूव यस्ते पृथिव्यामग्नौ महिमासम्बभूव यस्ते नक्षत्रे
षु चन्द्रमसि महिमासम्बभूव तस्मै ते महिम्ने प्रजापतये देवेभ्यः स्वाहा॥ ४॥ १४
युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः ॥ रोचन्ते रोचना दिवि ॥५॥ युञ्जन्त्यस्य

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ युञ्जन्त्यस्य काम्म्या हरी विपक्षसा रथे ॥ शोणा धृष्ष्णू नृवाहसा ॥६॥ यद्वा
तः ॥ यद्वातोऽ अपोऽ अगनीगन्प्प्रियामिन्द्रस्य तन्न्वम् ॥ एतछं स्तोतरने
नेपथा पुनरश्श्वमावर्तयासि नः ॥७॥ वसवस्त्वा ॥ञ्जन्तु गायत्रेण छन्दसा रुद्रा
स्त्वाञ्जन्तु त्रैष्टुभेन छन्दसादित्यास्त्वाञ्जन्तु जागतेन छन्दसा ॥ भूर्ब्भुवः स्वर्ल्ला
जी ३ ञ्छाची ३ न्यव्ये गव्येऽ एतदन्नमत देवाऽ एतदन्नमद्धि प्रजापते ॥८॥
कः स्वित् ॥ कः स्विदेकाकी चरति कऽ उ स्विज्जायते पुनः ॥ किछं स्विद्धिमस्य
भेषजङ्किम्वावपनम्महत् ॥९॥ सूर्य्यऽ एकाकी ॥ चरति चन्द्रमा जायते पुनः
॥ अग्निर्हिमस्य भेषजम्भूमिरावपनम्महत् ॥१०॥ कास्वित् ॥ कास्विदासीत्पू
र्व्वचित्तिः किछं स्विदासीद्बृहद्वयः ॥ कास्विदासीत्पिलिप्पिला कास्विदासीत्पि

संहि॰ शङ्गिला ॥११॥ द्यौरासीत् ॥ द्यौरासीत्पूर्वचित्तिरश्वऽ आसीद्बृहद्वयः ॥ अविरा उ॰अ॰
१५ सीत्पिलिप्पिला रात्रिरासीत्पिशङ्गिला ॥१२॥ वायुष्ट्वा ॥ पचतैरवत्वसितग्रीव - २३
श्छागैर्न्यग्रोधश्चमसैः शल्मलिर्वृद्ध्या ॥ एषस्यराथ्योवृषापड्भिश्चतुर्भि
रेदगन्ब्रह्माकृष्णश्चनोवतुनमोग्नये ॥१३॥ संशितोरश्मिना ॥ रथः संशितो
रश्मिनाहयः ॥ संशितोऽ अप्स्वप्सुजाब्रह्मासोमपुरोगवः ॥१४॥ स्वयं
वाजिन् ॥ स्वयंवाजिंस्तन्वङ्कल्पयस्व स्वयंयजस्व स्वयञ्जुषस्व ॥ महिमातेन्येन
नसन्नशे ॥१५॥ नवै ॥ नवाऽउऽ एतन्म्रियसेनरिष्यसिदेवाँ२॥ऽ इदेषिपथि -
भिः सुगेभिः ॥ यत्रासतेसुकृतोयत्रतेययुस्तत्रत्वादेवः सवितादधातु ॥१६॥ १५
अग्निः पशुः ॥ अग्निः पशुरासीत्तेनायजन्तसऽ एतंलोकमजयद्यस्मिन्न

CC-0. In Public Domain. Digitization by eGangotri

ग्निः सतेंल्लोकोभविष्य्यतितञ्जेष्य्यसिपिबैताऽ अपः ॥ वायुः पशुरासीतेना
यजन्तुसऽ एतंल्लोकमजयद्यस्मिन्न्वायुः सतेंल्लोकोभविष्य्यतितञ्जेष्य्यसिपि
बैताऽ अपः ॥ सूर्य्यः पशुरासीतेनायजन्तुसऽ एतंल्लोकमजयद्यस्मिन्त्सूर्य्यः
सतेंल्लोकोभविष्य्यतितञ्जेष्य्यसिपिबैताऽ अपः ॥१७॥ प्राणायस्वाहा ॥ पानाय
स्वाहाव्यानायस्वाहा ॥ अम्बेऽ अम्बिकेम्बालिकेनमानयतिकश्चन ॥ ससस्त्यश्व
कः सुभद्रिकाङ्काम्पीलवासिनीम् ॥१८॥ गणानान्त्वा ॥ गणपतिंहवामहे प्रिया
णान्त्वाप्रियपतिंहवामहेनिधीनान्त्वानिधिपतिंहवामहेवसोमम ॥ आहम
जानिगर्ब्भधमात्वमजासिगर्ब्भधम् ॥१९॥ ताऽउभौचतुरः पदः सम्प्रसारयावस्व
र्गे लोकेप्प्रोर्णुवाथांवृषावाजीरेतोधारेतोदधातु ॥२०॥ उत्सक्थ्याऽ अवगुद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्धेहिसमुञ्जिञ्चारयावृषन् ॥ यस्त्रीणाञ्जीवभोजनः ॥२१॥ यकासकौ ॥ शकुन्ति-
काहलगितिवञ्चति आहन्तिगभेपसोनिगल्गलीतिधारका ॥२२॥ यकोऽस-
कौ ॥ शकुन्तकऽआहलगितिवञ्चति ॥ विवक्षतऽइवतेमुखमध्वर्योमानस्त्व
मभिभाषथाः ॥२३॥ माताच ॥ तेपिताचतेग्रंवृक्षस्यरोहतः ॥ प्रतिलामीति
तेपितागभेमुष्टिमतꣳसयत् ॥२४॥ माताच ॥ तेपिताचतेग्रेवृक्षस्यक्रीडतः
॥ विवक्षतऽइवतेमुखम्ब्रह्मन्मात्वंवदोबहु ॥२५॥ ऊर्ध्वमेनाम् ॥ ऊर्ध्वमे
नामुच्छ्रापयगिरौभारꣳहरन्निव ॥ अथास्यैमध्यमेधताँ शीतेवातेपुनन्नि
व ॥२६॥ ऊर्ध्वमेनम् ॥ ऊर्ध्वमेनमुच्छ्रयताद्गिरौभारꣳहरन्निव ॥ अथास्यमध्य
मेजतुशीतेवातेपुनन्निव ॥२७॥ यदस्याः ॥ यदस्याऽअꣳहुभेद्याः कृधुस्थूल

CC-0. In Public Domain. Digitization by eGangotri

मुपातंसत् ॥ मुष्काविदस्याऽएजतोगोशफेशकुलाविव ॥२८॥ यद्देवासः ॥ यद्दे
वासोललामगुंप्रविष्टीमिनमाविषुः ॥ सक्थ्नादेदिश्यतेनारीसत्यस्याक्षिभुवो
यथा ॥२९॥ यद्धरिणः ॥ यद्धरिणोयवमत्तिनपुष्टम्पशुमन्यते ॥ शूद्रायदर्यजा
रानपोषायधनायति ॥३०॥ यद्धरिणोयवमत्तिनपुष्टम्बहुमन्यते ॥ शूद्रोयद-
र्यायैजारोनपोषमनुमन्यते ॥३१॥ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्य
वाजिनः ॥ सुरभिनोमुखाकरत्प्रणऽआयूंषितारिषत् ॥३२॥ गायत्रीत्रि
ष्टुप् ॥ गायत्रीत्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्यासह ॥ बृहत्युष्णिहाककुप्सूचीभिः
शम्यन्तुत्वा ॥३३॥ द्विपदायाः ॥ द्विपदायाश्चतुष्पदास्त्रिपदायाश्चषट्पदाः
॥ विच्छन्दायाश्चसच्छन्दाःसूचीभिःशम्यन्तुत्वा ॥३४॥ महानाम्न्योरेवत्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संहि ॥ महानाम्न्योरेवत्योविश्वाऽआशाःप्रभूवरीः मैघीर्विद्युतोवाचःसूची- उ.अ.
१७ भिःशम्यन्तुत्वा ॥ ३५ ॥ नार्य्यस्तेपत्न्योलोमविचिन्वन्तुमनीषया ॥ देवाना २३
म्पत्न्योदिशःसूचीभिःशम्यन्तुत्वा ॥ ३६ ॥ रजताहरिणीः ॥ सीसायुजो-
युज्यन्तेकर्म्मभिः ॥ अश्वस्यवाजिनस्त्वचिसिमाःशम्यन्तुशम्यन्तीः ॥ ३७
कुविदङ्ग ॥ यवमन्तोयवञ्चिद्यथादान्त्यनुपूर्वंवियूय ॥ इहेहैषाङ्कृणुहिभोज
नानियेबर्हिषोनमऽउक्तिंयजन्ति ॥ ३८ ॥ कस्त्वा ॥ कस्त्वाच्छ्यतिकस्त्वावि
शास्तिकस्तेगात्राणिशम्यति ॥ कउतेशमिताकविः ॥ ३९ ॥ ऋतवस्ते ॥ ऋ
तवस्तऽऋतुथापर्वशमितारोविशासतु ॥ संवत्सरस्यतेजसाशमीभिःशम्य १७
न्तुत्वा ॥ ४० ॥ अर्द्धमासाःपरूंषितेमासाऽआच्छ्यन्तुशम्यन्तः ॥ अहोरात्राणि

CC-0. In Public Domain. Digitization by eGangotri

मरुतोधिलिष्टꣳ सूदयन्तुते ॥४१॥ दैव्याऽअद्ध्वर्य्यवः ॥ स्त्वाच्छ्यन्तुविचेशास
तु ॥ गात्राणिपर्व्वशस्तेसिमाः कृण्वन्तुशम्म्यन्तीः ॥४२॥ द्यौस्ते ॥ पृथिव्यन्त
रिक्षंवायुश्छिद्रंपृणातुते ॥ सूर्य्यस्तेनक्षत्रैः सहलोकङ्कृणोतुसाधुया ॥४३॥
शन्ते ॥ शन्तेपरेभ्योगात्रेभ्यः शमस्त्ववरेभ्यः ॥ शमस्थभ्योमज्जभ्यः शम्म्वस्तु
तन्वैतव ॥४४॥ कः स्वित् ॥ कःस्विदेकाकीचरतिकऽउस्विज्जायतेपुनः ॥ कि
ꣳस्विद्धिमस्यभेषजङ्किम्म्वावपनम्महत् ॥४५॥ सूर्य्यऽएकाकी ॥ चरतिच
न्द्रमाजायतेपुनः ॥ अग्निर्हिमस्यभेषजम्भूमिरावपनम्महत् ॥४६॥ किꣳ
स्वित् ॥ किꣳस्वित्सूर्य्यसमञ्ज्योतिः किꣳसमुद्रसमꣳसरः ॥ किꣳस्वित्पृथि
व्यैवर्षीयः कस्यमात्रानविद्यते ॥४७॥ ब्रह्मसूर्य्यसमम् ॥ ब्रह्मसूर्य्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुञ्ज्योतिर्द्यौः समुद्रसमुꣳसरः॥ इन्द्रः पृथिव्यै वर्षीयान्गोस्तुमात्रान

विद्यते॥४८॥ पृच्छामित्वा॥ चितयेदेवसखयदित्वमत्रमनसाजगन्थ॥ ये
षुविष्णुस्त्रिषुपदेष्वेष्टस्तेषुविश्वम्भुवनमाविवेशा३॥४९॥ अपितेषु॥ त्रि
षुपदेष्वस्मियेषुविश्वम्भुवनमाविवेश॥ सद्यः पर्येमिपृथिवीमुतद्यामे-
केनाङ्गेनदिवोऽअस्यपृष्ठम्॥५०॥ केष्वन्तः॥ पुरुषऽआविवेशकान्यन्तः
पुरुषेऽअर्पितानि॥ एतद्ब्रह्मन्नुपवल्हामसित्वाकिꣳस्विन्नः प्रतिवोचा
स्यत्र॥५१॥ पञ्चस्वन्तः॥ पुरुषऽआविवेशतान्यन्तः पुरुषेऽअर्पितानि॥
एतत्त्वात्रप्रतिमन्वानोऽअस्मिनमाययाभवस्युत्तरोमत्॥५२॥ कास्वित्॥
कास्विदासीत्पूर्वचित्तिः किꣳस्विदासीद्बृहद्वयः॥ कास्विदासीत्पिलिप्पिला-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कास्विदासीत्पिशङ्गिला ॥५३॥ द्यौरासीत् ॥ द्यौरासीत्पूर्व्वचित्तिरश्वऽआसीद्बृहद्
वयः ॥ अविरासीत्पिलिप्पिला रात्रिरासीत्पिशङ्गिला ॥५४॥ काऽईम् ॥ काऽईमरेपिश
ङ्गिला काऽईङ्कुरुपिशङ्गिला ॥ कऽईमास्कन्दमर्षति कऽईम्पन्थां विसर्प्पति ॥५५॥
अजारे ॥ पिशङ्गिला श्वावित्कुरुपिशङ्गिला ॥ शशऽआस्कन्दमर्षत्यहिः पन्थां वि
सर्प्पति ॥५६॥ कत्यस्य ॥ विष्ठाः कत्यक्षराणि कति होमासः कतिधा समिद्धः ॥ य
ज्ञस्य त्वा विदथा पृच्छमत्र कति होतारऽऋतुशो यजन्ति ॥५७॥ षडस्य ॥ विष्ठाः शत
मक्षराण्यशीतिर्होमाः समिधो ह तिस्रः ॥ यज्ञस्य ते विदथा प्रब्रवीमि सप्त हो
तारऽऋतुशो यजन्ति ॥५८॥ कोऽअस्य ॥ वेद भुवनस्य नाभिङ्को द्यावापृथिवीऽअ
न्तरिक्षम् ॥ कः सूर्य्यस्य वेद बृहतो जनित्रङ्को वेद चन्द्रमसं यतोजाः ॥५९॥ वेदा

CC-0. In Public Domain. Digitization by eGangotri

संहि हम् ॥ वेदाहमस्यभुवनस्यनाभिंवेदद्यावापृथिवीऽअन्तरिक्षम् ॥ वेदसूर्य्यस्य उ.अ.
१९ बृहतोजनित्रमथोवेदचन्द्रमसंयतोजाः ॥६०॥ पृच्छामित्वा ॥ पृच्छामित्वापरम २३
न्तम्पृथिव्याःपृच्छामियत्रभुवनस्यनाभिः ॥ पृच्छामित्वावृष्णोऽअश्वस्यरेतः
पृच्छामिवाचःपरमंव्योम ॥६१॥ इयंवेदिः ॥ इयंवेदिःपरोऽअन्तःपृथिव्याऽ
अयंयज्ञोभुवनस्यनाभिः ॥ अयꣳसोमोवृष्णोऽअश्वस्यरेतोब्रह्मायं
वाचःपरमंव्योम ॥६२॥ सुभूःस्वयम्भूः ॥ प्रथमोन्तर्म्महत्यर्ण्णवे ॥ दधेहग
र्भमृत्वियंयतोजातःप्रजापतिः ॥६३॥ होतायक्षत् ॥ होतायक्षत्प्रजापतिꣳ
सोमस्यमहिम्नः ॥ जुषताम्पिबतुसोमꣳहोतर्य्यज ॥६४॥ प्रजापतेन ॥ त्वदे १९
तान्यन्योविश्वारूपाणिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोऽअस्तुव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यꣳस्यामुपर्तयोरयीणाम्॥६५॥ इतिश्रीवाजसनेयीसंहितायांदीर्घपाठेत्र-
योविंशोऽध्यायः॥२३॥ अश्वस्तूपुरः॥ अश्वस्तूपुरोगोमृगस्तेप्राजाप
त्याः कृष्णग्रीवऽआग्नेयोरराटेपुरस्तात्सारस्वतीमेष्ष्यधस्ताद्दन्वोराश्वि
नावधोरामोबाह्वोः सौमापौष्णः श्यामोनाभ्यांꣳसौर्ययामौश्वेतश्चकृ
ष्णश्चपार्श्वयोस्त्वाष्ट्रौलोमशसक्थौसक्थ्योर्वायव्यःश्वेतः पुच्छऽइन्द्रा
यस्वपस्यायवेहद्वैष्णवोवामनः॥१॥ रोरोहितोधूम्म्ररोहितः॥ कर्कन्धुरो
हितस्तेसौम्म्याबभ्रुररुणबभ्रुःशुकबभ्रुस्तेवारुणाः शितिरन्ध्रोन्यतः शिति
रन्ध्रः समन्तशितिरन्ध्रस्तेसावित्राः शितिबाहुरन्यतः शितिबाहुः समन्त-
शितिबाहुस्तेबार्हस्पत्याः पृषतीक्षुद्रपृषतीस्थूलपृषतीतामैत्रावरुण्यः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥२॥ शुद्धवालः सर्व्वशुद्धवालो मणिवालस्तऽ आश्विनाः श्येतः श्येताक्षोरुण
स्ते रुद्राय पशुपतये कर्ण्णा यामाऽ अवलिप्ता रौद्रा नभोरूपाः पार्ज्जन्याः ॥३॥
पृश्निस्तिरश्चीनपृश्निः ॥ पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः फल्गूर्लो
हितोर्णी पलक्षी ताः सारस्वत्यः प्लीहाकर्ण्णः शुण्ठाकर्ण्णोध्यालोहकर्ण्णस्ते
त्वाष्ट्राः कृष्णग्ग्रीवः शितिकक्षोञ्जिसक्थस्तऽ ऐन्द्राग्नाः कृष्णाञ्जिर-
ल्पाञ्जिर्महाञ्जिस्तऽ उषस्याः ॥४॥ शिल्पा वैश्वदेव्यः ॥ शिल्पा वैश्वदेव्यो
रोहिण्यस्त्र्यवयो वाचेविज्ञाताऽ अदित्यै सरूपा धात्रे वत्सतर्य्यो देवानाम्पत्नी-
भ्यः ॥५॥ कृष्णग्ग्रीवाऽ आग्नेयाः ॥ शितिभ्रवो वसूनाꣳ रोहिता रुद्राणाꣳ श्वे
ताऽ अवरोकिणऽ आदित्यानान्नभोरूपाः पार्ज्जन्याः ॥६॥ उन्नतऽ ऋषभः॥उ

CC-0. In Public Domain. Digitization by eGangotri

न्नुतऽऋषभोवामनस्तऽऐन्द्रावैष्णवाऽउन्नतः शितिबाहुः शितिपृष्ठस्तऽऐ
न्द्राबार्हस्पत्याः शुकरूपावाजिनाः कल्माषाऽआग्निमारुताः श्यामाः पौ
ष्णाः ॥७॥ एताऽऐन्द्राग्नाः ॥ एताऽऐन्द्राग्नाद्विरूपाऽअग्नीषोमीयावाम
नाऽअनड्वाहऽआग्नावैष्णवावशामैत्रावरुण्योन्यतऽएन्योमैत्र्यः ॥८॥ कृ
ष्णग्रीवाऽआग्नेयाः ॥ कृष्णग्रीवाऽआग्नेयाबभ्रवः सौम्याः श्वेतावाय
व्याऽअविज्ञाताऽअदित्यैसरूपाधात्रेवत्सतर्योदेवानाम्पत्नीभ्यः ॥९॥ कृष्णा
भौमाः ॥ कृष्णाभौमाधूम्राआन्तरिक्षाबृहन्तोदिव्याः शबलावैद्युताः
सिध्मास्तारकाः ॥१०॥ धूम्रान्वसन्ताय ॥ धूम्रान्वसन्तायालभतेश्वेता
न्ग्रीष्मायकृष्णान्वर्षाभ्योरुणाञ्छरदेपृषतोहेमन्तायपिशङ्गाञ्छिशिराय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥११॥ त्र्यवयो गायत्र्यै । पञ्चावयस्त्रिष्टुभे दित्यवाहो जगत्यै त्रिवत्सा ऽ अनुष्टुभे
तुर्य्यवाह ऽ उष्णिहे ॥१२॥ पष्ठवाहो विराजे ॥ पष्ठवाहो विराज ऽ उक्षाणो बृहत्-
त्या ऽ ऋषभाः ककुभेनड्वाहः पङ्क्त्यै धेनवोऽतिच्छन्दसे ॥१३॥ कृष्णग्रीवा ऽ आ
ग्नेयाः ॥ कृष्णग्रीवा ऽ आग्नेया बभ्रवः सौम्या ऽ उपध्वस्ताः सावित्रा वा
त्सतर्य्यः सारस्वत्यः श्यामाः पौष्णाः पृश्नयो मारुता बहुरूपा वैश्वदेवा-
वशा द्यावापृथिवीयाः ॥१४॥ उक्ताः सञ्चराः ॥ उक्ताः सञ्चरा ऽ एता ऽ ऐन्द्रा
ग्नाः कृष्णा वारुणाः पृश्नयो मारुताः कायास्तूपराः ॥१५॥ अग्नयेऽनीक
वते ॥ प्रथमजानालभते मरुद्भ्यः सान्तपनेभ्यः सवात्यान्मरुद्भ्यो गृहमेधिभ्यो २१
बष्किहान्मरुद्भ्यः क्रीडिभ्यः सꣳसृष्टान्मरुद्भ्यः स्वतवद्भ्योऽनुसृष्टान् ॥१६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उक्ताः सञ्चराः ॥ उक्ताः सञ्चरा एता ऐन्द्राग्नाः प्राशृङ्गा माहेन्द्रा बहुरूपा
वैश्वकर्म्मणाः ॥१७॥ धूम्राबभ्रुनीकाशाः ॥ पितृणाꣳ सोमवताम्बभ्रवो धू
म्रनीकाशाः पितृणांबर्हिषदाङ्कृष्णा बभ्रुनीकाशाः पितृणामग्निष्वात्ताना
ङ्कृष्णाः पृषन्तस्त्रैयम्बकाः ॥१८॥ उक्ताः सञ्चराः ॥ उक्ताः सञ्चरा एताः शुना
सीरीयाः श्वेता वायव्याः श्वेताः सौर्य्याः ॥१९॥ वसन्ताय कपिञ्जलान् ॥ वसन्ता
य कपिञ्जलानालभते ग्रीष्माय कलविङ्कान्वर्षाभ्यस्तित्तिरीञ्छरदे वर्त्तिका हेम
न्ताय ककराञ्छिशिराय विककरान् ॥२०॥ समुद्राय शिशुमारान् ॥ समुद्राय शि
शुमारानालभते पर्ज्जन्याय मण्डूकानद्भ्यो मत्स्यान्मित्राय कुलीपयान्वरुणा
य नाक्रान् ॥२१॥ सोमाय हꣳसान् ॥ सोमाय हꣳसानालभते वायवे बलाका

CC-0. In Public Domain. Digitization by eGangotri

संहि॰ इन्द्राग्निभ्यां कुञ्चान्मित्राय मद्गून्वरुणाय चक्रवाकान् ॥२२॥ अग्नये कुटरू- उ॰अ॰
२२ न् ॥ अग्नये कुटरूनालभते वनस्पतिभ्य उलूकानग्नीषोमाभ्यां चाषानश्वि- २४
भ्यां मयूरान्मित्रावरुणाभ्यां कपोतान् ॥२३॥ सोमाय लबान् ॥ सोमाय लबाना-
लभते त्वष्ट्रे कौलीकान्गोषादीर्देवानां पत्नीभ्यः कुलीका देवजामिभ्योऽग्नये
गृहपतये पारुष्णान् ॥२४॥ अह्ने पारावतान् ॥ अह्ने पारावतानालभते रात्र्यै
सीचापूरहोरात्रयोः सन्धिभ्यो जतूर्मासेभ्यो दात्यौहान्त्संवत्सराय महतः सु-
पर्णान् ॥२५॥ भूम्या आखून् ॥ भूम्या आखूनालभतेऽन्तरिक्षाय पाङ्क्त्रान्दि-
वे कशान्दिग्भ्यो नकुलान्बभ्रुकानवान्तरदिशाभ्यः ॥२६॥ वसुभ्य ऋश्यान् २२
॥ वसुभ्य ऋश्यानालभते रुद्रेभ्यो रुरूनादित्येभ्यो न्यङ्कून्विश्वेभ्यो देवे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्यः पृषतान्त्साध्येभ्यः कुलुङ्गान् ॥२७॥ ईशानाय परस्वतः ॥ ईशानाय परस्वतऽ-
आलभते मित्राय गौरान्वरुणाय महिषान्बृहस्पतये गवयाँस्त्वष्ट्रऽ उष्ट्रान् ॥२८
॥ प्रजापतये पुरुषान् ॥ प्रजापतये पुरुषान्हस्तिनऽ आलभते वाचे प्लुषीँश्चक्षुषे
मशकाञ्छ्रोत्राय भृङ्गाः ॥२९॥ शतम् ॥१४००॥ प्रजापतये च ॥ वायवे च गोमृगो
वरुणायारण्यो मेषो यमाय कृष्णो मनुष्यराजाय मर्कटः शार्दूलाय रोहिदृ
षभाय गवयी क्षिप्रश्येनाय वर्तिका नीलङ्गोः क्रिमिः समुद्राय शिशुमारो हिम
वते हस्ती ॥३०॥ मयुः प्राजापत्यः ॥ मयुः प्राजापत्यऽ ऊलो हलिक्ष्णो वृषद
ꣳशस्ते धात्रे दिशां कङ्को धुङ्क्षाग्नेयी कलविङ्को लोहिताहिः पुष्करसादस्ते त्वाष्ट्रा
वाचे क्रुञ्चः ॥३१॥ सोमाय कुलुङ्गः ॥ सोमाय कुलुङ्गऽ आरण्योजो नकुलः श

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कातेपौष्णाः क्रौञ्चामायोरिन्द्रस्यगौरमृगः पिद्वोन्यङ्कुः कक्कटस्तेनुमत्यैप्र
तिश्रुत्कायैचक्रवाकः ॥३२॥ सौरीबलाका ॥ शार्गः सृजयः शयाण्डकस्तेमै
त्राः सरस्वत्यैशारिः पुरुषवाक्श्वाविद्भौमीशार्दूलोवृकः पृदाकुस्तेमन्यवेस
रस्वतेशुकः पुरुषवाक् ॥३३॥ सुपर्णः पार्जन्यः ॥ सुपर्णः पार्जन्यऽआति-
र्वाहसोदर्विदातेवायवेबृहस्पतयेवाचस्पतयेपैङ्गराजोलजऽआन्तरिक्षः
प्लवोमद्गुर्मत्स्यस्तेनदीपतयेद्यावापृथिवीयः कूर्मः ॥३४॥ पुरुषमृगश्चन्द्रम
सः ॥ पुरुषमृगश्चन्द्रमसोगोधाकालकादार्वाघाटस्तेवनस्पतीनाङ्कृकवाकुः सा
वित्रोहंसोवातस्यनाक्रोमकरः कुलीपयस्तेकूपारस्यह्रियैशल्यकः ॥३५॥
एण्यह्नः ॥ एण्यह्नोमण्डूकोमूषिकातित्तिरिस्तेसर्पाणांलोपाशऽआ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्विनः कृष्णो रात्र्या ऋक्षो जतूः सुषिलीका त इतरजनानाञ्जहका वैष्णवी
॥३६॥ अन्यवापोऽर्द्धमासानाम् ॥ अन्यवापोऽर्द्धमासानामृश्यो मयूरः सुपर्णस्ते
गन्धर्वाणामपामुद्रो मासाङ्कश्यपो रोहित्कुण्डृणाची गोलत्तिका तेऽप्सरसां मृ
त्यवेऽसितः ॥३७॥ वर्षाहूर्ऋतूनाम् ॥ वर्षाहूर्ऋतूनामाखुः कशो मान्थालस्ते पितृ
णां बलायाजगरो वसूनाङ्कपिञ्जलः कपोत उलूकः शशस्ते निर्ऋत्यै वरुणायार-
ण्यो मेषः ॥३८॥ श्वित्र आदित्यानाम् ॥ श्वित्र आदित्यानामुष्ट्रो घृणीवान्वार्ध्रीन
सस्ते मत्या अरण्याय सृमरो रुरू रौद्रः क्वयिः कुटरुर्दात्यौहस्ते वाजिनाङ्कामा
य पिकः ॥३९॥ खड्गो वैश्वदेवः ॥ श्वा कृष्णः कर्णो गर्दभस्तरक्षुस्ते रक्षसामि-
न्द्राय सूकरः सिꣳहो मारुतः कृकलासः पिप्पका शकुनिस्ते शरव्यायै विश्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सं.हि. षान्देवानाम्पृषतः ॥ ४० ॥ इतिश्रीवाजसनेयसंहितायांदीर्घपाठेचतुर्विंशोऽध्या उ.अ.

२४ यः ॥२४॥ ओम् ॥ शादन्दुद्भिः ॥ शादन्दुद्भिरवकान्दन्तमूलैर्मृदम्बर्स्वैस्ते २५

गान्दꣳष्ट्राभ्याꣳसरस्वत्याऽअग्रजिह्वञ्जिह्वायाऽउत्सादमवक्रन्देनतालुवा

जꣳहनुभ्यामपऽआस्येनवृषणमाण्डाभ्यामादित्याꣳश्मश्रुभिः पन्थानम्भ्रू

भ्यान्द्यावापृथिवीवर्त्तोभ्याम्विद्युतङ्कनीनकाभ्याꣳशुक्लायस्वाहाकृष्णाय

स्वाहापार्य्याणिपक्ष्माण्यवार्याऽइक्षवोवार्य्याणिपक्ष्माणिपार्य्याऽइक्ष

वः ॥१॥ वातम्प्राणेन ॥ वातम्प्राणेनापानेननासिकेऽउपयाममधरेणौष्ठेनस

दुत्तरेणप्प्रकाशेनान्तरमनूकाशेनवाह्यन्निवेष्यम्मूर्ध्नास्तनयित्नुन्निर्बाधे- २४

नाशनिम्मस्तिष्केणविद्युतङ्कनीनकाभ्याङ्कर्णाभ्याꣳश्रोत्रꣳश्रोत्राभ्याङ्कर्णौ

तेद॒नीम॑धरकण्ठेना॒पः॒ शु॒ष्ककण्ठेन चि॒तम्मन्या॑भि॒रदि॑तिꣳ शी॒र्ष्णा निर्ऋ॑
ति॒न्निर्ज॑र्जल्पेन शी॒र्ष्णा सं॑क्रो॒शैः॒ प्रा॒णान्रे॒ष्माण॑ꣳ स्तु॒पेन॑ ॥ २ ॥ म॒शका॒
न्केशै॑ ॥ म॒शका॒न्केशै॒रिन्द्र॒ꣳ स्वप॑सा॒ वहे॑न बृह॒स्पति॑ꣳ शकुनिसा॒देन॑ कू॒र्मा॒
ञ्छ॒फैरा॒क्रम॑णꣳ स्थू॒राभ्या॑मृ॒क्षला॑भिः क॒पिञ्ज॑ला॒ञ्ज॒वञ्जङ्घा॑भ्या॒मध्वा॑नम्बा॒-
हुभ्या॒ञ्जाम्बी॑लेनार॑ण्यम॒ग्निम॑ति॒रुग्भ्या॑म्पू॒षण॑न्दो॒र्भ्याम॒श्विना॒वꣳसा॑भ्या॒
ꣳ रु॒द्रꣳ रोरा॑भ्याम् ॥ ३ ॥ अ॒ग्नेः प॑क्ष॒तिः ॥ अ॒ग्नेः प॑क्ष॒तिर्वा॒योर्निप॑क्षति॒रिन्द्र॑
स्य तृ॒तीया॒ सोम॑स्य चतु॒र्थ्यदि॑त्यै पञ्च॒मीन्द्रा॒ण्यै ष॒ष्ठी म॒रुता॑ꣳ सप्त॒मी बृह॒स्पते॑र
ष्ट॒म्य॑र्य॒म्णो न॑व॒मी धा॒तुर्द॑श॒मीन्द्र॑स्यैकाद॒शी वरु॑णस्य द्वाद॒शी य॒मस्य॑ त्रयो॒
द॒शी ॥ ४ ॥ इ॒न्द्रा॒ग्न्योः प॑क्ष॒तिः ॥ सर॑स्वत्यै॒ निप॑क्षतिर्मि॒त्रस्य॑ तृ॒तीया॒पाञ्च॑तु॒र्थी

CC-0. In Public Domain. Digitization by eGangotri

संहि॰ निर्ऋत्यैपञ्चम्यग्नीषोमयोः षष्ठीसर्प्पाणाꣳ सप्तमीविष्णोरष्टमीपूष्णोन उ.अ.
२५ वमीत्वष्टुर्द्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यमस्यैत्रयोदशी द्यावापृथिव्यो २५
र्द्दक्षिणम्पार्श्वँविश्वेषान्देवानामुत्तरम् ॥५॥ मरुताꣳ स्कन्धाऽ ॥ मरुताꣳ स्क
न्धाविश्वेषान्देवानाम्प्रथमाकीकसारुद्राणान्द्वितीयादित्यानान्तृतीयावायोःपुच्छ
मग्नीषोमयोर्ब्भासदौक्रुञ्चौश्श्रोणिभ्यामिन्द्राबृहस्पतीऽऊरुभ्याम्मित्रावरुणावल्गा ता
भ्यामाक्रमणꣳ स्थूराभ्याम्बलङ्कुष्ठाभ्याम् ॥६॥ पूषणंवनिष्ठुनान्धाहीन्त्स्थूलगुद
यासर्प्पान्गुदाभिर्विह्रुतऽआन्त्रैरपोवस्तिनावृषणमाण्डाभ्यांवाजिनꣳ शेपेन
प्रजाꣳ रेतसाचाषान्पित्तेनप्रदरान्पायुनाकूश्माञ्छकपिण्डैःऽ ॥७॥ इन्द्रस्य- २५
क्रोडःऽ ॥ इन्द्रस्य क्रोडोऽदित्यैपाजस्यन्दिशाञ्जत्रवोऽदित्यैभसज्जीमूतान्हृदयौ

पूषणं वनिष्ठुना॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पृष्ठेनान्तरिक्षम्पुरीततानभऽ उदर्य्येण चक्रवाकौ मतस्नाभ्यान्दिवं वृक्काभ्यां गि
रीन्प्लाशिभिरुपलान्प्लीह्ना वल्मीकान्क्लोमभिर्ग्लौभिर्गुल्मान्हिराभिः स्र
वन्तीर्ह्रदान्कुक्षिभ्याꣳ समुद्रमुदरेण वैश्वानरम्भस्मना ॥८॥ विधृतिन्नाभ्या
॥ घृतꣳ रसेनापो यूष्णा मरीचीर्विप्रुड्भिर्नीहारमूष्मणा शीनं वसया प्रुष्वाऽ
अश्रुभिर्ह्रादुनीर्दूषीकाभिरस्नारक्षाꣳसि चित्राण्यङ्गैर्नक्षत्राणि रूपेण पृथि
वीन्त्वचा जुम्बकाय स्वाहा ॥९॥ हिरण्यगर्भः सम् ॥ हिरण्यगर्भः समवर्तताग्रे
भूतस्य जातः पतिरेकऽ आसीत् ॥ स दाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हवि
षा विधेम ॥१०॥ यः प्राणतः ॥ यः प्राणतो निमिषतो महित्वैकऽ इद्राजा जगतो
बभूव ॥ यऽ ईशेऽ अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥११॥ य

संहि स्येमे ॥ हिमवन्तोमहित्वायस्यसमुद्रꣳरसयासहाहुः । यस्येमाःप्रदिशोयस्य उ॰अ॰
२६ बाहूकस्मैदेवायहविषाविधेम ॥१२॥ यऽआत्मदाः ॥ यऽआत्मदाबलदाय २५
स्यविश्वऽउपासतेप्रशिषंयस्यदेवाः ॥ यस्यच्छायामृतंयस्यमृत्युः कस्मैदे
वायहविषाविधेम ॥१३॥ आनः ॥ आनोभद्राःक्रतवोयन्तुविश्वतोदब्धासोऽअ
परीतासऽउद्भिदः ॥ देवानोयथासदमिद्वृधेऽअसन्नप्रायुवोरक्षितारोदिवेदिवे ॥
॥१४॥ देवानाम्भद्रा ॥ सुमतिर्ऋजूयतान्देवानाꣳ रातिरभिनोनिवर्त्तताम् ॥ देवाना
ꣳ सख्यमुपसेदिमावयन्देवानऽआयुःप्रतिरन्तुजीवसे ॥१५॥ तान्पूर्वयानि
विदाहूमहेवयम्भगम्मित्रमदितिन्दक्षमस्रिधम् ॥ अर्यमणंवरुणꣳसोममश्वि- २६
नासरस्वतीनःसुभगामयस्करत् ॥१६॥ तन्नः ॥ तन्नोवातोमयोभुवातुभेषजन्त

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्माता पृथिवी तत्पिता द्यौः॒ ॥ तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुत

न्धिष्ण्यायुवम् ॥१७॥ तमीशानम् ॥ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्व

मवसे हूमहे वयम् ॥ पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥१८॥

स्वस्ति नः ॥ स्वस्ति नऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ॥ स्वस्ति नस्ता

र्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥१९॥ पृषदश्वा मरुतः ॥ पृषदश्वा

मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः ॥ अग्निजिह्वा मनवः सूरच

क्षसो विश्वे नो देवाऽअवसागमन्निह ॥२०॥ भद्रङ्कर्णेभिः शृणुयाम देवा भद्र-

म्पश्येमाक्षभिर्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं

यदायुः ॥२१॥ शतमित् ॥ शतमिन्नु शरदोऽअन्ति देवा यत्रा नश्चक्रा जरसन्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अदितिद्यौः

संहि नूनाम् ॥ पुत्रासोयत्रपितरोभवन्तिमानोमुध्यारीरिषतायुर्गन्तोः ॥२२॥ अदिति उ.अ.
२७ द्यौरदितिरन्तरिक्षमदितिर्मातासपितासपुत्रः ॥ विश्वेदेवा ऽ अदितिः पञ्च २५
जना ऽ अदितिर्जातमदितिर्जनित्वम् ॥२३॥ मानः ॥ मानोमित्रोवरुणो ऽ अर्य
मायुरिन्द्र ऽ ऋभुक्षामरुतः परिख्यन् ॥ यद्वाजिनोदेवजातस्यसप्तेः प्रवक्ष्या
मोविदथेवीर्याणि ॥२४॥ यन्निर्णिजा ॥ यन्निर्णिजारेक्णसाप्रावृतस्यरातिङ्गृ
भीतांमुखतोनयन्ति ॥ सुप्राङजोमेम्यद्विश्वरूप ऽ इन्द्रापूष्णोः प्रियम-
प्येतिपाथः ॥२५॥ एषच्छागः ॥ पुरो ऽ अश्वेनवाजिनापूष्णोभागोनीयतेवि
श्वदेव्यः ॥ अभिप्रियंयत्पुरोडाशमर्वतात्वष्टेदेनं सौश्रवसायजिन्वति ॥ २७
॥२६॥ यद्धविष्यम् ॥ यद्धविष्यमृतुशोदेवयानन्त्रिर्मानुषाः पर्यश्वन्नयन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अत्त्रा पूष्णः प्प्रथमो भागऽ एति यज्ञन्देवेब्भ्यः प्प्रतिवेदयन्नजः॥२७॥ होता
ध्वर्युः॥ होताद्ध्वर्युरावयाऽ अग्निमिन्धो ग्ग्रावग्ग्राभऽ उत शꣳस्ता सुविप्प्रः॥ ते
न यज्ञेन स्वरङ्कृतेन स्विष्टेन वक्षणाऽ आपृणद्ध्वम्॥२८॥ यूपव्व्रस्काऽ उत॥ ये यू
पवाहाश्च्चषालँय्येऽ अश्वयूपाय तक्षति॥ ये चार्व्वते पचनꣳ सम्भरन्त्युतो तेषाम
भिगूर्त्तिर्न्नऽ इन्वतु॥२९॥ उप प्र॥ उप प्प्रागात्सुमन्न्मेधायि मन्न्म देवानामाशाऽ
ऽ उप वीतपृष्ठः॥ अन्वेनं विप्प्राऽ ऋषयो मदन्ति देवानाम्पुष्टे चकृमा सुवन्धुम् ३०
यद्वाजिनः॥ यद्वाजिनो दाम सन्दानमर्व्वतो या शीर्षण्या रशना रज्जुरस्य॥ य-
द्वा घास्य प्प्रभृतमास्ये तृणꣳ सर्व्वा ता तेऽ अपि देवेष्वस्तु॥३१॥ यदश्वस्य क्र
विषो म॥ क्षिका श यद्वा स्वरौ स्वधितौ रिप्तमस्ति॥ यद्धस्तयोः शमितुर्य्यन्नखेषु स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संहि॰ र्वातातेऽअपिदेवेष्वस्तु ॥३२॥ यदूवध्यम् ॥ यदूवध्यमुदरस्यापवाति यऽआम उ॰अ॰
२८ स्यक्रविषोगन्धोऽअस्ति ॥ सुकृतातच्छमितारः कृण्वन्तूतमेधꣳशृतपाकम्प २५
चन्तु ॥३३॥ यत्ते ॥ यत्तेगात्रादग्निनापच्यमानादभिशूलन्निहतस्यावधावति
॥ मातद्भूम्यामाश्रिषन्मातृणेषुदेवेभ्यस्तदुशद्भ्योरातमस्तु ॥३४॥ येवाजिन
म् ॥ येवाजिनम्परिपश्यन्तिपक्वंयऽईमाहुःसुरभिर्निर्हरेति ॥ येचार्वतोमा
ꣳसभिक्षामुपासतऽउतोतेषामभिगूर्तिर्नऽइन्वतु ॥३५॥ यन्नीक्षणम् ॥ य
न्नीक्षणम्माꣳस्पचन्न्याऽउखायायापात्राणियूष्णऽआसेचनानि ॥ ऊष्म
ण्यापिधानाचरूणामङ्काःसूनाःपरिभूषन्त्यश्वम् ॥३६॥ मात्वा ॥ मात्वा- २८
ग्निर्ध्वनयीद्धूमगन्धिर्मोखाभ्राजन्त्यभिविक्तजघ्रिः ॥ इष्टंवीतमभिगूर्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घर्षद्द तुन्तन्देवासः प्रतिगृह्णान्त्यश्वम्॥३७॥ निक्रमणान्निषदनम्॥ निक्र
मणन्निषदनं यद्विवर्तनं यश्च पड्वीशमर्वतः॥ यच्चपपौ यच्च घासिञ्जघासु सर्वाता
तेऽअपिदेवेष्वस्तु॥३८॥ यदश्वाय॥ यदश्वायुवासऽउपस्तृणन्त्यधीवासं-
ग्या हिरण्यान्यस्मै॥ सुन्दानुमर्वन्तम्पड्वीशम्प्रिया देवेष्वायामयन्ति॥३९॥ यत्ते
त्ते॥ सादेमहसाशूकृतस्यपाष्ण्र्या वाकशयावातुतोद॥ सुचेवताहविषोऽअध्व
रेषुसर्वातातेब्रह्मणासूदयामि॥४०॥ चतुस्त्रिंशः शद्वाजिनः॥ चतुस्त्रिंश शद्वाजि
नोदेवबन्धोर्वङ्क्रीरश्वस्युस्वाधितिःसमेति॥ अच्छिद्रागात्रावयुनाकृणोतपरुष्प
रुरनुघुष्याविशस्त॥४१॥ एकस्त्वष्टुः॥ एकस्त्वष्टुरश्वस्याविशस्ताद्वायन्तारा
भवतस्तथऽऋतुः॥ यातेगात्राणामृतुथाकृणोमितातापिण्डानाम्प्रजुहोम्यग्नौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥४२॥ माल्लोतयद्बिय्यऽआल्माप्पियन्तम्मास्वधीति स्तन्न्वऽआतिष्ठिपत्ते ॥
मातेगृध्धुरंविद्वास्ता तिहायोछिद्रागाम्भोण्यसिन्नामिथूकः ॥४३॥ नवौ ॥नवाऽउँऽ
एतन्मिन्नेयसेनरिब्ध्यसिदेवा ३॥ इदैविपृथिभिः सुगेभिः ॥हरीति सुञ्ज्ञापृषतीऽ
अभूतामुपास्थाद्वाजीधुरिरासंभस्य ॥४४॥सुगव्ह्येन्नः ॥सुगव्येन्नोवाजीस्व
श्व्यंम्पुठंसः३ पुत्रा ३॥उतविश्वापुषंठरयिम् ॥अनागास्त्वन्नोऽअदितिः कृणो
तुक्षत्रन्नोऽअश्वोवनताळंहविष्मान् ॥४५॥ इमानु ॥कम्भुवनासीषधामेन्द्र
श्चविश्वेचदेवाः३ ॥आदित्यैरिन्द्रः सगणोमरुद्भिरस्मब्ध्यम्भेषुजाकरत् ॥युज्ञ
ञ्चनस्तन्न्वञ्च प्रजाञ्चादित्यैरिन्द्रः सहसीषधाति ॥४६॥अग्नेत्वन्नोऽअन्त ॥
मऽउतत्राताशिवोभवावरुत्थ्यः॥वसुरग्निर्वसुश्रवाऽअच्छानाक्षिद्युमत्तमंठं २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रयिन्दाः ॥ तन्त्वाशोचिष्ठदीदिवः सुम्नायनूनमीमहेसखिब्भ्यः ॥४७॥ इतिसंहि
तायांपंचविंशोऽध्यायः ॥२५॥ अग्निश्च ॥ पृथिवीचसन्नतेतेमेसन्नमतामदो
वायुश्चान्तरिक्षञ्चसन्नतेतेमेसन्नमतामदऽआदित्यश्चद्यौश्चसन्नतेतेमेसन्नमता
मदऽआपश्चवरुणश्चसन्नतेतेमेसन्नमतामदः ॥ सप्तसर्ठ॒ंसदोऽअष्टमीभूतसा
धनी ॥ सकामाँ२ ॥ऽ अद्ध्वनस्कुरुसञ्ज्ञानमस्तुमेमुना ॥१॥ यथेमाम् ॥ यथेमांवाच
ङ्कल्ल्याणीमावदानिजनेब्भ्यः ॥ ब्रह्मराजन्याब्भ्याᳬ शूद्रायचार्य्यायचस्वायचा
रणायच ॥ प्रियोदेवानान्दक्षिणायैदातुरिहभूयासमयम्मेकामः समृद्ध्यतामुप
मादोनमतु ॥२॥ बृहस्पतेऽअति ॥ बृहस्पतेऽअतियदर्य्योऽअर्हाद्युमद्विभाति-
क्रतुमज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्प्रजाततदस्म्मासुद्रविणन्धेहिचित्रम् ॥उ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संहि॰ पयामगृहीतोसिबृहस्पतयेत्वैषतेयोनिर्बृहस्पतयेत्वा ॥३॥ इन्द्रगोमन् ॥ इन्द्र- उ॰अ॰
३० गोमन्निहायाहिपिबासोमꣳशतक्रतो । विद्यद्भिर्ग्रावभिः सुतम् ॥ उपयामगृही- २६
तोसीन्द्रायत्वागोमतऽएषतेयोनिरिन्द्रायत्वागोमते ॥४॥ इन्द्रायाहि ॥ इन्द्रायाहि
वृत्रहन्पिबासोमꣳशतक्रतो ॥ गोमद्भिर्ग्रावभिः सुतम् ॥ उपयामगृहीतोसीन्द्राय
त्वागोमतऽएषतेयोनिरिन्द्रायत्वागोमते ॥५॥ ऋतावानंवैश्वानरम् ॥ ऋतावानंवै
श्वानरमृतस्यज्योतिषस्पतिम् ॥ अजस्रङ्घर्म्ममीमहे ॥ उपयामगृहीतोसिवैश्वा
नरायत्वैषतेयोनिर्वैश्वानरायत्वा ॥६॥ वैश्वानरस्यसुमतौ ॥ स्यामराजाहिकं
भुवनानामभिश्रीः । इतोजातोविश्वमिदंविचष्टेवैश्वानरोयतते सूर्य्येण ॥ ३०
उपयामगृहीतोसिवैश्वानरायत्वैषतेयोनिर्वैश्वानरायत्वा ॥७॥ वैश्वानरोनः ॥

वैश्वानरोनऽ ऊतयऽ आप्रयातुपरावतः ॥ अग्निरुक्थेनवाहसा ॥ उपयाम
गृहीतोसिवैश्वानरायत्वैषतेयोनिर्वैश्वानरायत्वा ॥८॥ अग्निर्ऋषिः ॥ अग्नि
र्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः ॥ तमीमहेमहागयम् ॥ उपयामगृही
तोस्यग्नयेत्वावर्च्चसऽ एषतेयोनिरग्नयेत्वावर्च्चसे ॥९॥ महा २॥ऽ इन्द्रः
॥ महाँ २॥ऽ इन्द्रोवज्रहस्तः षोडशीशर्म्मयच्छतु ॥ हन्तुपाप्मानंयोस्मा
न्द्वेष्टि ॥ उपयामगृहीतोसिमहेन्द्रायत्वैषतेयोनिर्म्महेन्द्रायत्वा ॥१०॥ तंवः ॥
तंवोदस्ममृतीषहंवसोर्म्मन्दानमन्धसः ॥ अभिवत्सन्नस्वसरेषुधेनवऽ इन्द्र
ङ्गीर्भिर्न्नवामहे ॥११॥ यद्वाहिष्ठम् ॥ यद्वाहिष्ठन्तदग्नयेबृहदर्च्चविभावसो ॥
महिषीवत्वद्रयिस्त्वद्वाजाऽ उदीरते ॥१२॥ एहि ॥ एह्यूषुब्रवाणितेग्नऽ इत्थेतरा

संहि॰ गिरः॥ एभिर्वर्द्धासऽ इन्दुभिः॥१३॥ ऋतवस्ते॥ ऋतवस्तेयज्ञंवितन्वन्तुमासा उ॰अ॰
३१ रक्षन्तुतेहविः॥ संवत्सरस्तेयज्ञन्दधातुनः प्रजाञ्चपरिपातुनः॥१४॥ उपह्वु २६
रेगिरीणाम्॥ उपह्वरेगिरीणाᳫंसङ्गमेचनदीनाम्॥ धियाविप्रोऽअजाय
त॥१५॥ उच्चाते॥ उच्चातेजातमन्धसोदिविसद्भूम्म्याददे॥ उग्रᳫंशर्म्ममहि
श्रवः॥१६॥ सनः॥ सनऽ इन्द्राययज्यवेवरुणायमरुद्भ्यः॥ वरिवोवि-
त्परिस्रव॥१७॥ एनाविश्वानि॥ एनाविश्वान्यर्य्यऽ आद्युम्नानिमानुषा-
णाम्॥ सिषासन्तोवनामहे॥१८॥ अनुवीरैः॥ अनुवीरैरनुपुष्यास्मगोभि
रन्वश्वैरनुसर्वेणपुष्टैः॥ अनुद्विपदानुचतुष्पदावयन्देवानोयज्ञमृतुथानय ३१
न्तु॥१९॥ अग्नेपत्नीः॥ अग्नेपत्नीरिहावहदेवानामुशतीरुप॥ त्वष्टारᳫंसो

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मेपीतये ॥२०॥ अभियज्ञम् ॥ अभियज्ञङ्गृणीहिनो ग्ग्नावोनेष्टः पिबऽऋतुना ॥ त्व
ठं हिरत्नधाऽअसि ॥२१॥ द्रविणोदाः पिपीषति । जुहोतप्रचतिष्ठत ॥ नेष्ट्रादृतु
भिरिष्यत ॥२२॥ तवायम् ॥ तवायठं सोमस्त्वमेह्यर्वाङ् शश्वत्तमठं सुमनाऽ
अस्यपाहि ॥ अस्मिन्यज्ञेबर्हिष्ष्यानिषद्यादधिष्ष्वेमञ्जठरऽ इन्दुमिन्द्र ॥२३
अमेवनः ॥ अमेवनः सुहवाऽ आहिगन्तनुनिबर्हिषिसदतनारणिष्टन ॥ अथा
मन्दस्वजुजुषाणोऽ अन्धसस्त्वष्टर्देवेभिर्ज्जनिभिः सुमद्गणः ॥२४॥ स्वादिष्ठया
मदिष्ठया ॥ स्वादिष्ठयामदिष्ठयापवस्वसोमधारया ॥ इन्द्रायपातवेसुतः ॥२५॥ र
क्षोहाविश्वचर्षणिरभियोनिमयोहते ॥ द्रोणेसधस्थमासदत् ॥२६॥ इतिसंहिता
यांषड्विंशतिमोऽध्यायः ॥२६॥ समास्त्वा ॥ समास्त्वाग्गनऽऋतवोवर्द्धयन्तु संवत्स

घर्च

संहि॰ राऽऋषयोयानिसत्त्या॥ सन्दिव्येनदीदिहिरोचनेनविश्श्वाऽआभाहिप्प्रदिशश्च उ.अ.
३२ तस्रः॥१॥ सञ्चेध्यस्वाग्नेप्प्रचबोधयैनमुच्चतिष्ठमहतेसौभगाय॥माचरिषदुपस २७
त्तातेऽअग्नेब्ब्रह्माणस्तेयशसःसन्तुमान्न्ये॥२॥ त्वामग्ने॥ त्वामग्नेवृणतेब्ब्रा
ह्मणाऽइमेशिवोऽअग्नेसंवरणेभवानः॥सपत्नहानोऽअभिमातिजिच्चस्स्वेगये
जागृह्यप्प्रयुच्छन्॥३॥ इहैव॥ इहैवाग्नेऽअधिधारयारयिम्मात्वानिक्क्रन्पूर्वचितो
निकारिणः॥क्षत्रमग्नेसुयममस्तुतुब्भ्यमुपसत्तावर्द्धतान्तेऽअनिष्टृतः॥४॥ क्षत्रे
णाग्ने॥ क्षत्रेणाग्नेस्वायुःसꣳरभस्वमित्रेणाग्नेमित्त्रधेयेयतस्व॥सजातानाम्मद्ध्य
मस्थाऽएधिराज्ञामग्नेविहव्योदीदिहीह॥५॥ अतिनिहः॥ अतिनिहोऽअतिस्रि ३२
धोत्त्यचित्तिमत्त्यरातिमग्ने॥ विश्श्वाह्यग्नेदुरितासहस्वाथास्म्मब्भ्यꣳसहवीराꣳरयिं

न्द्रोः ॥६॥ अनाधृष्ष्योजातवेदाः ॥ अनाधृष्ष्योजातवेदाऽ अनिष्टृतोविराडे-
ग्नेक्षत्रभृद्दीदिहीह ॥ विश्श्वाऽआशाः प्रमुञ्चन्मानुषीर्भियः शिवेभिरद्यप
रिपाहिनोवृधे ॥७॥ बृहस्पतेसवितः ॥ बृहस्पतेसवितर्बोधयैनꣳ सꣳशित
श्चित्सन्तराꣳ सꣳशिशाधि ॥ वर्द्धयैनम्महतेसौभगायविश्श्वऽएनमनुमदन्तु
देवाः ॥८॥ अमुत्रभूयादध ॥ अमुत्रभूयादधयद्यमस्यबृहस्पतेऽअभिश-
स्तेरमुञ्चः ॥ प्रत्यौहतामश्विनामृत्युमस्माद्देवानामग्नेभिषजाशचीभिः ॥९
उद्वयम् ॥ उद्वयन्तमसस्परिस्वः पश्यन्तऽउत्तरम् ॥ देवन्देवत्रासूर्य्यमगन्म
ज्योतिरुत्तमम् ॥१०॥ ऊर्ध्वाऽअस्यसमिधोभवन्त्यूर्ध्वाशुक्राशोचीꣳष्यग्नेः
॥ द्युमत्तमासुप्रतीकस्यसूनोः ॥११॥ तनूनपादसुरः ॥ तनूनपादसुरोविश्श्व

CC-0. In Public Domain. Digitization by eGangotri

 वेदादेवोदेवेषुदेवः॥ पथोऽअनक्तु मध्वा घृतेन ॥१२॥ मध्वायज्ञम्॥ मध्वायज्ञन्न
 क्षसेप्रीणानोनराशꣳसोऽअग्ने॥ सुकृद्देवः सविताविश्ववारः ॥१३॥ अच्छाय
मू॥ अच्छायमेति। शवसाघृतेनेडानोवह्निर्नमसा॥ अग्निꣳस्रुचोऽअध्वरेषुप्र
यत्सु ॥१४॥ सयक्षत्॥ सयक्षदस्यमहिमानमग्नेः सऽईम्मन्द्रासुप्रयसः॥
वसुश्चेतिष्ठोवसुधातमश्च ॥१५॥ द्वारोदेवीः॥ द्वारोदेवीरन्वस्यविश्वेव्रतादद
न्तेऽअग्नेः॥ उरुव्यचसोधाम्नापत्यमानाः ॥१६॥ तेऽअस्य॥ तेऽअस्ययोषणेदिव्ये
नयोनाऽउषासानक्ता॥ इमंयज्ञमवतामध्वरन्नः ॥१७॥ दैव्याहोतारा॥ ऽऊर्ध्वम
ध्वरन्नोऽग्नेर्जिह्वामभिगृणीतम्॥ कृणुतन्नः स्विष्टिम् ॥१८॥ तिस्रोदेवीः॥ तिस्रो
देवीर्बर्हिरेदꣳसदन्त्विडासरस्वतीभारती॥ महीगृणाना ॥१९॥ तन्नः॥ तन्नस्तुरी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रमंद्भुतम्पुरुक्षुन्त्वष्टासुवीर्य्यम् ॥ रायस्प्पोषंविष्ष्यतुनाभिमुस्म्मे ॥२०॥ व
नेस्प्पतेवंसृजाररांणस्त्मनादेवेषु ॥ अग्निर्हुव्यंशमितासूदयाति ॥२१॥ अग्ने
स्वाहां ॥ कृणुहिजातवेदऽ इन्द्रायहुव्यम् ॥ विश्श्वेदेवाहुविरिदंजुषन्ताम् ॥२२॥
पीवोऽअन्नारयिवृधः ॥ सुमेधाः श्वेतः सिषक्तिनियुतामभिश्श्रीः ॥ तेवायवेस
मनसोवितस्त्थुर्विश्श्वेन्नरः स्वपत्यानिचक्रुः ॥२३॥ रायेनु ॥ यञ्जज्ञतुरोदसीमे
रायेदेवीधिषणाधातिदेवम् ॥ अधवायुन्नियुतः सश्श्चतस्वाऽउतश्श्वेतंवसुधि-
तिन्निरेके ॥२४॥ आपोह ॥ आपोहयद्वृहतीर्विश्श्वमायन्गर्भन्दधानाजनयन्ती
रग्निम् ॥ ततोदेवानांसमवर्त्ततासुरेकः कस्म्मैदेवायहविषाविधेम ॥२५॥
यश्श्चित् ॥ यश्श्चिदापोमहिनापर्य्यपश्श्यद्दक्षन्दधानाजनयन्तीर्य्यज्ञम् ॥ योदेवे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ब्ध्यधिदेवऽएकऽआसीत्कस्मैदेवायहविषाविधेम ॥२६॥ प्रयाभिः ॥ प्रयाभि
 र्य्यासिदाश्वाꣳसमच्छानियुद्भिर्व्वायविष्टयेदुरोणे ॥ निनोरयिꣳसुभोजसंय्यु
वस्वनिवीरङ्गव्यमश्व्यंच्चराधः ॥२७॥ आनः ॥ आनोनियुद्भिः शतिनीभिरद्ध्व
रꣳसहस्रिणीभिरुपयाहियज्ञम् ॥ वायोऽअस्मिन्त्सवनेमादयस्वयूयम्पात
स्वस्तिभिःसदानः ॥२८॥ नियुत्वान्वायो ॥ नियुत्वान्वायवागह्ययꣳशुक्रोऽ
अयामिते ॥ गन्तासिसुन्न्वतोगृहम् ॥२९॥ वायोशुक्रः ॥ वायोशुक्रोऽअयामि
तेमध्वोऽअग्रन्दिविष्टिषु ॥ आयाहिसोमपीतयेस्पार्हो देवनियुत्वता ॥३०॥ वा
युरग्रेगाः ॥ वायुरग्रेगायज्ञप्रीः साकङ्गन्मनसायज्ञम् ॥ शिवोनियुद्भिः शि
वाभिः ॥३१॥ वायोये ॥ तेसहस्रिणोरथासस्तेभिरागहि ॥ नियुत्वान्त्सोमपीत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ये ॥ ३२ ॥ एकयाच ॥ दशभिश्चस्वभूते द्वाभ्यामिष्टये विंठं·शतीच ॥ तिसृभिश्चवहे
सत्रिंठं·शताचनियुद्भिर्वायविहताविमुञ्च ॥ ३३ ॥ तववायो ॥ तववायवृतस्प -
तेत्वष्टुर्जामातरद्भुत ॥ अवाठंस्यावृणीमहे ॥ ३४ ॥ अभित्वा ॥ शूरनोनुमोदु -
ग्धाऽ इवधेनवः ॥ ईशानमस्यजगतः स्वर्दृशमीशानमिन्द्रतस्थुषः ॥ ३५ ॥ न
त्वावान् ॥ नत्वावाँ २॥ऽ अन्योदिव्योनपार्थिवोनजातोनजनिष्यते ॥ अश्वा
यन्तोमघवन्निंद्र वाजिनोगव्यन्तस्त्वाहवामहे ॥ ३६ ॥ त्वामित् ॥ त्वामिद्धिहवा
महेसातौवाजस्यकारवः ॥ त्वांवृत्रेष्विन्द्रसत्पतिन्नरस्त्वाङ्काष्ठास्वर्वतः ॥ ३७
सत्वम् ॥ सत्वन्नश्चित्रवज्रहस्तधृष्णुयामहस्तवानोऽ अद्रिवः ॥ गामश्वं
ठं· रथ्यमिन्द्रसङ्किरसत्रावाजन्नजिग्युषे ॥ ३८ ॥ कयानः ॥ कयानश्चित्रऽआ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संहि भुवद्दूतीसदावृधः सखा ॥ कयाशचिष्ठयावृता ॥३९॥ कस्त्वा ॥ सत्योमदानाम्म उ.अ.
३५ ꣳहिष्ठोमत्सदन्धसः ॥ दृढाचिदारुजेवसु ॥४०॥ अभीषुणः ॥ अभीषुणः स २७
खीनामविताजरितॄणाम् ॥ शतम्भवास्यूतये ॥४१॥ यज्ञायज्ञावः ॥ यज्ञाय
ज्ञावोऽअग्नयेगिरागिराचदक्षसे ॥ प्रप्रवयममृतञ्जातवेदसम्प्रियम्मित्र
न्नशꣳसिषम् ॥४२॥ पाहिनः ॥ पाहिनोऽअग्नऽएकयापाह्युतद्वितीयया
॥ पाहिगीर्भिस्तिसृभिरूर्जाम्पतेपाहिचतसृभिर्वसो ॥४३॥ ऊर्जोनपातम् ॥
ऊर्जोनपातꣳसहिनायमस्मयुर्दाशेमहव्यदातये ॥ भुवद्वाजेष्वविता
भुवद्वृधऽउतत्रातातनूनाम् ॥४४॥ संवत्सरोसि ॥ परिवत्सरोसीदावत्सरोसी ३५
द्वत्सरोसिवत्सरोसि ॥ उषसस्तेकल्पन्तामहोरात्रास्तेकल्पन्तामर्द्धमासास्ते

CC-0. In Public Domain. Digitization by eGangotri

कल्पन्ताम्मासास्ते कल्पतामृतवस्ते कल्पन्ताᳪं संवत्सरस्ते कल्पताम् ॥ प्रे
त्याऽएत्येसञ्चाचप्रचसारय ॥ सुपर्णाविदसितयादेवतयाङ्गिरस्वद्ध्रुवःसीद
॥४५॥ इतिसंहितायांसप्तविंᳪशोऽध्यायः ॥२७॥ होतायक्षत् ॥ होतायक्ष
त्समिधेन्द्रमिडस्पदेनाभापृथिव्याऽअधि ॥ दिवोवर्ष्मन्त्समिध्यतऽओ
जिष्ठश्चर्षणीसहावेत्वाज्यस्यहोतर्यज ॥१॥ होतायक्षत्तनूनपातमूतिभिः
होतायक्षत्तनूनपातमूतिभिर्जेतारमपराजितम् ॥ इन्द्रन्देवᳪं स्वर्विदम्पथि
भिर्म्मधुमत्तमैर्न्नराशᳪंसेनतेजसावेत्वाज्यस्यहोतर्यज ॥२॥ होतायक्ष
दिडाभिरिन्द्रम् ॥ होतायक्षदिडाभिरिन्द्रमीडितमाजुह्वानममर्त्यम् ॥ देवो
देवैःसवीर्योवज्रहस्तःपुरन्दरोवेत्वाज्यस्यहोतर्यज ॥३॥ होतायक्षद्बर्हि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

षीन्द्रम् ॥ होतायक्षद्बर्हिषीन्द्रन्निषद्वरं वृषभन्नर्य्यापसम् ॥ वसुभीरुद्रैरादि-
त्यैः सयुग्भिर्बर्हिरासदद्वेत्वाज्यस्य होतर्य्यज ॥४॥ होतायक्षदोजो न वीर्य्य
ठं सहो द्वार ऽ इन्द्रमवर्द्धयन् ॥ सुप्रायणा ऽ अस्मिन्यज्ञे विश्रयन्तामृतावृ
धो द्वार ऽ इन्द्राय मीढुषे व्यन्त्वाज्यस्य होतर्य्यज ॥५॥ होतायक्षदुषे ऽ इन्द्रस्य ॥
धेनू सुदुघे मातरा मही ॥ सवातरौ न तेजसा वत्समिन्द्रमवर्द्धतां वीतामाज्यस्य
होतर्य्यज ॥६॥ होतायक्षद्दैव्या होतारा ॥ भिषजा सखाया हविषेन्द्रम्भिषज्य
तः ॥ कवी देवौ प्रचेतसाविन्द्राय धत्त ऽ इन्द्रियं वीतामाज्यस्य होतर्य्यज ॥७॥
होतायक्षत्तिस्रो देवीः ॥ होतायक्षत्तिस्रो देवीर्न्न भेषजन्त्रयस्त्रिधातवोपस ऽ
इडा सरस्वती भारती महीः ॥ इन्द्रपत्नीर्हविष्मतीर्व्यन्त्वाज्यस्य होतर्य्यज ॥८॥

होतायक्षत्त्वष्टारमिन्द्रम् ॥ होतायक्षत्त्वष्टारमिन्द्रन्देवम्भिषजꣳ सुयजङ्घृतश्रि-
यम् ॥ पुरुरूपꣳ सुरेतसम्मघोनमिन्द्रायत्त्वष्टादधदिन्द्रियाणिवेत्वाज्ज्यस्य
होतर्य्यज ॥९॥ होतायक्षद्वनस्प्पतिꣳ शमितारम् ॥ होतायक्षद्वनस्प्पतिꣳ श-
मितारꣳ शतक्क्रतुन्धियोजोष्टारमिन्द्रियम् ॥ मद्ध्वासमञ्जन्पथिभिः सुगे-
भिः स्वदातियज्ञम्मधुनाघृतेनवेत्वाज्ज्यस्यहोतर्य्यज ॥१०॥ होतायक्षदिन्द्र-
ꣳ स्वाहा ॥ होतायक्षदिन्द्रꣳ स्वाहाज्ज्यस्यस्वाहामेदसः स्वाहास्तोकानाꣳ
स्वाहास्वाहाकृतीनाꣳ स्वाहाहव्यसूक्तीनाम् ॥ स्वाहादेवाऽआज्ज्यपाजुषा-
णाऽइन्द्रऽआज्ज्यस्यव्यन्तुहोतर्य्यज ॥११॥ देवम्बर्हिरिन्द्रꣳ सुदेवन्देवैर्व्वीरव-
त्स्तीर्णंवेद्यामवर्द्धयत् ॥ वस्तोर्वृतम्प्राक्तोर्भृतꣳ रायाबर्हिष्मतोत्यगाद्वसुव

संहि नैवसुधेयस्यवेतुय्यज ॥१२॥ देवीर्द्वारः ॥ देवीर्द्वारऽइन्द्रꣳसङ्घातेवीड्वीर्य्या उ.अ.
३७ मन्नवर्द्धयन् ॥ आवत्सेनतरुणेनकुमारेणचमीवतापार्वाणꣳरेणुककाटन्नु २८
दन्तांवसुवनेवसुधेयस्यव्यन्तुय्यज ॥१३॥ देवीऽउषासानक्ता ॥ देवीऽउषासा
नक्तेन्द्रंय्यज्ञेप्प्रयत्यह्वेताम् ॥ दैवीर्विशःप्प्रायासिष्टाꣳसुप्प्रीतेसुधितेव
सुवनेवसुधेयस्यवीतांय्यज ॥१४॥ देवीजोष्ट्री ॥ देवीजोष्ट्रीवसुधितीदेवमि
न्द्रमवर्द्धताम् ॥ अयाव्यन्याघाद्वेषाꣳस्यान्यावक्षद्वसुवार्य्याणियजमा
नायशिक्षितेवसुवनेवसुधेयस्यवीतांय्यज ॥१५॥ देवीऽऊर्ज्जाहुती ॥ देवी
ऽऊर्ज्जाहुतीदुघेसुदुघेपयसेन्द्रमवर्द्धताम् ॥ इषमूर्ज्जमन्यावक्षत्सग्धिꣳस ३७
पीतिमन्यानवेनपूर्व्वन्दयमानेपुराणेननवमधातामूर्ज्जमूर्ज्जाहुतीऽऊर्ज्जय-

CC-0. In Public Domain. Digitization by eGangotri

माने वसुधार्य्याणि यजमानाय शिक्षिते वसुवने वसुधेयस्य वीतां यज ॥ १६ ॥
देवा देव्यौ ॥ देवा देव्या होतारा देवमिन्द्रमवर्द्धताम् । हताघशंसावाभार्ष्टां
वसु वार्य्याणि यजमानाय शिक्षितौ वसुवने वसुधेयस्य वीतां यज ॥ १७ ॥ दे
वीस्तिस्रः । देवीस्तिस्रस्तिस्रो देवीः पतिमिन्द्रमवर्द्धयन् । अस्पृक्षद्भारती दिवं
रुद्रैर्यज्ञं सरस्वतीडा वसुमती गृहान्वसुवने वसुधेयस्य व्यन्तु यज ॥ १८
॥ देव इन्द्रः ॥ देव इन्द्रो नराशंसस्त्रिवरूथस्त्रिबन्धुरो देवमिन्द्रमवर्द्धयत् ॥
शतेन शितिपृष्ठानामाहितः सहस्रेण प्रवर्त्तते मित्रावरुणेदस्य होत्रमर्हतो बृ
हस्पतिस्तोत्रमश्विनाध्वर्य्यवं वसुवने वसुधेयस्य वेतु यज ॥ १९ ॥ देवो देवैः ॥
देवो देवैर्वनस्पतिर्हिरण्यपर्णो मधुशाखः सुपिप्पलो देवमिन्द्रमवर्द्धयत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दिवमग्रेणास्पृक्षदान्तरिक्षम्पृथिवीमदृꣳहीद्वसुवने वसुधेयस्य वेतु यज ॥
॥२०॥ देवम्बर्हिः ॥ देवम्बर्हिर्वारितीनान्देवमिन्द्रमवर्द्धयत् ॥ स्वासस्थमि
न्द्रेणासन्नमन्या बर्हीꣳष्यभ्यभूद्वसुवने वसुधेयस्य वेतु यज ॥२१॥ देवोऽ
अग्निः ॥ देवोऽअग्निः स्विष्टकृद्देवमिन्द्रमवर्द्धयत् ॥ स्विष्टङ्कुर्वन्त्स्विष्टकृत्स्वि
ष्टमद्य करोतु नो वसुवने वसुधेयस्य वेतु यज ॥२२॥ अग्निमद्य होतारमवृ
णीतायं यजमानः पचन्पक्तीः पचन्पुरोडाशम्बध्नन्निन्द्राय छागम् ॥ सूप
स्थाऽअद्य देवो वनस्पतिरभवदिन्द्राय छागेन ॥ अघत्तम्मेदस्तः प्रतिप
चताग्रभीदवीवृधत्पुरोडाशेन ॥ त्वामद्यऽऋषे ॥२३॥ होता यक्षत् ॥ होता य
क्षत्समिधानम्महद्यशः सुसमिद्धं वरेण्यमग्निमिन्द्रं वयोधसम् ॥ गायत्री-

CC-0. In Public Domain. Digitization by eGangotri

ञ्छन्दऽ इन्द्रियन्त्र्यविङ्गां वयो दधद्वेत्वाज्ज्यस्य होतर्यज ॥२४॥ होता यक्षत्तनू
नपातमुद्भिदम् ॥ होता यक्षत्तनूनपातमुद्भिदं यङ्गर्भमदितिर्दधे शुचिमिन्द्रं-
वयोधसम् ॥ उष्णिहुञ्छन्दऽ इन्द्रियन्दित्यवाहङ्गां वयो दधद्वेत्वाज्ज्यस्य हो
तर्यज ॥२५॥ होता यक्षदीडेन्यमीडितम् ॥ होता यक्षदीडेन्यमीडितं वृत्रह
न्तमिडाभिरीड्यꣳ सहः सोममिन्द्रं वयोधसम् ॥ अनुष्टुभञ्छन्दऽ इन्द्रिय
म्पञ्चाविङ्गां वयो दधद्वेत्वाज्ज्यस्य होतर्यज ॥२६॥ होता यक्षत्सुबर्हिषम्पूषण्व
न्तम् ॥ होता यक्षत्सुबर्हिषम्पूषण्वन्तममर्त्यꣳ सीदन्तम्बर्हिषि प्रिये मृतेन्द्रं व
योधसम् ॥ बृहतीञ्छन्दऽ इन्द्रियन्त्रिवत्सङ्गां वयो दधद्वेत्वाज्ज्यस्य होतर्यज
॥२७॥ होता यक्षद्व्यचस्वतीः सुप्रायणाऽ॥ होता यक्षद्व्यचस्वतीः सुप्राय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संहि॰ णाऽऋतावृधो द्वारो देवीर्हिरण्ययीर्ब्रह्माणमिन्द्रं वयोधसम् ॥ पङ्क्तिञ्छन्दऽ इ उ॰अ॰
२९ हेन्द्रियन्तुर्य्यवाहङ्गां वयो दधद्व्यन्त्वाज्ज्यस्य होतर्य्यज ॥२८॥ होता यक्षत्सुपे- २८
शसा सुशिल्पे ॥ बृहतीऽउभे नक्तोषासा न दर्शते विश्वमिन्द्रं वयोधसम् ॥ त्रि
ष्टुभञ्छन्दऽ इहेन्द्रियम्पष्ठवाहङ्गां वयो दधद्वीतामाज्ज्यस्य होतर्य्यज ॥२९॥
होता यक्षत्प्रचेतसा देवानामुत्तमं यशो होतारा दैव्या कवी सयुजेन्द्रं वयोध
सम् ॥ जगतीञ्छन्दऽ इन्द्रियमनड्वाहङ्गां वयो दधद्वीतामाज्ज्यस्य होतर्य्य-
ज ॥३०॥ होता यक्षत्पेशस्वतीस्तिस्रः ॥ होता यक्षत्पेशस्वतीस्तिस्रो देवीर्हि
रण्ययीर्भारतीर्बृहतीर्म्महीः पतिमिन्द्रं वयोधसम् ॥ विराजञ्छन्दऽ इहेन्द्रिय २९
न्धेनुङ्गान्न वयो दधद्व्यन्त्वाज्ज्यस्य होतर्य्यज ॥३१॥ होता यक्षत्सुरेतसन्त्वष्टा

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रम् ॥ होता यक्षत्सुरेतसन्त्वष्टारम्पुष्टिवर्द्धनꣳ रूपाणि बिभ्रतम्पृथक्पुष्टिमि
न्द्रं वयोधसम् ॥ द्विपदञ्छन्दऽइन्द्रियमुक्षाणङ्गान्न वयो दधद्वेत्वाज्ज्यस्य हो
तर्य्यज ॥३२॥ होता यक्षद्वनस्पतिꣳ शमितारम् ॥ होता यक्षद्वनस्पतिꣳ श
मितारꣳ शतक्रतुꣳ हिरण्यपर्णमुक्थिनꣳ रशनाम्बिभ्रतं वशिम्भगमिन्द्रं
वयोधसम् ॥ ककुभञ्छन्दऽइहेन्द्रियं वशां वेहतङ्गां वयो दधद्वेत्वाज्ज्यस्य हो
तर्य्यज ॥३३॥ होता यक्षत्स्वाहाकृतीरग्निम् ॥ होता यक्षत्स्वाहाकृतीरग्निङ्गृह
पतिम्पृथग्वरुणम्भेषजङ्कविङ्क्षत्रमिन्द्रं वयोधसम् ॥ अतिछन्दसञ्छन्दऽइन्द्रि
यम्बृहदृषभङ्गां वयो दधद्व्यन्त्वाज्ज्यस्य होतर्य्यज ॥३४॥ देवम्बर्हिः ॥ देवम्बर्हि
र्वयोधसन्देवमिन्द्रमवर्द्धयत् ॥ गायत्र्या छन्दसेन्द्रियञ्चक्षुरिन्द्रे वयो दधद्वसुव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संहि॰ नैवसुधेयस्य वेतुर्यजे ॥३५॥ देवीर्द्वारः ॥ देवीर्द्वारो वयोधसꣳ शुचिमिन्द्रम उ॰अ॰
४० वर्द्धयन् ॥ उष्णिहा छन्दसेन्द्रियम्प्राणमिन्द्रे वयो दधद्वसुवनेवसुधेयस्यव्य २८
न्तु यज ॥३६॥ देवीऽउषासानक्ता ॥ देवमिन्द्रं वयोधसन्देवी देवमवर्द्धताम् ॥ अ
नुष्टुभा छन्दसेन्द्रियम्बलमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ॥३७॥
देवीजोष्ट्री ॥ देवीजोष्ट्री वसुधिती देवमिन्द्रं वयोधसन्देवी देवमवर्द्धताम् ॥ बृह-
त्या छन्दसेन्द्रियꣳ श्रोत्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ॥३८॥
देवीऽऊर्ज्जाहुती ॥ देवीऽऊर्ज्जाहुती दुघे सुदुघे पयसेन्द्रं वयोधसन्देवी देवमव
र्द्धताम् ॥ पङ्क्त्या छन्दसेन्द्रियꣳ शुक्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीता ४०
यज ॥३९॥ देवा दैव्या ॥ देवा दैव्या होतारा देवमिन्द्रं वयोधसन्देवौ देवमवर्द्धता

CC-0. In Public Domain. Digitization by eGangotri

म् ॥ त्रिष्टुभाच्छन्दसेन्द्रियन्त्विषिमिन्द्रे वयोदधद्वसुवने वसुधेयस्यवीतांय्य
जं ॥४०॥ देवीस्तिस्रः ॥ देवीस्तिस्रस्तिस्रोदेवीर्वयोधसम्पतिमिन्द्रमवर्द्ध
यन् ॥ जगत्याच्छन्दसेन्द्रियꣳशूषमिन्द्रे वयोदधद्वसुवने वसुधेयस्यव्य-
न्तुयजं ॥४१॥ देवोनराशꣳसः ॥ देवोनराशꣳसो देवमिन्द्रं वयोधसन्देु-
वोदेवमवर्द्धयत् ॥ विराजाच्छन्दसेन्द्रियꣳरूपमिन्द्रे वयोदधद्वसुवने वसु-
धेयस्यवेतुयजं ॥४२॥ देवोवनस्पतिः ॥ देवोवनस्पतिर्देवमिन्द्रं वयोध
सन्देवोदेवमवर्द्धयत् ॥ द्विपदाच्छन्दसेन्द्रियम्भगमिन्द्रे वयोदधद्वसुवने व
सुधेयस्यवेतुयजं ॥४३॥ देवम्बर्हिः ॥ देवम्बर्हिर्वारितीनान्देवमिन्द्रं वयो
धसन्देवन्देवमवर्द्धयत् ॥ ककुभाच्छन्दसेन्द्रियंय्यशऽइन्द्रे वयोदधद्वसुवने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वसुधेयस्यव्वेतुयजे ॥ ४४ ॥ देवोऽअग्निः२ ॥ स्विष्टकृद्देवमिन्द्रंव्वयोधसन्देवोदे
वमवर्द्धयत् ॥ अतिछन्दसाछन्दसेन्द्रियङ्क्षत्रमिन्द्रेव्वयोदधद्वसुवनेव्वसुधे
येस्यव्वेतुयजे ॥ ४५ ॥ अग्निमद्यहोतारमवृणीतायंय्यजमानःपचन्पक्तीः
पचन्पुरोडाशम्बध्नन्निन्द्रायव्वयोधसेछागम् ॥ सूपस्थाऽअद्यदेवोव्वनस्प
तिरभवदिन्द्रायव्वयोधसेछागेन ॥ अघत्तम्मेदस्तः२ प्रतिपचताग्ग्रभीदवीवृध
त्पुरोडाशेन ॥ त्वामद्यऽऋषे ॥ ४६ ॥ इतिसंहितायांऽअष्टाविंशोऽध्यायः ॥
॥ २८ ॥ समिद्धोऽअञ्जन् ॥ समिद्धोऽअञ्जन्कृदरम्मतीनाङ्घृतमग्नेमधुम
त्पिन्वमानः ॥ व्वाजीवहन्व्वाजिनञ्जातवेदोदेवानांव्वक्षिप्रियमासधस्थम् ४१
॥ १ ॥ घृतेनाञ्जन् ॥ घृतेनाञ्जन्त्सम्पथोदेवयानान्प्रजानन्व्वाज्ज्यप्प्येतुदेवान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अनुत्वासप्तेप्प्रुदिशेः सचन्ताꣳ स्वधामुस्मैयजमानायधेहि ॥२॥ ईड्यु
श्च ॥ ईड्यश्चासिवन्द्यश्चवाजिन्नाशुश्चासिमेध्यश्चसप्ते ॥ अग्निष्ट्वादेवैर्वसु
भिः सजोषाः प्प्रीतंवह्निंवहतुजातवेदाः ॥ आस्तीर्णम्बर्हिः सुष्टरीमाजुषाणो
रुपृथुप्प्रथमानम्पृथिव्याम् ॥ देवेभिर्युक्तमदितिः सजोषाः स्योनङ्कृण्वाना
सुविते दधातु ॥४॥ एताऽउवः ॥सुप्पगीघ्रिश्वरूपाघिपक्षोभिः श्रयमाणा
ऽउदातैः ॥ऋष्वाः सतीः कवषः शुम्भमानाद्द्वारोदेवीः सुप्प्रायणाभवंतु
॥५॥ अन्तरामित्रावरुणा ॥ अन्तरामित्रावरुणाचरंतीमुखंयज्ञानामभि
संविदाने ॥उषासावाꣳ सुहिरण्येसुशिल्प्येऽऋतस्ययोनाविहसादयामि
॥६॥ प्रथमावाम् ॥ प्रथमावाꣳ सरथिनासुवर्णा देवौपश्यन्तौभुवनानिवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संहि ऽश्वा ॥ अपिप्प्रयुञ्चोदना वामिमाना होतारा ज्योतिः प्रदिशा दिशन्ता ॥७॥ उ.अ.
४२ आदित्यैर्न्नः ॥ आदित्यैर्न्नो भारती वष्टु यज्ञꣳ सरस्वती सह रुद्रैर्न्न ऽआवीत् ॥ २९
इडोपहूता वसुभिः सजोषा यज्ञन्नो देवीरमृतेषु धत्त ॥८॥ त्वष्टा वीरम् ॥ त्वष्टा-
वीरन्देवकामञ्जजान त्वष्टुरर्वा जायत ऽआशुरश्वः ॥ त्वष्टेदं विश्वम्भुवनञ्ज
जान बहोः कर्त्तारमिह यक्षि होतः ॥९॥ अश्वो घृतेन त्मन्या समक्त ऽउप दे
वाँ२॥ ऽऋतुशः पाथ ऽएतु ॥ वनस्पतिर्देवलोकम्प्रजानन्नग्निना हव्या स्व
दितानि वक्षत् ॥१०॥ प्रजापतेस्तपसा ॥ वावृधानः सद्यो जातो दधिषे यज्ञम
ग्ने ॥ स्वाहाकृतेन हविषा पुरोगा याहि साध्या हविरदन्तु देवाः ॥११॥ यदक्र ४२
न्दः ॥ प्रथमञ्जायमान ऽउद्यन्त्समुद्रादुत वा पुरीषात् ॥ श्येनस्य पक्षा ह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रिणस्य बाहू ऽ उपस्तुत्यम्महि जातन्ते ऽ अर्वन् ॥१२॥ यमेन दत्तम् ॥ यमेन दत्त
न्त्रित ऽ एनमायुनगिन्द्र ऽ एणम्प्रथमो ऽ अध्यतिष्ठत् ॥ गन्धर्वो ऽ अस्य रशना
मगृभ्णात्सूरादश्वं वसवो निरतष्ट ॥१३॥ असि यमः ॥ असि यमो ऽ अस्या
दित्यो ऽ अर्वन्नसि त्रितो गुह्येन व्रतेन ॥ असि सोमेन समया विपृक्त ऽ आहुस्ते
त्रीणि दिवि बन्धनानि ॥१४॥ त्रीणि ते ॥ त्रीणि त ऽ आहुर्दिवि बन्धनानि त्रीण्य-
प्सु त्रीण्यन्तः समुद्रे ॥ उतेव मे वरुणश्छन्त्स्यर्वन्यत्रा त ऽ आहुः परमञ्जनि
त्रम् ॥१५॥ इमा ते वाजिन्नवमार्जनानीमा शफानां सनितुर्निधाना ॥
अत्रा ते भद्रा रशना ऽ अपश्यमृतस्य या ऽ अभिरक्षन्ति गोपाः ॥१६॥ आत्मा
नन्ते ॥ आत्मानन्ते मनसारादजानामवो दिवा पतयन्तम्पतङ्गम् ॥ शिरो ऽ अप

CC-0. In Public Domain. Digitization by eGangotri

श्यम्पुथिभिः सुगेभिररेणुभिर्ज्जेहमानम्पतत्रि ॥१७॥ अत्राते ॥ रूपमुत्तममप-

श्यञ्जिगीषमाणमिषऽआपदेगोः ॥ यदातेमर्तोऽअनुभोगमानडादिद्ग्रसि-
ष्ठऽओषधीरजीगः ॥१८॥ अनुत्वा ॥ अनुत्वारथोऽअनुमर्य्योऽअर्वन्ननुगावो
नुभगः कनीनाम् ॥ अनुव्व्रातासस्तवसख्यमीयुरनुदेवाममिरेवीर्य्यन्ते
॥१९॥ हिरण्यशृङ्गोयः ॥ हिरण्यशृङ्गोयोऽअस्यपादामनोजवाऽअवरऽइन्द्र
आसीत् ॥ देवाऽइदस्यहविरद्यमायन्योऽअर्वन्तम्प्रथमोऽअध्यतिष्ठत् ॥२०
॥ ईर्म्मान्तासः सिलिकमध्यमासः ॥ ईर्म्मान्तासः सिलिकमध्यमासः सꣳशू
रणासोदिव्यासोऽअत्याः ॥ हꣳसाऽइवश्रेणिशोयतन्तेयदाक्षिषुर्दिव्यम-
ज्मम्मश्वाः ॥२१॥ तवशरीरम् ॥ तवशरीरम्पतयिष्ण्वर्वन्तवचित्तंवातऽइ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ध्रजीमान् ॥ तव शृङ्गाणि विष्ठिता पुरुत्रारण्येषु जर्भुराणा चरन्ति ॥२२॥ उप
प्र ॥ उप प्रागाच्छसनं वाज्यर्वा देवद्रीचा मनसा दीध्यानः ॥ अजः पुरो नी
यते नाभिरस्यानु पश्चात्कवयो यन्ति रेभाः ॥२३॥ उप प्र ॥ उप प्रागात्परमं
यत्सधस्थमर्वाँ२॥ऽअच्छा पितरं मातरं च ॥ अद्या देवाञ्जुष्टतमो हि गम्या
ऽअथाशास्ते दाशुषे वार्याणि ॥२४॥ समिद्धोऽअद्य ॥ मनुषो दुरोणे देवो देवा
न्यजसि जातवेदः ॥ आ च वह मित्रमहश्चिकित्वान्त्वं दूतः कविरसि प्रचेताः
॥२५॥ तनूनपात्पथः ॥ तनूनपात्पथऽऋतस्य यानान्मध्वा समञ्जन्त्स्वदया
सुजिह्व ॥ मन्मानि धीभिरुत यज्ञमृन्धन्देवत्रा च कृणुह्यध्वरं नः ॥२६॥ नरा
शꣳसस्य महिमानम् ॥ नराशꣳसस्य महिमानमेषामुप स्तोषाम यजतस्य

संहि॰ यज्ञैः ॥ येसुकृतःसुचयोधियन्धाःऽस्वदन्तिदेवाऽउभयानिहव्या ॥२७॥ उ॰अ॰
४४ आजुह्वानऽईड्यः ॥ आजुह्वानऽईड्योवन्द्यश्चायाह्यग्नेवसुभिःसजोषाः ॥ २९
त्वन्देवानामसियह्वहोतासऽएतान्यक्षीषितोयजीयान् ॥२८॥ प्राचीनम्बर्हिः
प्रदिशापृथिव्यावस्तोरस्याव्वृज्यतेऽअग्रेऽअह्नाम् ॥ व्युप्रथतेवितरंवरीयो
देवेभ्योऽअदितयेस्योनम् ॥२९॥ व्यचस्वतीरुर्विया ॥ विश्रयन्ताम्पतिभ्योनज
नयःशुम्भमानाः ॥ देवीर्द्वारोबृहतीर्विश्वमिन्वादेवेभ्योभवतसुप्रायणाः
॥३०॥ आसुष्वयन्ती ॥ यजतेऽउपाकेऽउषासानक्तासदतान्नियोनौदिव्येयो
षणेबृहतीसुरुक्मेऽअधिश्रियंशुक्रपिशन्दधाने ॥३१॥ दैव्याहोतारा ॥ प्र ४४
थमासुवाचामिमानायज्ञम्मनुषोयजध्यै ॥ प्रचोदयन्ताविदथेषुकारूप्रा-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चीनुञ्ज्योतिः प्प्रुदिशोदिशन्तौ ॥३२॥ आनः ॥आनोयुज्ञम्भारतीतूयमेत्विडामनुष्वदिहचेतयन्ती ॥ तिस्रोदेवीर्बुर्हिरेदꣳस्योनꣳसरस्वतीस्वपसः सदन्तु ॥३३॥ यऽइमे ॥ द्यावापृथिवीजनित्री रूपैरपिꣳशद्भुवनानिविश्वा ॥ तम्द्य होतरिषितोयजीयान्देवन्त्वष्टारमिहयक्षिविद्वान् ॥३४॥ उपावसृजत्मन्या ॥ समुञ्जन्देवानाम्पाथऽऋतुथाहवीꣳषि ॥ वनस्प्पतिः शमितादेवोऽअग्निः स्वदन्तुहव्यम्मधुनाघृतेन ॥३५॥ सद्योजातः ॥ सुद्योजातोव्यमिमीतयुज्ञमुग्निर्देवानामभवत्पुरोगाः ॥ अस्यहोतुः प्प्रुदिश्यृतस्यवाचिस्वाहाकृतꣳहुविरदन्तुदेवाः ॥३६॥ केतुङ्कृण्वन् ॥ केतुङ्कृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे ॥ समुषद्भिरजायथाः ॥३७॥ जीमूतस्येवभवति ॥ जीमूतस्येवभवतिप्प्रतीकंय्य-

संहि द्वर्म्मीयातिसमदामुपस्थे ॥ अनाविद्धयातन्न्वाजयत्वठं· सत्वावर्म्मणोमहिमा उ·अ·
४५ पिपर्त्तु ॥ ३८ ॥ धन्न्वनागाः ॥ धन्न्वनागाधन्न्वनाजिञ्जयेम धन्न्वनातीव्राः॒ सम २९
दोजयेम ॥ धनुःशत्रोरपकामङ्कृणोतिधन्न्वनासर्व्वाः प्रदिशोजयेम ॥ ३९ ॥ व
क्ष्यन्तीवेत् ॥ वक्ष्यन्तीवेदागनीगन्तिकर्णम्प्रियठं· सखायम्परिषस्वजाना ॥
खोषेवशिङ्क्ते वितताधि धन्न्वञ्ज्याऽइयठं· समनेपारयन्ती ॥ ४० ॥ तेऽआचर
न्ती ॥ तेऽआचरन्तीसमनेवयोषामातेवपुत्रम्बिभृतामुपस्थे ॥ अपशत्रू
न्विध्यताठं संविदानेऽआर्त्नीऽइमेविष्फुरन्तीऽअमित्रान् ॥ ४१ ॥ बह्वीना
म्पिता ॥ बहुरस्यपुत्रश्चिश्चाकृणोतिसमनावगत्य ॥ इषुधिः॒ सङ्काः पृतनाश्च ४५
सर्व्वाः पृष्ठेनिनद्धोजयतिप्रसूतः ॥ ४२ ॥ रथेतिष्ठन् ॥ रथेतिष्ठन्नयतिवाजिनः

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पुरोयत्रयत्रकामयतेसुषारथिः ॥ अभीशूनाम्महिमानम्पनायतमनः पश्चाद
नुयछन्तिरश्मयः ॥४३॥ तीव्रान्घोषान् ॥ तीव्रान्घोषान्कृण्वतेवृषपाण
योश्वारथेभिः सहवाजयन्तः ॥ अवक्रामन्तः प्रपदैरमित्रान्क्षिणान्तिश
त्रूँ १॥ रनपव्ययन्तः ॥४४॥ रथवाहणꣳहविः ॥ रथवाहणꣳहविरस्यना
मयत्रायुधन्निहितमस्यवर्म्म ॥ तत्रारथमुपशग्मꣳसदेमविश्वाहावय
ꣳसुमनस्यमानाः ॥४५॥ स्वादुषꣳसदः पितरः ॥ स्वादुषꣳसदः पितरो
वयोधाः कृच्छ्रेश्रितः शक्तीवन्तोगभीराः ॥ चित्रसेनाऽइषुबलाऽअमृध्राः
सतोवीराऽउरवोव्रातसाहाः ॥४६॥ ब्राह्मणासः पितरः ॥ ब्राह्मणासः
पितरः सोम्म्यासः शिवेनोद्यावापृथिवीऽअनेहसा ॥ पूषानः पातुदुरितादृता

CC-0. In Public Domain. Digitization by eGangotri

संहि॰ वृधोरक्षामाकिन्नोऽअघशꣳसऽईशत॥४७॥सुपर्णंवस्ते॥मृगोऽअस्या उ॰अ॰
४६ दन्तोगोभिः सन्नद्धापततिप्रसूता॥यत्रानरः सञ्चविचद्रवन्तितत्रास्मभ्य २९
मिषवः शर्म्मयꣳसन्॥४८॥ऋजीतेपरि॥वृङ्गि॰नोऽश्माभवतुनस्तनूः॥
सोमोऽअधिब्रवीतुनोदितिः शर्म्मयच्छतु॥४९॥आजङ्घन्ति॥आजङ्घन्तिसा
न्वेषाञ्जघनाँ२॥ऽउपजिघ्नते॥अश्वाजनिप्रचेतसोश्वान्त्समत्सुचोदय
॥५०॥अहिरिवभोगैः पर्य्येतिबाहुञ्ज्यायाहेतिम्परिबाधमानः॥हस्तघ्नो
विश्वावयुनानिविद्वान्पुमान्पुमाꣳ सम्परिपातुविश्वतः॥५१॥वनस्पते
वीड्वङ्गः॥वनस्पतेवीड्वङ्गोहिभूयाऽअस्मत्सखाप्रतरणः सुवीरः॥गो ४६
भिः सन्नद्धोऽअसिवीडयस्वास्थातातेजयतुजेत्वानि॥५२॥दिवः पृथिव्याः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥दिवः पृथिव्याः पर्य्योजऽ उद्भृतंवनस्पतिभ्यः पर्य्याभृतꣳसहः ॥अपामो-
ज्मानम्परिगोभिरावृतमिन्द्रस्य वज्रꣳहविषारथंयज ॥५३॥ इन्द्रस्य वज्रः
॥इन्द्रस्यवज्रोमरुतामनीकंमित्रस्यगर्ब्भोवरुणस्यनाभिः ॥ सेमान्नोहव्य
दातिञ्जुषाणोदेवरथप्रतिहव्यागृभाय ॥५४॥ उपश्वासय ॥ पृथिवीमुतद्या
म्पुरुत्रातेमनुतांविष्ठितञ्जगत् ॥ सदुन्दुभेसजूरिन्द्रेणदेवैर्दूराद्दवीयोऽ अप
सेधशत्रून् ॥५५॥ आक्रन्दय ॥ आक्रन्दयबलमोजोनऽ आधानिष्टनिहिदुरिता
बाधमानः ॥ अपप्रोथदुन्दुभेदुच्छुनाऽ इतऽ इन्द्रस्यमुष्टिरसिवीडयस्व ॥५६
आमूः ॥ आमूरजप्रत्यावर्त्तयेमाः केतुमद्दुन्दुभिर्व्वावदीति ॥ समश्वपर्णा-
श्चरन्तिनोनरोस्माकमिन्द्ररथिनोजयन्तु ॥५७॥ आग्नेयः कृष्णग्रीवः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सारस्वतीमेषीबभ्रुः सौम्यः पौष्णः श्यामः शितिपृष्ठोबार्हस्पत्यः ॥ शि-
ल्पोवैश्वदेवऽ ऐन्द्रोऽरुणोमारुतः कल्माषऽ ऐन्द्राग्नः संहितोऽधोरामः सावि
त्रोवारुणः कृष्णऽ एकशितिपात्पेत्वः ॥५८॥ अग्नयेऽनीकवते ॥ अग्नयेऽनीकव
ते रोहिताञ्जिरनड्वानधोरामौसावित्रौपौष्णौरजतनाभीवैश्वदेवौपिशङ्गौतूप
रौमारुतः कल्माषऽ आग्नेयः कृष्णोऽजः सारस्वतीमेषीवारुणः पेत्वः ॥५९॥
अग्नयेगायत्राय ॥ त्रिवृतेराथन्तरायाष्टाकपालऽ इन्द्रायत्रैष्टुभायपञ्चदशाय
बार्हतायैकादशकपालोविश्वेभ्योदेवेभ्योजागतेभ्यः सप्तदशेभ्योवैरूपे-
भ्योद्वादशकपालोमित्रावरुणाभ्यामानुष्टुभाभ्यामेकविंशाभ्यांवैराजाभ्या
म्पयस्याबृहस्पतयेपाङ्क्तायत्रिणवायशाक्वरायचरुः सवित्रऽ औष्णिहाय

CC-0. In Public Domain. Digitization by eGangotri

न्नयस्त्रिᳪ᳭शायरैवताय द्वादशकपालः प्राजापत्यश्चरुरदित्यै विष्णुपत्न्यै
चरुरग्नये वैश्वानराय द्वादशकपालोनुमत्याऽअष्टाकपालः ॥६०॥४॥ इति
संहितापाठे एकोनत्रिंशोऽध्यायः ॥२९॥ देवसवितः ॥ देवसवितः प्रसु
वयज्ञम्प्रसुवयज्ञपतिम्भगाय ॥ दिव्योगन्धर्वः केतपूः केतन्नः पुनातु वाच
स्पतिर्वाचन्नः स्वदतु ॥१॥ तत्सवितुः ॥ तत्सवितुर्वरेण्यम्भर्गोदेवस्यधीम
हि ॥ धियोयोनः प्रचोदयात् ॥२॥ विश्वानिदेव । सवितर्दुरितानिपरासु-
व ॥ यद्भद्रन्तन्नऽआसुव ॥३॥ विभक्तारᳪ᳭हवामहे ॥ विभक्तारᳪ᳭हवामहे
वसोश्चित्रस्यराधसः ॥ सवितारन्नृचक्षसम् ॥४॥ ब्रह्मणेब्राह्मणम् ॥ ब्र
ह्मणेब्राह्मणङ्क्षत्रायराजन्यम्मरुद्भ्योवैश्यन्तपसेशूद्रन्तमसेतस्करन्नार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सं॰हि॰ कायवीरहणम्पाप्मनेक्लीबमाक्रयायाऽअयोगूङ्कामायपुंश्चलूमतिक्रुष्टाय उ॰अ॰
४८ मागधम्॥५॥ नृत्तायसूतम्॥ नृत्तायसूतङ्गीतायशैलूषन्धर्म्मायसभाचरन्न ३०
रिष्ठायैभीमलन्नर्म्मायरेभꣳहसायकारिमानन्दायस्त्रीषखम्प्रमदे कुमारी
पुत्रम्मेधायैरथकारन्धैर्य्यायतक्षाणम्॥६॥ तपसेकौलालम्॥ तपसेकौलाल
म्मायायैकर्म्मारꣳरूपायमणिकारꣳशुभेवपꣳशरव्यायाऽइषुकारꣳहेत्यै
धनुष्कारङ्कर्म्मणेज्याकारन्दिष्टायरज्जुसर्जम्मृत्यवेमृगयुमन्तकायश्वनि
नम्॥७॥ नदीभ्यःपौञ्जिष्ठम्॥ नदीभ्यःपौञ्जिष्ठमृक्षीकाभ्योनैषादम्पुरुष
व्याघ्रायदुर्म्मदङ्गन्धर्वाप्सरोभ्योव्रात्यम्प्रयुग्भ्यऽउन्मत्तꣳसर्पदेवजने ४८
भ्योऽप्रतिपदमयेभ्यःकितवमीर्य्यतायाऽअकितवम्पिशाचेभ्योबिदलकारीं

CC-0. In Public Domain. Digitization by eGangotri

स्यातुधानेभ्यः कण्टकीकारीम् ॥८॥ सन्धयेजारम् ॥ सन्धयेजारङ्गेहायोप
पतिमार्त्यैपरिवित्तन्निर्ऋत्यैपरिविविदानमराध्याऽएदिधिषुःपतिन्निष्कृत्यै
पेशस्कारीꣳ संज्ञानायस्मरकारीम्प्रकामोद्यायोपसदंवर्णायानुरुधम्ब-
लायोपदाम् ॥९॥ उत्सादेभ्यःकुब्जम् ॥ उत्सादेभ्यःकुब्जम्प्रमुदेवामनन्द्वा
र्भ्यःस्रामꣳ स्वप्नायान्धमधर्म्मायबधिरम्पवित्रायभिषजम्प्रज्ञानायन
क्षत्रदर्शमाशिक्षायैप्रश्निनमुपशिक्षायाऽअभिप्रश्निनम्मर्यादायैप्र
श्नविवाकम् ॥१०॥ अर्म्मेभ्योहस्तिपम् ॥ अर्म्मेभ्योहस्तिपञ्जवायाश्वप
म्पुष्ट्यैगोपालंवीर्य्यायाविपालन्तेजसेजपालमिरायैकीनाशङ्कीलालाय
सुराकारम्भद्रायगृहपꣳ श्रेयसेवित्तधमाध्यक्ष्यायानुक्षत्तारम् ॥११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संहि. भार्यैदार्वाहारम् ॥ भार्यैदार्वाहारम्प्प्रभायाऽअग्न्येधम्ब्रध्नस्यविष्टपायाभि उ.अ.
४१ षेक्तारंवर्षिष्ठायनाकायपरिवेष्टारन्देवलोकायपेशितारम्मनुष्यलोकायप्प्र ३०
करितारꣳसर्वेभ्योलोकेभ्यऽउपसेक्तारमवर्त्यैवधायोपमन्थितारम्मेधा
यवासःपल्पूलीम्प्रकामायरजयित्रीम् ॥१२॥ ऋतयेस्तेनहृदयम् ॥ ऋतये
स्तेनहृदयंवैरहत्यायपिशुनंविविक्त्यैक्षत्तारमौपद्रष्ट्र्यायानुक्षत्तारम्बला
यानुचरम्भूम्नेपरिस्कन्दम्प्रियायप्प्रियवादिनमरिष्ट्याऽअश्वसादꣳस्व
र्ग्गायलोकायभागदुघंवर्षिष्ठायनाकायपरिवेष्टारम् ॥१३॥ मन्यवेयस्ता
पम् ॥ मन्यवेयस्तापङ्क्रोधायनिसरंय्योगाययोक्तारꣳशोकायाभिसर्त्तार ४१
ङ्क्षेमायविमोक्तारमुत्कूलनिकूलेभ्यस्त्रिष्ठिनंवपुषेमानस्कृतꣳशीलायाञ्जनी

कारीन्निर्ऋत्यै कोशकारीं यमायासूम् ॥१४॥ यमाय यमसूम् ॥ यमाय यमसू

मथर्वभ्योऽवतोकाꣳ संवत्सराय पर्यायिणीम्परिवत्सरायाविजातामिदावत्सरा

यातीत्वरीमिद्वत्सरायातिष्कद्वरीं वत्सराय विजर्जराꣳ संवत्सराय पलिक्नीमृभु

भ्योऽजिनसन्धꣳ साध्येभ्यश्चर्मम्नम् ॥१५॥ सरोभ्यो धैवरम् ॥ सरोभ्यो धैवर

मुपस्थावराभ्यो दाशं वैशन्ताभ्यो बैन्दन्नड्वलाभ्यः शौष्कलम्पाराय मार्गारम

वाराय कैवर्तन्तीर्थेभ्यऽआन्दं विषमेभ्यो मैनालꣳ स्वनेभ्यः पर्णकं गुहाभ्यः

किरातꣳ सानुभ्यो जम्भकम्पर्वतेभ्यः किम्पूरुषम् ॥१६॥ बीभत्सायै पौल्कस

म् ॥ बीभत्सायै पौल्कसं वर्णाय हिरण्यकारन्तुलायै वाणिजम्पश्चादोषाय-

ग्लाविनं विश्वेभ्यो भूतेभ्यः सिध्मलम्भूत्यै जागरणमभूत्यै स्वपनमार्त्यै ज

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नवादिनं व्यृद्ध्याऽअपगल्भर्ठ्ठ सर्ठ्ठशराय प्रच्छिदम् ॥१७॥ अक्षराजाय कितवम्
॥ अक्षराजाय कितवङ्कृतायादिनवदर्शं त्रेतायै कल्पिनन्द्वापरायाधिकल्पिन
मास्कन्दाय सभास्थाणुम्मृत्यवे गोव्यच्छमन्तकाय गोघातङ्क्षुधे यो गाम्विकृन्त
न्तम्भिक्षमाणऽउपतिष्ठति दुष्कृताय चरकाचार्य्यम्पाप्मने सैलगम् ॥१८॥ प्रति
श्रुत्कायाऽअर्त्तनम् ॥ प्रतिश्रुत्कायाऽअर्त्तनङ्घोषाय भषमन्ताय बहुवादिन-
मनन्ताय मूकर्ठ्ठ शब्दायाडम्बराघातम्महसे वीणावादङ्क्रोशाय तूणवध्ममव
रस्पराय शङ्खध्मं वनाय वनपमन्यतोरण्याय दावपम् ॥१९॥ नर्माय पुं-
श्चलूम् ॥ नर्माय पुंश्चलूर्ठ्ठ हसाय कारिं यादसे शाबल्यां ग्रामण्यङ्गणकमभि ५०
क्रोशकन्तान्महसे वीणावादम्पाणिघ्नन्तूणवध्मन्तान्नृत्तायानन्दाय तलवम्

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥२०॥ अग्नयेपीवानम् ॥ अग्नयेपीवानम्पृथिव्यैपीठसर्प्पिणंवायवेचाण्डालम
न्तरिक्षायवंᳪशनर्तिनन्दिवेखलतिᳪसूर्य्यायहर्य्यक्षन्नक्षत्रेब्भ्यः किर्म्मिरञ्च
न्द्रमसेकिलासमन्हेशुक्कम्पिङ्गाक्षᳪरात्र्यैकृष्ष्णम्पिङ्गाक्षम् ॥२१॥ अथैतान् ॥ अ
थैतानष्टौविरूपानालभतेतिदीर्घञ्चातिह्रस्वञ्चातिस्थूलञ्चातिकृशञ्चातिशु
क्कञ्चातिकृष्ष्णञ्चातिकुल्वञ्चातिलोमशञ्च ॥ अशूद्राऽअब्राह्मणास्तेप्प्राज
पत्त्याः॥ मागधःपुंश्चलीकितवःक्लीबोशूद्राऽअब्राह्मणास्तेप्प्राजापत्त्याः ॥
॥२२॥ २॥ इतिसंहितापाठेत्रिंशत्तमोऽध्यायः ॥३०॥ सहस्रशीर्षापुरुषः ॥ सह-
स्राक्षःसहस्रपात् ॥ सभूमिᳪसर्व्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥१॥ पुरुषऽएव
॥ पुरुषएवेदᳪसर्व्वंय्यद्भूतंय्यच्चभाव्यम् ॥ उतामृतत्वस्येशानोयदन्नेनातिरोहति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संहि॰ ॥२॥ एतावानस्य ॥ महिमातोज्ज्यायाँश्च पूरुषः ॥ पादोस्य विश्वा भूतानि त्रिपा उ॰अ॰
५१ दस्यामृतन्दिवि ॥३॥ त्रिपादूर्द्ध्व ॥ त्रिपादूर्द्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः ॥ ३१
ततो विष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥४॥ ततो विराट् ॥ ततो विराडजा
यत विराजोऽअधि पूरुषः ॥ स जातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥५॥ त
स्माद्यज्ञात् ॥ तस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्यम् ॥ पशूँस्ताँश्चक्रे वा-
यव्यानारण्या ग्राम्याश्च ये ॥६॥ तस्माद्यज्ञात् ॥ तस्माद्यज्ञात्सर्वहुतऽऋ
चः सामानि जज्ञिरे ॥ छन्दाँसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥७॥ त
स्मादश्वाः ॥ तस्मादश्वाऽअजायन्त ये के चोभयादतः ॥ गावो ह जज्ञिरे त ५१
स्मात्तस्माज्जाताऽअजावयः ॥८॥ तं यज्ञम् ॥ तं यज्ञम्बर्हिषि प्रौक्षन्पुरु

CC-0. In Public Domain. Digitization by eGangotri

षञ्जातमग्रतः ॥ तेनदेवाऽअयजन्तसाध्याऽऋषयश्चये ॥९॥ यत्पुरुषम् ॥
यत्पुरुषंव्यदधुः कतिधाव्यकल्पयन् ॥ मुखङ्किमस्यासीत्किम्बाहू किमूरू
पादाऽउच्येते ॥१०॥ ब्राह्मणोऽस्य ॥ ब्राह्मणोऽस्यमुखमासीद्बाहूराजन्यः
कृतः ॥ ऊरूतदस्ययद्वैश्यः पद्भ्याᳪंशूद्रोऽअजायत ॥११॥ चन्द्रमामनसः
॥ चन्द्रमामनसोजातश्चक्षोः सूर्योऽअजायत ॥ श्रोत्राद्वायुश्चप्राणश्चमुखा
दग्निरजायत ॥१२॥ नाभ्याऽआसीत् ॥ नाभ्याऽआसीदन्तरिक्षᳪंशीर्ष्णोद्यौः
समवर्त्तत ॥ पद्भ्याम्भूमिर्दिशः श्रोत्रात्तथालोकाँ२॥ऽअकल्पयन् ॥१३॥ यत्पु
रुषेण ॥ हविषादेवायज्ञमतन्वत ॥ वसन्तोऽस्यासीदाज्ज्यङ्ग्रीष्मऽइध्मः शर
द्धविः ॥१४॥ सप्तास्यासन् ॥ सप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संहि॰ ताः ॥ देवायद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ॥१५॥ यज्ञेनयज्ञम् ॥ यज्ञे शु॰अ॰
५२ नयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् ॥ तेहनाकम्महिमानः स- ३१
चन्तयत्रपूर्वेसाध्याः सन्तिदेवाः ॥१६॥ अद्भ्यः सम्भृतः ॥ पृथिव्यैरसाच्चविश्व
कर्म्मणः समवर्त्तताग्रे ॥ तस्यत्वष्टाविदधद्रूपमेतितन्मर्त्यस्यदेवत्वमाजान
मग्रे ॥१७॥ वेदाहम् ॥ वेदाहमेतम्पुरुषम्महान्तमादित्यवर्णन्तमसः परस्ता
त् ॥ तमेवविदित्वातिमृत्युमेतिनान्यः पन्थाविद्यतेऽयनाय ॥१८॥ प्रजापतिश्च
रति ॥ प्रजापतिश्चरतिगर्भेऽअन्तरजायमानोबहुधाविजायते ॥ तस्ययोनिम्प
रिपश्यन्तिधीरास्तस्मिन्हतस्थुर्भुवनानिविश्वा ॥१९॥ योदेवेभ्यः ॥ योदेवे ५२
भ्यऽआतपतियोदेवानाम्पुरोहितः ॥ पूर्वोयोदेवेभ्योजातोनमोरुचायब्राह्मये

CC-0. In Public Domain. Digitization by eGangotri

॥२०॥ रुचम्ब्राह्मम् ॥ रुचम्ब्राह्मञ्जनयन्तोदेवाऽअग्ग्रेतदब्ब्रुवन् ॥ यस्त्वैव-
म्ब्राह्मणोविद्यात्तस्यदेवाऽअसन्वशे ॥२१॥ श्रीश्च ॥ श्रीश्चतेलक्ष्मीश्चपत्न्यौ
वहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाणस
र्व्वलोकम्मऽइषाण ॥२२॥ इतिसंहितायामेकत्रिंशोऽध्यायः ॥३१॥ तदेव ॥ त
देवाग्निस्तदादित्यस्तद्वायुस्तदुचन्द्रमाः ॥ तदेवशुक्रन्तद्ब्रह्मताऽआपःसप्रजा
पतिः ॥१॥ सर्व्वेनिमेषाः ॥ सर्व्वेनिमेषाजज्ञिरेविद्युतःपुरुषादधि ॥ नैनमूर्ध्वन्न
तिर्य्यञ्चन्नमध्येपरिजग्ग्रभत् ॥२॥ नतस्य ॥ प्रतिमाऽअस्तियस्यनाममह
द्यशः ॥ हिरण्यगर्ब्भऽइत्येषमामाहिंसीदित्येषायस्मान्नजातऽइत्येषः ॥
॥३॥ एषोह ॥ देवःप्रदिशोनुसर्व्वाःपूर्व्वोहजातःसऽउगर्ब्भेऽअन्तः ॥ सऽएवजा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संहि तः॒ स ज॑निष्य्यमा॑णः प्र॒त्यङ्ज॑नास्तिष्ठति स॒र्वतो॑मुखः ॥४॥ यस्मा॒ज्जा॒तम् ॥ य उ.अ.
५३ स्मा॒ज्जा॒तन्न पु॒रा किञ्च॒नैव॒ य ऽआ॑ब॒भूव॒ भुव॑नानि॒ विश्वा॑ ॥ प्र॒जाप॑तिः प्र॒जया॑ ३२
सꣳररा॒णस्त्रीणि॒ ज्योती॑ꣳषि सचते॒ स षो॑ड॒शी ॥५॥ येन॒ द्यौः ॥ येन॒ द्यौरु॒ग्रा
पृ॑थि॒वी च॑ दृ॒ढा येन॒ स्वः स्तभि॒तं येन॒ नाकः॑ ॥ यो ऽअ॒न्तरि॑क्षे॒ रज॑सो वि॒मानः॒ कस्मै॑
दे॒वाय॑ ह॒विषा॑ विधेम ॥६॥ यङ्क्रन्द॑सी ॥ यङ्क्रन्द॑सी॒ ऽअव॑सा तस्तभा॒ने ऽअ॒भ्यैक्षे॑ता॒
म्मन॑सा॒ रेज॑माने ॥ यत्राधि॒ सूर॒ ऽउदि॑तो वि॒भाति॒ कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥ आपो॑
ह॒ यद्बृ॑ह॒तीर्यश्चि॒दापः॑ ॥७॥ वे॒नस्तत् ॥ वे॒नस्तत्प॑श्य॒न्निहि॑त॒ङ्गुहा॒ सद्यत्र॒ विश्व॑
म्भव॒त्येक॑नीडम् ॥ तस्मि॑न्नि॒दꣳ सञ्च॒ वि चै॑ति॒ सर्वꣳ॒ स ऽओतः॒ प्रोत॑श्च वि॒भूः प्र॒ ५३
जासु॑ ॥८॥ प्र तत् ॥ प्र तद्वो॑चेद॒मृत॑न्नु वि॒द्वान्ग॑न्ध॒र्वो धाम॒ विभृ॑त॒ङ्गुहा॒ सत् ॥ त्रीणि॑

पदानिनिहितागुहास्ययस्तानिवेदसपितुःपितासत् ॥९॥ सनः ॥ सनोबन्धु-
र्ज्जनितासविधाताधामानिवेदभुवनानिविश्वा ॥ यत्रदेवाऽअमृतमानशानास्तृ
तीयेधामन्नध्यैरयन्त ॥१०॥ परीत्यभूतानि ॥ परीत्यलोकान्परीत्यसर्वाःप्रदिशो
दिशश्च ॥ उपस्थायप्रथमजामृतस्यात्मनात्मानमभिसंविवेश ॥११॥ परि
द्यावापृथिवी ॥ सद्यऽइत्वापरिलोकान्परिदिशःपरिस्वः ॥ ऋतस्यतन्तुंवि
ततंविचृत्यतदपश्यत्तदभवत्तदासीत् ॥१२॥ सदसस्पतिम् ॥ सदसस्पतिमद्भु
तम्प्रियमिन्द्रस्यकाम्म्यम् ॥ सनिम्मेधामयासिषꣳस्वाहा ॥१३॥ याम्मेधाम्
॥ याम्मेधान्देवगणाःपितरश्चोपासते ॥ तयामामद्यमेधयाग्नेमेधाविनङ्कुरु
स्वाहा ॥१४॥ मेधाम्मे ॥ मेधाम्मेवरुणोददातुमेधामग्निःप्रजापतिः ॥ मेधामि

 न्द्रश्चवायुश्चमेधान्धातादंदातुमेस्स्वाहा ॥१५॥ इदम्मे ॥ इदम्मेब्रह्मंचक्षत्रञ्चो
 भेश्रियमश्नुताम् ॥ मयिदेवादधतुश्रियमुत्तमान्तस्यैतेस्स्वाहा ॥१६॥ इतिसं
हितायांद्वात्रिंशोऽध्यायः ॥३२॥ अस्याजरासः ॥ अस्याजरासोदमामरि
त्राऽअर्चद्धूमासोऽअग्नयः पावकाः ॥ श्वित्रीचयः श्वात्रासोभुरण्यवोवनर्ष
दोवायवोनसोमाः ॥१॥ हरयोधूमकेतवः ॥ हरयोधूमकेतवोवातजूताऽउपद्य
वि ॥ यतन्तेवृथगग्नयः ॥२॥ यजानः ॥ यजानोमित्रावरुणायजादेवाँ२ ॥ ऋत
म्बृहत् ॥ अग्नेयक्षिस्वन्दमम ॥३॥ युक्ष्वाहि ॥ देवहूतमाँ२ ॥ऽअश्वाँ२ ॥ऽअ
ग्नेरथीरिव ॥ निहोतापूर्व्यः सदः ॥४॥ द्वेविरूपे ॥ चरतः स्वर्थेऽअन्यान्यावत्स
मुपधापयेते ॥ हरिरन्यस्याम्भवतिस्वधावाञ्छुक्रोऽअन्यस्यान्ददृशेसुवर्चाः

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥५॥ शतम् ॥१७००॥ अयमिह ॥ प्रथमो धायि धातृभिर्होता यजिष्ठो ऽअध्वरे -
ष्वीड्यः ॥ यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे ॥६॥ त्रीणि श
ता ॥ त्री सहस्राण्यग्निन्त्रिंशच्च देवा नव चासपर्य्यन् ॥ औक्षन्घृतैरस्तृणन्बर्हि
रस्मा ऽआदिद्धोतारन्न्यसादयन्त ॥७॥ मूर्द्धानन्दिवः ॥ मूर्द्धानन्दिवो ऽअरति-
म्पृथिव्या वैश्वानरमृत ऽआजातमग्निम् ॥ कविं सम्राजमतिथिञ्जनानामा
सन्ना पात्रञ्जनयन्त देवाः ॥८॥ अग्निर्वृत्राणि ॥ जङ्घनद्द्रविणस्युर्विपन्यया ॥
समिद्धः शुक्र ऽआहुतः ॥९॥ विश्वेभिः सोम्म्यम् ॥ विश्वेभिः सोम्म्यम्मध्व-
ग्न ऽइन्द्रेण वायुना ॥ पिबा मित्रस्य धामभिः ॥१०॥ आयत् ॥ आयदिषे नृपति
न्तेज ऽआनड्ढुचिरेतो निषिक्तन्द्यौरभीके ॥ अग्निः शर्द्धमनवद्यं युवानं स्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संहि ञ्जनयन्त्सुदक्षाः ॥११॥ अग्ने शर्द्ध ॥ महते सौभगाय तव द्युम्नान्युत्तमानि उ.अ.
५५ सन्तु ॥ सञ्जास्पत्यꣳ सुयममाकृणुष्व शत्रूयतामभितिष्ठा महाꣳसि ॥१२ ३३
॥ त्वाꣳहि ॥ मन्द्रतममर्कशोकैर्ववृमहे महि नः श्रोष्यग्ने ॥ इन्द्रन्न त्वा शव
सा देवता वायुम्पृणन्ति राधसा नृतमाः ॥१३॥ त्वेऽअग्ने ॥ स्वाहुत प्रियासः स
न्तु सूरयः ॥ यन्तारो ये मघवानो जनानामूर्वान्दयन्त गोनाम् ॥१४॥ श्रुधि श्रु
त्कर्ण्ण ॥ श्रुधि श्रुत्कर्ण्ण वह्निभिर्द्देवैरग्ने सयावभिः ॥ आसीदन्तु बर्हिषि मि
त्रोऽअर्य्यमा प्रातर्य्यावाणोऽअध्वरम् ॥१५॥ विश्वेषामदितिः ॥ विश्वेषा
मदितिर्य्यज्ञियानां विश्वेषामतिथिर्म्मानुषाणाम् ॥ अग्निर्द्देवानामवऽआवृ ५५
णानः सुमृडीको भवतु जातवेदाः ॥१६॥ महोऽअग्नेः ॥ समिधानस्य शर्म्म-

CC-0. In Public Domain. Digitization by eGangotri

ण्यनोगामित्रेवरुणेस्वस्तये ॥ श्रेष्ठेस्यामसवितुःसवीमनितद्देवानामवोऽअ
द्यावृणीमहे ॥ १७ ॥ आपश्चित् ॥ आपश्चित्पिप्युस्तर्य्योनगावोनक्षन्नृतञ्जरिता
रस्तऽइन्द्र ॥ याहिवायुर्न्ननियुतोनोऽअच्छात्वꣳहिधीभिर्द्दयसेविवाजान् ॥ १८
गावऽउप ॥ गावऽउपावतावतम्महीयज्ञस्यरप्सुदा ॥ उभाकर्ण्णाहिरण्य
या ॥ १९ ॥ यदद्य ॥ सूरऽउदितेनागामित्रोऽअर्य्यमा ॥ सुवातिसविताभगः ॥
॥ २० ॥ आसुतेसिञ्चतश्रियꣳरोदस्योरभिश्रियम् ॥ रसादधीतवृषभम् ॥
तम्प्रत्नथायंवेनः ॥ २१ ॥ आतिष्ठन्तम्परि ॥ आतिष्ठन्तम्परिविश्वेऽअभूष-
ञ्छ्रियोवसानश्चरतिस्वरोचिः ॥ महत्तद्वृष्णोऽअसुरस्यनामाविश्वरूपोऽअमृ
तानितस्थौ ॥ २२ ॥ प्रवः ॥ प्रवोमहेमन्दमानायान्धसोर्च्चाविश्वानरायविश्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भुवे॥इन्द्रस्युयस्युसुमखꣳसहोमहिश्श्रवोनृम्णञ्चुरोदसीसपुर्य्यतः॥२३॥
बृहन्नित्॥बृहन्निदिध्मऽएषाम्भूरिशुस्त्तम्पृथुःस्वरुः॥येषामिन्द्रोयुवासखा
॥२४॥इन्द्रेहि॥इन्द्रेहिमत्स्यन्धसोविश्वेभिःसोमुपर्वभिः॥मुहाꣳ॥ऽअभिष्टि
रोजसा॥२५॥इन्द्रोवृत्रम्॥इन्द्रोवृत्रमवृणोच्छर्द्धनीतिःप्रमायिनाममिनाद्वर्प्प
णीतिः अहन्व्युꣳसमुशधग्वनेष्वाविर्द्धेनाऽअकृणोद्राम्याणाम्॥२६॥कु
तुस्त्वम्॥कुतुस्त्वमिन्द्रुमाहिनःसन्नेकोयासिसत्पुतेकिन्तऽइत्था॥सम्पृच्छसेस
मराणःशुभानैर्वोचेस्तन्नोहरिवोयत्तेऽअस्मे॥मुहाꣳ॥ऽइन्द्रोयऽतुजसाकु
दाचुनस्तरीरसिकुदाचुनप्रयुच्छसि॥२७॥आतत्तऽइन्द्रायवःपतन्त्याभियऽऊर्व
ङ्गोमन्तुन्तितृत्सान्॥सकृत्स्वंयेपुरुपुत्राम्महींछसुहस्त्रधाराम्बृहतीन्दुदुक्षन्

॥२८॥ इमान्ते ॥ इमान्तेधियम्प्रभरेमहोमहीमस्यस्तोत्रेधिषणायत्त ऽआ
नजे ॥ तमुत्सवेचप्प्रसवेचसासहिमिन्द्रन्देवासःशवसामदन्ननु ॥२९॥ विभ्रा
ड्बृहत् ॥ विभ्राड्बृहत्पिबतुसोम्यम्मध्वायुर्द्दधद्यज्ञपतावविह्रुतम् ॥ वातजू
तोजो ऽ अभिरक्षतित्मनाप्रजाः पुपोषपुरुधाविराजति ॥३०॥ उदुत्यम् ॥
उदुत्यञ्जातवेदसन्देवंवहन्तिकेतवः ॥ दृशेविश्वायसूर्य्यम् ॥३१॥ येना
पावक ॥ येनापावकचक्षसाभुरण्यन्तञ्जनाँ२॥ ऽअनु ॥ त्वंवरुणपश्यसि
॥३२॥ दैव्यावध्वर्यू ॥ दैव्यावध्वर्यू ऽ आगतꣳरथेनसूर्य्यत्वचा ॥ मध्वायज्ञꣳ
समञ्जाथे ॥ तम्प्रत्नथायंवेनश्चित्रन्देवानाम् ॥३३॥ आनः ॥ आन ऽ इडा-
भिर्विदथेसुशस्तिविश्वानरःसवितादेव ऽ एतु ॥ अपियथायुवानोमत्सथा

संहि ५७

नोविश्श्वम्भुवञ्जगदाभिपित्वेमनीषा ॥३४॥ यदद्य ॥ कच्चवृत्रहन्नुदगाऽअभिसू
र्य्य ॥ सर्वन्तदिन्द्रतेवशे ॥३५॥ तरणिर्विश्श्वदर्शतः ॥ तरणिर्विश्श्वदर्शतो
ज्ज्योतिष्कृदसिसूर्य्य ॥ विश्श्वमाभासिरोचनम् ॥३६॥ तत्सूर्य्यस्य ॥ देवत्व
न्तन्महित्वम्मध्याकर्तोर्विततंसञ्जभार ॥ यदेदयुक्तहरितःसधस्था
दाद्रात्रीवासस्तनुतेसिमस्मै ॥३७॥ तन्मित्रस्य ॥ तन्मित्रस्यवरुणस्याभि
चक्षेसूर्य्योरूपङ्कृणुतेद्योरुपस्थे ॥ अनन्तमन्यद्रुशदस्यपाजःकृष्णमन्य
द्धरितःसम्भरन्ति ॥३८॥ बण्महान् ॥ बण्महाँ२ ॥ ऽअसिसूर्य्यबडादित्य
महाँ२ ॥ ऽअसि ॥ महस्तेसतोमहिमापनस्यतेद्धादेवमहाँ२ ॥ ऽअसि ॥३९॥ ५७
बट्सूर्य्यश्श्रवसामहाँ२ ॥ ऽअसिसत्रादेवमहाँ२ ॥ ऽअसि ॥ मह्नादेवानामसु

उ.अ. ३३

CC-0. In Public Domain. Digitization by eGangotri

र्य्यः पुरोहितोऽग्निभुर्ज्ज्योतिरदाब्ध्यम् ॥ ४० ॥ श्रायन्तऽ इवसूर्य्यम् ॥ श्रायन्तऽ
इवसूर्य्यं विश्वेदिन्द्रस्य भक्षत ॥ वसूनिजातेजनमानऽ ओजसाप्रतिभागन्न
दीधिम ॥ ४१ ॥ अद्यादेवाः ॥ अद्यादेवाऽ उदितासूर्य्यस्यनिरंहसः पिपृता
निरवद्यात् ॥ तन्नोमित्रोवरुणोमामहन्तामदितिः सिन्धुः पृथिवीऽउतद्यौः
॥ ४२ ॥ आकृष्णेन ॥ आकृष्णेनरजसावर्तमानोनिवेशयन्नमृतम्मर्त्यञ्च ॥ हि
रण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ ४३ ॥ प्रवावृजे ॥ सुप्रया
बर्हिरेषामाविश्पतीववीरिटऽ इयाते ॥ विशामक्तोरुषसः पूर्वहूतौवायुः पू
षास्वस्तयेनियुत्वान् ॥ ४४ ॥ इन्द्रवायूबृहस्पतिम् ॥ इन्द्रवायूबृहस्पतिम्मि
त्राग्निम्पूषणम्भगम् ॥ आदित्यान्मारुतङ्गणम् ॥ ४५ ॥ वरुणः प्राविता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संहि भुवन्मिस्वोधिश्वोभिरूतिभिः ॥ करेतान्नः सुराधसः ॥४६॥ अधीनः ॥ अधि- उ.अ.
५८ नऽ इन्द्रैषांविष्णोसजात्यानाम् ॥ इतामरुतोऽअश्विना ॥ तस्मुक्थायंद्युनो ३३
येदेवासुऽआनुऽ इडाभिर्विश्वेभिः सोम्म्यम्मन्द्वोमासश्चर्षणीधृतः ॥४७॥
अग्नुऽ इन्द्रु ॥ वरुणुमित्रुदेवाः शर्द्धुः प्प्रयन्तमारुतोतविष्णो ॥ उभानास-
त्यारुद्रोऽ अधग्नाः पूषाभगः सरस्वतीजुषन्त ॥४८॥ इन्द्राग्नीमित्रावरुणा
॥ इन्द्राग्नीमित्रावरुणादितिꣳस्वः पृथिवीन्द्यामरुतः पर्वताँ२॥ अपः
॥ हुवेविष्णुम्पूषणम्ब्रह्मणस्पतिम्भगन्नुशꣳसꣳसवितारमूतये ॥४९॥
अस्म्मेरुद्राः ॥ अस्म्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौसजोषाः ॥ यः ५८
शꣳसतेस्तुवतेधायिपज्रऽ इन्द्रज्येष्ठाऽअस्म्माँ२॥ऽअवन्तुदेवाः ॥५०॥ अ

CC-0. In Public Domain. Digitization by eGangotri

घर्ङ्ङ्वौऽअद्य ॥ अर्वाङ्ङ्वौऽअद्या भवतायजत्राऽआवोहार्द्दिभयमानोव्ययेयम्
॥ त्राद्धन्नोदेवानिजुरोवृकस्यत्राद्धङ्कर्तादवपदोयजत्राः ॥५१॥ विश्श्वेऽअद्य ॥
मरुतोविश्श्वऽऊतीविश्श्वेभवन्त्वग्नयःसमिद्धाः ॥ विश्श्वेनोदेवाऽअवसागमन्तु
विश्श्वमस्तुद्रविणंवाजोऽअस्म्मे ॥५२॥ विश्श्वेदेवाः ॥ शृणुतेमर्ठं हवम्मेयेऽ
अन्तरिक्षेयऽउपद्यविष्ठ ॥ येऽअग्निजिह्वाऽउतवायजत्राऽआसद्यास्मिन्बर्हि
षिमादयद्ध्वम् ॥५३॥ देवेब्भ्योहि ॥ प्रथमंयज्ञियेब्भ्योमृतत्वर्ठं सुवसिभागमुत्तमम्
॥ आदिद्दामानर्ठं सवितर्व्यूर्णुषेनूचीनाजीवितामानुषेब्भ्यः ॥५४॥ प्रवायुम्
॥ प्रवायुमच्छाबृहतीमनीषाबृहद्रयिंविश्श्ववारर्ठं रथप्प्राम् ॥ द्युतद्यामा
नियुतःपत्यमानःकविःकविमियक्षसिप्प्रयज्ज्यो ॥५५॥ इन्द्रवायूऽइमे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 सुताऽउपुष्प्रयोभिंरागतम् ॥ इन्द्रंवोवामुशन्तिहि ॥५६॥ मित्रार्ठंहुवे ॥ पुतदक्षं
वरुणञ्चरिशादसम् ॥ धियंङ्कृताचीठंसाधन्ता ॥५७॥ दस्रायुवाकवः ॥ सु
तानासत्यावृक्तबर्हिषः ॥ आयातर्ठंरुद्रवर्तनी ॥तम्नुत्कयायंत्रेनः॥५८॥
धिदद्यर्दि ॥ धिदद्यदीसुरमोरुगणमहुर्स्मंहिपाथः पुर्थ्यठंसध्यकः ॥अग्नी
न्नयत्सुपद्यक्षेराणामछारवंम्प्रथमाजानतीगात् ॥५९॥ नहिस्पशम् ॥ नहि
स्पशमविदन्नन्यमस्माद्वैश्वानरात्पुरऽएतारमग्नेः ॥एमेनमवृधन्नमृताऽ
अमर्त्यंवैश्वानरक्षैत्रजित्यायदेवाः ॥६०॥ उग्राविघनिनां ॥उग्राविघनिनामृ
धऽइन्द्राग्नीहवामहे ॥तानोमृडातऽईदृशे ॥६१॥ उपास्मै ॥ गायतानरः पवमा
नायेन्दवे॥अभिदेवाँ॥ऽइयक्षते ॥६२॥ येत्वा ॥ हित्वामघवन्नवर्द्धन्मेशाम्बु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रेहरियोयेगविष्टौ ॥ येत्वानूनमनुमदन्तिविप्राः पिबेन्द्रसोमठंसगणोमरु-
द्भिः ॥६३॥ जनिष्ठाऽउग्रः ॥ सहसेतुरायमन्द्रऽओजिष्ठोबहुलाभिमानः ॥ अ
वर्द्धन्निन्द्रम्मरुतश्चिदत्रमातायद्वीरन्दधनद्धनिष्ठा ॥६४॥ आतु ॥ आतूनऽइ
न्द्रवृत्रहन्नस्माकमर्द्धमागहि ॥ महान्महीभिरूतिभिः ॥६५॥ त्वमिन्द्र ॥ त्व-
मिन्द्रप्रतूर्त्तिष्वभिविश्वाऽअसिस्पृधः ॥ अशस्तिहाजनिताविश्वतूरसि-
त्वन्तूर्यतरुष्यतः ॥६६॥ अनुते ॥ अनुतेशुष्मन्तुरयन्तमीयतुः क्षोणीशि
शुन्नमातरा ॥ विश्वास्तेस्पृधः श्नथयन्तमन्यवेवृत्रंयदिन्द्रतूर्वसि ॥६७॥
यज्ञोदेवानाम् ॥ यज्ञोदेवानाम्प्रत्येतिसुम्नमादित्यासोभवतामृडयन्तः ॥ आ
वोर्वाचीसुमतिर्ववृत्याद्ठंहोश्चिद्यावरिवोवित्तरासत् ॥६८॥ अदब्धेभिः स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वितः ॥ पायुभिष्ट्वꣳ शिवेभिरद्यपरिपाहिनोगयम् ॥ हिरण्यजिह्वः सुवितायन
व्यसेरक्षामाकिर्न्नोऽअघशꣳसऽईशत ॥ ६९ ॥ प्रवीरया ॥ शुचयोदद्रिरेवाम-
ध्वर्युभिर्म्मधुमन्तः सुतासः ॥ वहवायोनियुतोयाह्यच्छापिबासुतस्यान्धसो
मदाय ॥ ७० ॥ गावऽउपा ॥ गावऽउपावतावतम्मही यज्ञस्यरप्सुदा ॥ उभाकर्णा
हिरण्यया ॥ ७१ ॥ काव्ययोराजानेषु ॥ काव्ययोराजानेषुक्रत्वादक्षस्यदुरोणे
॥ रिशादसासधस्थऽआ ॥ ७२ ॥ दैव्यावध्वर्यू ॥ दैव्यावध्वर्यूऽआगतꣳरथेनसू
र्यत्वचा ॥ मध्वायज्ञꣳसमञ्जाथे ॥ तम्प्रत्नथायंवेनः ॥ ७३ ॥ तिरश्चीनोवित
तः ॥ तिरश्चीनोविततोरश्मिरेषामधः स्विदासी३दुपरिस्विदासी३त् ॥ रेतो ६०
धाऽआसन्महिमानऽआसन्त्स्वधाऽअवस्तात्प्रयतिः परस्तात् ॥ ७४ ॥ आरोदसी

॥ऽ अपृणुदास्त्वेमर्द इज्जुतंय्ये दैन मुपसोऽ अधारयन् ॥ सोऽ अंहुराच्चुपरिणी

यते कुविरत्युनघाजसातयेचनौहितः ॥७५॥ उक्थेभि र्वृत्रहन्तमा ॥ उक्थे

भिर्वृत्रहन्तमायामन्दानाचिदागिरा ॥ आङ्गूषैराविवासतः ॥७६॥ उपनः ॥

सूनवोगिरः शृण्वन्त्वमृतस्ययेे ॥ सुमृडीकाभवन्तुनः ॥७७॥ ब्रह्माणिमे ॥ सु

तःशर्ठः सुतासः शुष्मऽ इयर्ति प्रभृतोमेऽ अद्रिः ॥ आशासतेप्रतिहर्यन्त्यु

क्थेमाहरीवहतस्तानोऽ अच्छ ॥७८॥ अनुतमाते ॥ मघवन्नकिन्नुनत्वावाँ ॥ऽ

अस्तिदेवताविदानः ॥ नजायमानोनशतेनजातोयानिकरिष्याकृणुहिप्रवृ

द्ध ॥७९॥ तदित् ॥ तदिदासभुवनेषुज्येष्ठंयतोजज्ञऽ उग्रस्त्वेषनृम्णः ॥ सद्यो

जज्ञानोनिरिणातिशत्रुननुयंविश्वेमदन्त्यूमाः ॥८०॥ इमाऽउत्वा ॥ पुरूवसोगिरो

CC-0. In Public Domain. Digitization by eGangotri

यईन्तु वा मम ॥ पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥८१॥ यस्यायम्
॥ यस्यायं विश्वऽआर्यो दासः शेवधिपाऽअरिः । तिरश्चिदर्ये रुशमे पवीर
वि तुभ्येत्सोऽअज्यते रयिः ॥८२॥ अयꣳ सहस्रम् ॥ अयꣳ सहस्रमृषिभिः स
हस्कृतः समुद्रऽइव पप्रथे ॥ सत्यः सोऽअस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ॥८३॥ अदब्धेभिः सवितः ॥ पायुभिष्ट्वꣳ शिवेभिरद्य परि पाहि नो गयम् ॥
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नोऽअघशꣳसऽईशत ॥८४॥ आ
नः ॥ आ नो यज्ञं दिविस्पृशं वायो याहि सुमन्मभिः ॥ अन्तः पवित्रऽउपरि श्री
णानोऽयꣳ शुक्रोऽअयामि ते ॥८५॥ इन्द्रवायू सुसन्दृशा ॥ सुहवेह हवामहे ॥ य-
था नः सर्वऽइज्जनोऽनमीवः सङ्गमे सुमनाऽअसत् ॥८६॥ ऋधगित्था ॥ स मर्त्यः श

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुमेदेवतातये ॥ योनूनम्मित्रावरुणावुभिष्टय ऽ आचक्रेहुव्यदातये ॥८७॥ आ-
यातम् ॥ आयातुमुपभूषतुम्मद्धः पिवतमाश्विना ॥ दुग्धम्पयो वृषणाजेन्या
वसुमानोमर्द्धिष्ट मागतम् ॥८८॥ प्रैतु ॥ प्रैतुब्रह्मणस्पतिः प्रदेव्येतुसूनृ
ता ॥ अच्छावीरन्नर्य्यम्पुङ्क्तिराधसन्देवायुज्ञन्नयन्तुनः ॥८९॥ चन्द्रमा ऽ अ
प्स्वु ॥ चन्द्रमा ऽ अप्स्वन्तरासुपुर्णोधावतेदिवि ॥ रयिम्पिशङ्गम्बहुलम्पुरु
स्पृहꣳहरिरेतिकनिक्रदत् ॥९०॥ देवन्देवम् ॥ देवन्देवंवोवसेदेवन्देवमभि
ष्टये ॥ देवन्देवꣳहुवेमवाजसातयेगृणन्तोदेव्याधिया ॥९१॥ दिविपृष्टः ॥ दि
विपृष्टो ऽ अरोचताग्निर्वैश्वानरोबृहन् ॥ क्ष्मयावृधान ऽ ओजसाचनोहितो-
ज्योतिषाबाधतेतमः ॥९२॥ इन्द्राग्नी ऽ अपात् ॥ इन्द्राग्नी ऽ अपादियम्पूर्वागा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संहि त्पृहतीभ्यः ॥ हित्वीशिरोजिह्वयावावदुच्चरंइडाꣳशत्रुदान्त्यक्रमीत् ॥९३॥ दुवा उ.अ.
६२ सोहि ॥ ब्रम्हामनवेसमन्यवोविश्वेसाकꣳसरातयः ॥ तेनोऽअद्यतेऽअपरन्तु ३३
चेतुनोभवन्तुवारिवोविदः ॥९४॥ अपाधमत् ॥ अपाधमदभिशस्तीरशस्ति
हाथेन्द्रोद्युम्न्याभवत् ॥ देवास्तेऽइन्द्रसख्यायेयेमिरेबृहद्भानोमरुद्गण
॥९५॥ प्रवः ॥ प्रवऽइन्द्रायबृहतेमरुतोब्रह्मार्च्चत ॥ वृत्रꣳहनतिवृत्रहाश
तक्रतुर्वज्रेणशतपर्व्वणा ॥९६॥ अस्येत् ॥ अस्येदिन्द्रोवावृधेवृष्ण्यꣳशवो
मदेसुतस्यविष्णवि ॥ अद्यातमस्यमहिमानमायवोनुष्टुवन्तिपूर्व्वथा ॥ इमा
ऽउत्वायस्यायमयꣳसहस्रमुर्द्ध्वऽऊषुणः ॥९७॥ इतिसंहितापाठेत्रयस्त्रिंशोऽ ६२
ध्यायः ॥३३॥ यज्जाग्रतः ॥ यज्जाग्रतोदूरमुदैतिदैवन्तदुसुप्तस्यतथैवै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ति॥ दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मेमनः शिवसङ्कल्पमस्तु॥१॥ येनकर्म्मा
णि॥ येनकर्म्माण्यपसोमनीषिणोयज्ञेकृण्वन्तिविदथेषुधीराः॥ यदपूर्व्वंयक्ष
मन्तः प्रजानान्तन्मेमनः शिवसङ्कल्पमस्तु॥२॥ यत्प्रज्ञानम्॥ यत्प्रज्ञा
नमुतचेतोधृतिश्चयज्ज्योतिरन्तरमृतम्प्रजासु॥ यस्मान्नऽऋतेकिञ्चनकर्म्म
क्रियतेतन्मेमनः शिवसङ्कल्पमस्तु॥३॥ येनेदम्॥ येनेदम्भूतम्भुवनम्भवि
ष्यत्परिगृहीतममृतेनसर्व्वम्॥ येनयज्ञस्तायतेसप्तहोतातन्मेमनः शिवस
ङ्कल्पमस्तु॥४॥ यस्मिन्नृचः॥ यस्मिन्नृचःसामयजूᳫंषियस्मिन्प्रतिष्ठिता
रथनाभाविवाराः॥ यस्मिंश्चित्तᳫं सर्व्वमोतम्प्रजानान्तन्मेमनः शिवसङ्कल्पम
स्तु॥५॥ सुषारथिरश्वानिव॥ सुषारथिरश्वानिवयन्मनुष्यान्नेनीयतेभी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संहि शुभिर्व्वाजिनऽइव ॥ हृत्प्रतिष्ठंयदजिरञ्जविष्ठन्तन्मेमनः शिवसङ्कल्पमस्तु ॥ ६ उ.अ.
६३ ॥ पितुन्नु ॥ स्तोषम्महोधर्म्माणन्तविषीम् ॥ यस्यत्रितोव्योजसावृत्रंविपर्व्वम ३४
र्द्दयत् ॥ ७ ॥ अन्विदनु ॥ अन्विदनुमतेत्वम्मन्न्यासैशञ्चनस्कृधि ॥ क्रत्वेदक्षाय
नोहिनुप्प्रणऽआयूंषितारिषः ॥ ८ ॥ शतम् ॥ १८०० ॥ अनुनः ॥ अनुनोद्या
नुमतिर्य्यज्ञन्देवेषुमन्न्यताम् ॥ अग्निश्चहव्यवाहनोभवतन्दाशुषेमयः ॥ ९
॥ सिनीवालिपृथुष्टुके ॥ सिनीवालिपृथुष्टुकेयादेवानामसिस्वसा ॥ जुषस्वहव्य
माहुतम्प्रजान्देविदिड्ढिनः ॥ १० ॥ पञ्चनद्यः ॥ पञ्चनद्यः सरस्वतीमपियन्तिस
स्रोतसः ॥ सरस्वतीतुपञ्चधासोदेशेभवत्सरित् ॥ ११ ॥ त्वमग्ने ॥ प्रथमोऽअङ्गि ६३
राऽऋषिर्द्देवोदेवानामभवः शिवः सखा ॥ तवव्रतेकवयोविद्मनापसोजायन्त

मरुतो भ्राजदृष्टयः ॥१२॥ त्वन्नः ॥ त्वन्नोऽ अग्ने तव देव पायुभिर्म्मघोनो रक्ष
तन्वश्च वन्द्य ॥ त्राता तोकस्य तनये गवामस्यनिमेषᳬं रक्षमाणस्तव व्रते ॥१३
उत्तानायामवे ॥ भरा चिकित्वान्सद्यः प्रवीता वृषणञ्जजान ॥ अरुषस्तूपो रुश
दस्य पाजऽ इडायास्पुत्रो वयुनेऽजनिष्ट ॥१४॥ इडायास्त्वा ॥ पदे वयन्नाभा पृथि
व्याऽ अधि ॥ जातवेदो निधीमह्यग्ने हव्याय वोढवे ॥१५॥ प्रमन्महे ॥ शवसा-
नाय शूषमाङ्गूषङ्गिर्वणसेऽ अङ्गिरस्वत् ॥ सुवृक्तिभिः स्तुवतऽ ऋग्मियायार्च्चा-
मार्कन्नरे विश्श्रुताय ॥१६॥ प्रवः ॥ प्रवो महे महि नमो भरध्वमाङ्गूष्यᳬं शव
सानाय साम ॥ येना नः पूर्वे पितरः पदज्ञाऽ अर्च्चन्तोऽ अङ्गिरसो गाऽ अविन्दन् ॥
॥१७॥ इच्छन्ति त्वा ॥ सोम्यासः सखायः सुन्वन्ति सोमन्दधति प्रयाᳬंसि ॥ ति

CC-0. In Public Domain. Digitization by eGangotri

तिक्षन्तेऽअभिशस्तिञ्जनानामिन्द्रत्वदाकश्चनहिप्रकेतः ॥१८॥ नतै ॥ दुरेपरमा
चिद्रजाꣳस्यातुप्रयाहिहरिवोहरिभ्याम् ॥ स्थिरायवृष्णेसवनाकृतेमायुक्ता
ग्रावाणःसमिधानेऽअग्नौ ॥१९॥ अषाढंयुत्सु ॥ पृतनासुपप्रिꣳस्वर्षामप्सां
वृजनस्यगोपाम् ॥ भरेषुजाꣳसुक्षितिꣳसुश्रवसञ्जयन्तन्त्वामनुमदेमसोम
॥२०॥ सोमोधेनुम् ॥ सोमोधेनुꣳसोमोऽअर्वन्तमाशुꣳसोमोवीरङ्कर्मण्यन्द
दाति ॥ सादन्यंविदथ्यꣳसभेयम्पितृश्रवणंयोददाशदस्मै ॥२१॥ त्वमि-
माः ॥ त्वमिमाऽओषधीःसोमविश्वास्त्वमपोऽअजनयस्त्वङ्गाः ॥ त्वमातत
न्थोर्वन्तरिक्षन्त्वञ्ज्योतिषावितमोववर्थ ॥२२॥ देवेननः ॥ देवेननोमनसादेव-
सोमरायोभागꣳसहसावन्नभियुध्य ॥ मात्वातनदीशिषेवीर्यस्योभयेभ्यःप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चिकित्सागाविष्टो ॥२३॥ अष्टौव्यि ॥ अष्टौव्यख्यत्ककुभः पृथिव्यास्त्रीधन्व-
योजनासप्तसिन्धून् ॥ हिरण्याक्षः सविता देवऽआगाद्दधद्रत्नादाशुषे वार्य्या-
णि ॥२४॥ हिरण्यपाणिः सविता ॥ विचर्षणिरुभेद्यावापृथिवीऽअन्तरीयते ॥
अपामीवाम्बाधते वेति सूर्यमभिकृष्णेन रजसा द्यामृणोति ॥२५॥ हिरण्य
हस्तोऽअसुरः ॥ सुनीथः सुमृडीकः स्ववाँयात्वर्वाङ् ॥ अपसेधन्रक्षसोया-
तुधानानस्थाद्देवः प्रतिदोषङ्गृणानः ॥२६॥ येते ॥ येते पन्थाः सवितः पूर्व्या-
सोरेणवः सुकृताऽअन्तरिक्षे ॥ तेभिर्न्नोऽअद्यपथिभिः सुगेभीरक्षाचनोऽअ
धिचब्रूहिदेव ॥२७॥ उभापिबतम् ॥ उभापिबतमश्विनोभानः शर्म्मयच्छतम् ॥
अविद्रियाभिरूतिभिः ॥२८॥ अप्नस्वतीमश्विना ॥ अप्नस्वतीमश्विना वाचं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संहि॰ मुस्म्मेकृतन्नोदस्वाघ्रूषणामनीषाम् ॥ अद्ध्युत्येवंसुनिह्वयेवांघुधेचनोभवतु उ॰अ॰
६५ घाजसातौ ॥२९॥ घुभिरक्तुभिः ॥ घुभिरक्तुभिः परिपातमुस्म्मानरिष्टेभिर ३४
श्विनासौभगेभिः ॥ तन्नोमित्त्रोघरुणोमामहन्तामदितिः सिन्धुः पृथिवी ऽ
उतद्यौः ॥३०॥ आकृष्ष्णेन ॥ रजसाघर्तमानोनिवेशयन्नमृतम्मर्त्यञ्च ॥ हिर
ण्ययेनसविितारथेनादेवोयातिभुवनानिपश्यन् ॥३१॥ आरात्रि ॥ पार्थिवꣳ
रजः पितुरप्प्रायिधामभिः ॥ दिवः सदाꣳसिबृहतीवितिष्ठस ऽ आत्वेषंघ
र्ततेतमः ॥३२॥ उषस्तत् ॥ उषुस्तच्चित्रमाभरास्म्मभ्यंवाजिनीवति ॥ येनतो
कञ्चतनयञ्चधामहे ॥३३॥ प्रातरग्निम् ॥ प्रातरग्निम्प्रातरिन्द्रꣳ हवामहेप्रा ६५
तर्म्मित्त्रावरुणाप्प्रातरश्विना ॥ प्रातर्ब्भगम्पुषणम्ब्रह्मणस्प्पतिम्प्रातः सो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मसुतरुद्रꣳ हुवेम ॥३४॥ प्रातुर्ज्जितम्भगम् ॥ प्रातुर्ज्जितम्भगमुग्रꣳ हुवेम व
यम्पुत्रमदितेर्य्यो विधर्त्ता ॥ आद्ध्रश्चिद्यम्मन्न्यमानस्तुरश्चिद्राजाचिद्यम्भगं
म्भक्षीत्याह ॥३५॥ भगप्रणेतः ॥ भगप्रणेतर्ब्भगसत्यराधो भगेमान्धियमु
दवा ददन्नः ॥ भगप्रनो जनय गोभिरश्वैर्ब्भग प्रनृभिर्न्नृवन्तः स्याम ॥३६॥
उतेदानीम् ॥ उतेदानीम्भगवन्तः स्यामोत प्रपित्वऽ उत मद्ध्येऽ अह्नाम् ॥ उतो
दिता मघवन्त्सूर्य्यस्य वयन्देवानाꣳ सुमतौ स्याम ॥३७॥ भगऽएव ॥ भगवाँ२ऽ
अस्तु देवास्तेन वयम्भगवन्तः स्याम ॥ तन्त्वा भग सर्व्वऽ इज्जोहवीति स नो भग पु
रऽ एता भवेह ॥३८॥ समद्ध्वराय ॥ समद्ध्वरायोषसो नमन्त दधिक्रावेव शुचये प
दाय ॥ अर्वाचीनं वसुविदम्भगन्नो रथमिवाश्वा वाजिनऽ आवहन्तु ॥३९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अश्वावतीर्गोमतीः ॥ अश्वावतीर्गोमतीर्न्नऽउषासो वीरवतीः सदमुच्छन्तु
भद्राः ॥ घृतन्दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिः सदा नः ॥ ४० ॥ पूष
न्तव ॥ व्रते वयन्न रिष्येम कदाचन ॥ स्तोतारस्तऽइह स्मसि ॥ ४१ ॥ पथस्प-
थः परिपतिम् ॥ पथस्पथः परिपतिं वचस्या कामेन कृतोऽअभ्यानडर्कम् ॥ स
नो रासच्छुरुधश्चन्द्राग्रा धियंधियꣳ सीषधाति प्र पूषा ॥ ४२ ॥ त्रीणि पदा वि च
क्रमे विष्णुर्गोपाऽअदाभ्यः ॥ अतो धर्माणि धारयन् ॥ ४३ ॥ तद्विप्रासः ॥ तद्वि
प्रासो विपन्यवो जागृवाꣳसः समिन्धते ॥ विष्णोर्यत्परमम्पदम् ॥ ४४ ॥ घृ
तवती भुवनानाम् ॥ घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ॥ ६६
द्यावापृथिवी वरुणस्य धर्मणा विष्कभितेऽअजरे भूरिरेतसा ॥ ४५ ॥ ये नः सप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्काऽ अपतेभवन्त्विन्द्राग्निभ्यामवबाधामहेतान् ॥ वसवोरुद्राऽ आदित्याऽउ
परिस्पृशम्मोग्रञ्चेत्तारमधिराजमक्रन् ॥ ४६ ॥ आनासत्या ॥ त्रिभिरेकादशै-
रिहदेवेभिर्यातम्मधुपेयमश्विना ॥ प्रायुस्तारिष्टन्नीरपाᳫंसिमृक्षतᳫं सेध
तन्द्वेषोभवतᳫं सचाभुवा ॥ ४७ ॥ एषवः ॥ एषवस्तोमोमरुतऽ इयङ्गीर्मान्दा
र्यस्यमान्यस्यकारोः ॥ एषायासीष्टतन्वेवयांविद्यामेषंवृजनञ्जीरदानु
म् ॥ ४८ ॥ सहस्तोमाः सहछन्दसः ॥ सहस्तोमाः सहछन्दसऽ आवृतः सहप्र
माऽ ऋषयः सप्तदैव्याः ॥ पूर्वेषाम्पन्थामनुदृश्यधीराऽ अन्वालेभिरेरथ्यो
नरश्मीन् ॥ ४९ ॥ आयुष्यंवर्चस्यम् ॥ आयुष्यंवर्चस्यᳫं रायस्पोषमौद्भिद
म् ॥ इदᳫं हिरण्यंवर्चस्वज्जैत्रायाविशतादुमाम् ॥ ५० ॥ नतत् ॥ नतद्रक्षाᳫंसि

नपिशाचास्तरन्तिदेवानामोजः प्रथमजꣳह्येतत् ॥ योबिभर्तिदाक्षायणꣳहि
रण्यꣳसदेवेषुकृणुतेदीर्घमायुः समनुष्येषुकृणुतेदीर्घमायुः ॥५१॥ यदाब
ध्नन् ॥ यदाबध्नन्दाक्षायणाहिरण्यꣳशतानीकायसुमनस्यमानाः ॥ तन्म
ऽआबध्नामिशतशारदायायुष्माञ्जरदष्टिर्यथासम् ॥५२॥ उतनः ॥ उतनो
ऽहिर्बुध्न्यः शृणोत्वजऽएकपात्पृथिवीसमुद्रः ॥ विश्वेदेवाऽऋतावृधोहुवा-
नास्तुतामन्त्राः कविशस्ताऽअवन्तु ॥५३॥ इमागिरः ॥ इमागिरऽआदित्येभ्यो
घृतस्नूः सनाद्राजभ्योजुह्वाजुहोमि ॥ शृणोतुमित्रोऽअर्यमाभगोनस्तुवि-
जातोवरुणोदक्षोऽअꣳशः ॥५४ सप्तऽऋषयः सप्तऽऋषयः प्रतिहिताः शरीरे
सप्तरक्षन्तिसदमप्रमादम् ॥ सप्तापः स्वपतोलोकमीयुस्तत्रजागृतोऽअस्व

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रजोसन्नुसदौंचदेवो ॥५५॥ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे ॥ उपप्र-
यन्तुमरुतंः सुदानवः इन्द्रप्राशूर्भवासचा ॥५६॥ प्रनुनम् ॥ प्रनुनम्ब्रह्मणस्
स्पतिर्म्मन्त्रंवदत्युक्थ्यम् ॥ यस्मिन्निन्द्रोवरुणोमित्रोऽअर्य्यमादेवाऽ तूकांछं
सिचक्रिरे ॥५७॥ ब्रह्मणस्पते ॥ ब्रह्मणस्पतेत्वमस्ययन्तासूक्तस्यबोधित
नयञ्चजिन्व ॥ विश्वन्तद्भद्रंयदवन्ति देवाबृहद्वदेमविदथेसुवीराः ॥ यऽइमा
विश्वाविश्वकर्म्मायोनः पितान्नपतेन्नस्यनोदेहि ॥५८॥ ६॥ इतिसंहितापा
ठेचतुस्त्रिंशोऽध्यायः ॥३४॥ अपेतः ॥ अपेतोयन्तुपणयोसुम्न्नादेवपीय
वः ॥ अस्यलोकः सुतावतः ॥ द्युभिरहोभिरक्तुभिर्व्यक्तंयमोददात्ववसानम
स्मै ॥१॥ सवितातें ॥ सवितातेशरीरेभ्यः पृथिव्याल्लोकमिच्छतु ॥ तस्मैयुञ्जन्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संहि सुस्रियाः ॥२॥ वायुः पुनातु ॥ सविता पुनात्वग्नेर्भ्राजसा सूर्य्यस्य वर्चसा ॥ विमु उ.अ.
६८ च्यन्तामुस्रियाः ॥३॥ अश्वत्थेवः ॥ अश्वत्थे वो निषदनम्पर्णे वो वसतिष्कृता ३५
॥ गोभाजऽ इत्किलासथ यत्सनवथ पूरुषम् ॥४॥ सविता ते ॥ शरीराणि मातुरु
पस्थऽ आवपतु ॥ तस्मै पृथिवि शम्भव ॥५॥ प्रजापतौ त्वा ॥ देवतायामुपोदके-
लोके निदधाम्यसौ ॥ अप नः शोशुचदघम् ॥६॥ परम्मृत्यो ॥ परम्मृत्योऽ अनु
परेहि पन्थां यस्तेऽ अन्यऽ इतरो देवयानात् ॥ चक्षुष्मते शृण्वते ते ब्रवीमि मा
नः प्रजाᳬं रीरिषो मोत वीरान् ॥७॥ शंवातः ॥ शᳬं हि ते घृणिः शन्ते भवन्त्विष्ट
काः ॥ शन्ते भवन्त्वग्नयः पार्थिवासो मा त्वाभिशूशुचन् ॥८॥ कल्पन्तान्ते ॥ दि ६८
शस्तुभ्यमापः शिवतमास्तुभ्यम्भवन्तु सिन्धवः ॥ अन्तरिक्षᳬं शिवन्तुभ्यङ्कल्पन्तां

न्तान्तेदिशः सर्वाः ॥९॥ अश्मन्वतीरीयतेसꣳरभध्वमुत्तिष्ठतप्रतरतास
खायः ॥ अत्राजहीमोशिवायेऽअसञ्छिवान्वयमुत्तरेमाभिवाजान् ॥१०॥
अपाघम् ॥ अपाघमपकिल्बिषमपकृत्यामपोरपः ॥ अपामार्गत्वमस्म
दपदुःष्वप्न्यꣳसुव ॥११॥ सुमित्रियानः ॥ सुमित्रियानऽआपऽओषधयः
सन्तुदुर्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टियञ्चवयन्द्विष्मः ॥१२॥ अनड्वा
हमन्वारभामहेसौरभेयꣳस्वस्तये ॥ सनऽइन्द्रऽइवदेवेभ्योवह्निः सन्ता
रणोभव ॥१३॥ उद्वयम् ॥ उद्वयन्तमसस्परिस्वः पश्यन्तऽउत्तरम ॥ देवन्दे
वत्रासूर्यमगन्मज्योतिरुत्तमम् ॥१४॥ इमञ्जीवेभ्यः ॥ परिधिन्दधामिमे-
षान्नुगादपरोऽअर्थमेतम् ॥ शतञ्जीवन्तुशरदः पुरूचीरन्तर्मृत्युन्दधताम्प

CC-0. In Public Domain. Digitization by eGangotri

संहि ६९

उ.अ. ३५

र्वितेन ॥१५॥ अग्नऽआयूꣳषि ॥ पवसऽआसुवोर्ज्जमिषञ्चनः ॥ आरेबाधस्व
दुच्छुनाम् ॥१६॥ आयुष्मानग्ने ॥ हविषावृधानो घृतप्रतीको घृतयोनिरेधि
॥ घृतम्पीत्वामधुचारुगव्यम्पितेवपुत्रमभिरक्षतादिमान्त्स्वाहा ॥१७॥ प
रीमे ॥ गामनेषतपर्य्यग्निमहृषत ॥ देवेष्वक्रतश्रवःकऽइमाँ २॥ऽआदध
र्षति ॥१८॥ क्रव्यादमग्निम् ॥ क्रव्यादमग्निम्प्रहिणोमिदूरंयमराज्ञ्यङ्गच्-
छतुरिप्रवाहः ॥ इहैवायमितरोजातवेदादेवेभ्योहव्यंवहतुप्रजानन् ॥१९
॥ वहवपाम् ॥ वहवपाञ्जातवेदः पितृभ्योयत्रैनान्वेत्थनिहितान्पराके ॥
मेदसःकुल्याऽउपतान्त्स्रवन्तुसत्याऽएषामाशिषःसन्नमन्ताꣳस्वाहा ॥२०॥ ६९
स्योनापृथिवि ॥ नोभवानृक्षरानिवेशनी ॥ यच्छानःशर्म्मसप्रथाः ॥ अपनःशो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शुंचदुघम् ॥२१॥ अस्म्मात्वम् ॥ अस्म्मात्वमधिजातोसित्वदयञ्जायताम्पुनः ॥
असौस्वर्गायलोकायस्वाहा ॥२२॥ इतिसंहितापाठेपञ्चत्रिंशोऽध्यायः ॥३५
॥ ऋचंवाचम् ॥ ऋचंवाचम्प्रपद्येमनोयजुः प्रपद्येसामप्प्राणम्प्रपद्येच
क्षुः श्रोत्रम्प्रपद्ये ॥ वागोजः सुहौजोमयिप्प्राणापानौ ॥१॥ यन्मे ॥ छिद्रञ्च
क्षुषोहृदयस्यमनसोवातितृण्णम्बृहस्प्पतिर्म्मेतद्दधातु ॥ शन्नोभवतु भुव
नस्ययस्प्पतिः ॥२॥ भूर्भुवः ॥ भूर्भुवः स्वः ॥ तत्सवितुर्वरेण्यम्भर्गोदेव-
स्यधीमहि ॥ धियोयोनः प्प्रचोदयात् ॥३॥ कयानः ॥ कयानश्चित्रऽआभु
वदूतीसदावृधः सखा ॥ कयाशचिष्ठयावृता ॥४॥ कस्त्वा ॥ सत्योमदानाम्मꣳ
हिष्ठोमत्सदन्धसः ॥ दृढाचिदारुजेवसु ॥५॥ अभीषुणः ॥ सखीनामविता

CC-0. In Public Domain. Digitization by eGangotri

जरितृणाम् ॥ शतम्भवास्यूतिभिः ॥६॥ कया त्वम् ॥ कयात्वन्नऽऊत्याभिप्र
मन्दसेवृषन् ॥ कयास्तोतृभ्यऽआभर ॥७॥ इन्द्रोविश्वस्य ॥ राजति ॥ शन्नोऽ
अस्तुद्विपदेशञ्चतुष्पदे ॥८॥ शन्नोमित्रः शंवरुणः शन्नोभवत्वर्य्यमा ॥ शन्न
ऽइन्द्रोबृहस्पतिः शन्नोविष्णुरुरुक्रमः ॥९॥ शन्नोवातः ॥ पवताꣳ शन्नस्तप
तुसूर्य्यः । शन्नः कनिक्रदद्देवः पर्ज्जन्योऽअभिवर्षतु ॥१०॥ अहानिशम् ॥ अ
हानिशम्भवन्तुनः शꣳरात्रीः प्रतिधीयताम् ॥ शन्नऽइन्द्राग्नीभवतामवोभिः
शन्नऽइन्द्रावरुणारातहव्या ॥ शन्नऽइन्द्रापूषणावाजसातौशमिन्द्रासोमासु
वितायशंय्योः ॥११॥ शन्नः ॥ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शंय्यो
रभिस्रवन्तुनः ॥१२॥ स्योनापृथिवि ॥ नोभवानृक्षरानिवेशनी ॥ यच्छानः शर्म्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुप्रथाः ॥ १३॥ आपोहि ॥ ष्ठामयोभुवस्तानऽऊर्ज्जेदधातन ॥ मुहेरणायचक्षसे
॥ १४॥ योवः शिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ १५॥ तस्म्मा
ऽअरम् ॥ तस्म्माऽअरङ्गमामवोयस्यक्षयायजिन्न्वथ ॥ आपोजनयथाचनः ॥
॥ १६॥ द्यौः शान्तिः ॥ द्यौः शान्तिरन्तरिक्षठं शान्तिः पृथिवीशान्तिरापः शान्ति
रोषधयः शान्तिः ॥ वनस्प्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः स-
र्व्वठं शान्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि ॥ १७॥ दृते दृठं हमामित्रस्यमा
चक्षुषासर्व्वाणिभूतानिसमीक्षन्ताम् ॥ मित्रस्याहञ्चक्षुषासर्व्वाणिभूतानि
समीक्षे ॥ मित्रस्यचक्षुषासमीक्षामहे ॥ १८॥ दृते दृठं हमा ॥ ज्योक्तेसन्दृशिजी
व्यासञ्ज्योक्तेसन्दृशिजीव्यासम् ॥ १९॥ नमस्तेहरसेशोचिषेनमस्तेऽअस्त्वर्चिषे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥अन्न्याँस्तेऽअस्म्मत्तपन्तुहेतयः पावकोऽअस्म्मब्भ्यꣳ शिवोभव॥२०॥ नमस्ते
॥ऽअस्तुविद्युतेनमस्तेस्तनयित्नवे॥ नमस्तेभगवन्नस्तुयतः स्वः समीहसे॥२१
॥यतोयतः समीहसे ततोनोऽअभयङ्कुरु॥ शन्नः कुरुप्रजाभ्योभयन्नः पशु
भ्यः॥२२॥ सुमित्रियानः॥ सुमित्रियानऽआपऽओषधयः सन्तुदुर्म्मित्रिया
स्तस्मैसन्तुयोस्मान्द्वेष्टियञ्चवयन्द्विष्मः॥२३॥ तच्चक्षुः॥ तच्चक्षुर्द्देवहितम्पु
रस्ताच्छुक्रमुच्चरत्॥ पश्येमशरदः शतञ्जीवेमशरदः शतꣳ शृणुयामशर
दः शतम्प्रब्रवामशरदः शतमदीनाःऽस्यामशरदः शतम्भूयश्चशरदः श-
तात्॥२४॥ इतिसंहितायांदीर्घपाठेषट्त्रिꣳशोऽध्यायः॥३६॥ देवस्यत्वा॥
सवितुःऽप्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम्॥ आददेनारिरसि॥१॥ यु

ञ्जते मनः ॥ युञ्जते मनऽउत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ॥
वि होत्रा दधे वयुनाविदेकऽइन्मही देवस्य सवितुः परिष्टुतिः ॥२॥ देवी द्यावा
पृथिवी ॥ मखस्य वामद्य शिरो राध्यासन्देवयजने पृथिव्याः ॥ मखाय त्वा मख
स्य त्वा शीर्ष्णे ॥३॥ देव्यो वम्रयः ॥ देव्यो वम्रयो भूतस्य प्रथमजा मखस्य
वोऽद्य शिरो राध्यासन्देवयजने पृथिव्याः ॥ मखाय त्वा मखस्य त्वा शीर्ष्णे ॥४
॥शतम्॥१९००॥ इयत्यग्रे ॥ इयत्यग्रऽआसीन्मखस्य तेऽद्य शिरो राध्यासन्दे
वयजने पृथिव्याः ॥ मखाय त्वा मखस्य त्वा शीर्ष्णे ॥५॥ इन्द्रस्यौजः ॥ इन्द्र-
स्यौजस्थ मखस्य वोऽद्य शिरो राध्यासन्देवयजने पृथिव्याः ॥ मखाय त्वा मखस्य
त्वा शीर्ष्णे ॥ मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ मखाय त्वा मखस्य त्वा शीर्ष्णे ॥६॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संहि॰ प्रैतु ॥ ब्रह्मणस्पतिः प्रदेव्येतुसूनृता ॥ अच्छावीरन्नर्य्यम्पङ्क्तिराधसन्देवायज्ञ उ॰अ॰
७२ न्नयन्तुनः ॥ मखायत्वामखस्यत्वाशीर्ष्णे ॥ मखायत्वामखस्यत्वाशीर्ष्णे ॥ म ३७
खायत्वामखस्यत्वाशीर्ष्णे ॥ ७ ॥ मखस्यशिरः ॥ मखस्यशिरोसि ॥ मखायत्वा
मखस्यत्वाशीर्ष्णे ॥ मखस्यशिरोसि ॥ मखायत्वामखस्यत्वाशीर्ष्णे ॥ मखस्य
शिरोसि ॥ मखायत्वामखस्यत्वाशीर्ष्णे ॥ मखायत्वामखस्यत्वाशीर्ष्णे ॥ म
खायत्वामखस्यत्वाशीर्ष्णे ॥ मखायत्वामखस्यत्वाशीर्ष्णे ॥ ८ ॥ अश्वस्यत्वा ॥
वृष्णः शक्नाधूपयामिदेवयजनेपृथिव्याः ॥ मखायत्वामखस्यत्वाशीर्ष्णे ॥ अ
श्वस्यत्वावृष्णः शक्नाधूपयामिदेवयजनेपृथिव्याः ॥ मखायत्वामखस्यत्वा ७२
शीर्ष्णे ॥ अश्वस्यत्वावृष्णः शक्नाधूपयामिदेवयजनेपृथिव्याः ॥ मखायत्वा

मखस्यत्वाशीर्ष्णे ॥ मखायत्वामखस्यत्वाशीर्ष्णे ॥ मखायत्वामखस्यत्वा
शीर्ष्णे ॥ मखायत्वामखस्यत्वाशीर्ष्णे ॥ ९ ॥ ऋजवेत्वा ॥ साधवेत्वासुक्षित्यै
त्वा ॥ मखायत्वामखस्यत्वाशीर्ष्णे ॥ मखायत्वामखस्यत्वाशीर्ष्णे ॥ मखाय
त्वामखस्यत्वाशीर्ष्णे ॥ १० ॥ यमायत्वा ॥ मखायत्वासूर्यस्यत्वातपसे ॥ देव-
स्त्वासविता मध्वानक्तु पृथिव्याः संस्पृशस्पाहि ॥ अर्चिरसि शोचिरसितपो
सि ॥ ११ ॥ अनाधृष्टापुरस्तात् ॥ अनाधृष्टापुरस्तादग्नेराधिपत्यऽ आयुर्म्मेदाः पु
त्रवतीदक्षिणतऽ इन्द्रस्याधिपत्येप्रजाम्मेदाः ॥ सुषदापश्चाद्देवस्यसवितुराधि
पत्येचक्षुर्म्मेदाऽ आश्रुतिरुत्तरतोधातुराधिपत्येरायस्पोषम्मेदाः ॥ विधृतिरु
परिष्टाद्बृहस्पतेराधिपत्यऽ ओजोमेदाविश्वाभ्योमानाष्ट्राभ्यस्पाहि मनोरश्वा

CC-0. In Public Domain. Digitization by eGangotri

संहि सि ॥१२॥ स्वाहामुरुद्भिः ॥ परिश्रीयस्वदिवः सुर्थं स्पृशस्पाहि ॥ मधुमधुमधु उ.अ.
७२ ॥१३॥ गर्भोदेवानाम् ॥ गर्भोदेवानाम्पितामतीनाम्पतिः प्रजानाम् ॥ सन्देवोदे ३७
वेनसवित्रागतसर्ठं सूर्येणरोचते ॥१४॥ समग्निः ॥ समग्निरग्निनागतसन्दे-
वेनसवित्रासर्ठं सूर्येणारोचिष्ट ॥ स्वाहासमग्निस्तपसागतसन्दैव्येनसवित्रा
सर्ठं सूर्येणारूरुचत ॥१५॥ धर्तादिवः ॥ धर्तादिवोविभातितपसस्पृथिव्या
न्धर्तादेवोदेवानाममर्त्यस्तपोजाः ॥ वाचमस्मेनियच्छदेवायुवम् ॥१६॥ अप-
श्यङ्गोपाम् ॥ अपश्यङ्गोपामनिपद्यमानमाचपराचपथिभिश्चरन्तम् ॥ सस
ध्रीचीः सविषूचीर्वसान आवरीवर्तिभुवनेष्वन्तः ॥१७॥ विश्वासाम्भुवाम् ॥ ७२
विश्वासाम्भुवाम्पतेविश्वस्यमनसस्पतेविश्वस्यवचसस्पतेसर्वस्यवच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सस्पते ॥ देवश्श्रुत्त्वन्देवघर्म्मदेवोदेवान्पाह्यत्रप्रावीरनुवान्देववीतये ॥ मधु
माध्वीभ्याम्मधुमाधूचीभ्याम् ॥ १८ ॥ हृदेत्वा ॥ मनसेत्वादिवेत्वासूर्य्यायत्वा ॥ ऊ
र्ध्वोऽअध्वरन्दिविदेवेषुधेहि ॥ १९ ॥ पितानः ॥ पितानोसिपितानोबोधिनमस्ते
अस्तुमामाहिꣳसीः ॥ त्वष्टृमन्तस्त्वासपेमपुत्रान्पशून्मयिधेहिप्रजामस्मा
सुधेह्यरिष्टाहꣳसहपत्याभूयासम् ॥ २० ॥ अहः केतुना ॥ जुषताꣳसुज्यो
तिर्ज्ज्योतिषास्वाहा ॥ रात्रिः केतुनाजुषताꣳसुज्योतिर्ज्ज्योतिषास्वाहा ॥ २१ ॥
इतिवाजसनेयसंहितायांदीर्घपाठेसप्तत्रिꣳशोऽध्यायः ॥ ३७ ॥ देवस्यत्वा ॥
देवस्यत्वासवितुः प्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ आददेदित्यैरास्ना
सि ॥ १ ॥ इडऽएहि ॥ इडऽएह्यदितऽएहिसरस्वत्येहि ॥ असावेह्यसावेह्यसावेहि

CC-0. In Public Domain. Digitization by eGangotri

संहि ॥२॥ अदित्यैरास्नासीन्द्राण्याऽउष्णीषः ॥ पूषासि घर्माय दीष्व ॥३॥ अ- उ.अ.
७४ श्विभ्याम्पिन्वस्व सरस्वत्यै पिन्वस्वेन्द्राय पिन्वस्व ॥ स्वाहेन्द्रवत्स्वाहेन्द्रव- ३८
त्स्वाहेन्द्रवत् ॥४॥ यस्ते ॥ स्तनः शशयो यो मयोभूर्यो रत्नधा वसुविद्यः सुद-
त्रः ॥ येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवे कः ॥ उर्वन्तरिक्षम-
न्वेमि ॥५॥ गायत्रञ्छन्दः ॥ गायत्रञ्छन्दोसि त्रैष्टुभञ्छन्दोसि द्यावापृथिवी
भ्यान्त्वा परिगृह्णाम्यन्तरिक्षेणोपयच्छामि ॥ इन्द्राश्विना मधुनः सारघस्य घ-
र्म्मम्पात वसवो यजत वाट् ॥ स्वाहा सूर्यस्य रश्मये वृष्टिवनये ॥६॥ समुद्राय-
त्वा ॥ वाताय स्वाहा सरिराय त्वा वाताय स्वाहा ॥ अनाधृष्याय त्वा वाताय स्वा ७४
हाऽप्रतिधृष्याय त्वा वाताय स्वाहा ॥ अवस्यवे त्वा वाताय स्वाहाऽशिमिदाय त्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वातायस्वाहा ॥७॥ इन्द्रायत्वा ॥ वसुमतेरुद्रवतेस्वाहेन्द्रायत्वादित्यवतेस्वा
हेन्द्रायत्वाभिमातिघ्नेस्वाहा ॥ सवित्रेत्वऽऋभुमतेविभुमतेवाजवतेस्वाहाबृ
हस्पतयेत्वाविश्वदेव्यावतेस्वाहा ॥८॥ यमायत्वाङ्गिरस्वतेपितृमतेस्वाहा ॥ स्वा
हाघर्म्मायस्वाहाघर्म्मःपित्रे ॥९॥ विश्वाऽआशाः ॥ विश्वाऽआशादक्षिणस
द्विश्वान्देवानयाडिह ॥ स्वाहाकृतस्यघर्म्मस्यमधोःपिबतमश्विना ॥१०॥ दि
विधाः ॥ दिविधाऽइमंयज्ञमिमंयज्ञन्दिविधाः ॥ स्वाहाग्नयेयज्ञियायशंय
जुर्भ्यः ॥११॥ अश्विनाघर्म्मम् ॥ अश्विनाघर्म्मम्पातꣳहार्द्दानमहर्द्दिवाभि-
रूतिभिः ॥ तन्त्रायिणेनमोद्यावापृथिवीभ्याम् ॥१२॥ अपातामश्विना ॥ घर्म्म
मनुद्यावापृथिवीऽअमꣳसाताम् ॥ इहैवरातयःसन्तु ॥१३॥ इषेपिन्वस्व ॥ इ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षे पिन्वस्वोर्ज्जे पिन्वस्व ब्रह्मणे पिन्वस्व क्षत्त्राय पिन्वस्व द्यावापृथिवीभ्यां पि
न्वस्व ॥ धर्म्मासि सुधर्म्मामेन्यस्मे नृम्णानि धारय ब्रह्म धारय क्षत्त्रं धारय
विशं धारय ॥१४॥ स्वाहा पूष्णे ॥ शरसे स्वाहा ग्रावभ्यः स्वाहा प्रतिरवेभ्यः ॥ स्वा
हा पितृभ्य ऽऊर्ध्वबर्हिर्भ्यो घर्म्मपावभ्यः स्वाहा द्यावापृथिवीभ्याᳬं स्वाहा विश्वे
भ्यो देवेभ्यः ॥१५॥ स्वाहा रुद्राय रुद्रहूतये स्वाहा सञ्ज्योतिषा ज्योतिः ॥ अहः
केतुना जुषताᳬं सुज्योतिर्ज्योतिषा स्वाहा ॥ रात्रिः केतुना जुषताᳬं सुज्योति-
र्ज्योतिषा स्वाहा ॥ मधु हुतमिन्द्रतमे ऽअग्नावश्याम ते देव घर्म्म नमस्ते ऽअस्तु
मा मा हिᳬंसीः ॥१६॥ अभीमम् ॥ अभीमम्महिमा दिवं विप्रो बभूव सप्रथाः
॥ उत श्रवसा पृथिवीᳬं सᳬं सीदस्व महाँ२ ॥ ऽअसि रोचस्व देववीतमः ॥ वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धूममग्ने ऽअरुषम्मियेद्ध्यसृजप्प्रशस्त दर्शतम् ॥१७॥ यातेघर्म्मदिव्याशुग्ग्या
गायुत्र्याꣳ हविर्द्धाने ॥ सातऽआप्प्यायतान्निष्ट्यायतान्तस्यैतेस्वाहा ॥ यातेघ
र्म्मान्तरिक्षेशुग्ग्यात्रिष्टुब्भ्याग्नीध्रे ॥ सातऽआप्प्यायतान्निष्ट्यायतान्तस्यैते-
स्वाहा ॥ यातेघर्म्मपृथिव्याꣳशुग्ग्याजगत्याꣳ सदस्या ॥ सातऽआप्प्यायता
न्निष्ट्यायतान्तस्यैतेस्वाहा ॥१८॥ क्षत्रस्यत्वा ॥ परस्यायुब्ब्रह्मणस्तन्वम्पाहि ॥
विशस्त्वाधर्म्मणावयमनुक्क्रामामसुवितायनव्यसे ॥१९॥ चतुःस्स्रक्तिर्न्नाभिः ॥
चतुःस्स्रक्तिर्न्नाभिर्ऋतस्यसप्प्रथाः सनोविश्श्वायुः सप्प्रथाः सनः सर्वायुः सप्प्र
थाः ॥ अपद्द्वेषोऽअपह्वरोन्न्यव्व्रतस्यसश्चिम ॥२०॥ घर्म्मैतत् ॥ घर्म्मैतत्तेपुरीषन्ते
नवर्द्धस्वचाचप्प्यायस्व ॥ वर्द्धिषीमहिचवयमाचप्प्यासिषीमहि ॥२१॥ अचिक्रद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृषाहरिम्मुहान्मित्रोनदर्शतः ऽ ॥ सᳬंसूर्य्येणदिद्युतदुदधिर्न्निधीः ॥२२॥ सुमित्रि
यानः ॥ सुमित्रियानुऽआपुऽ ओषधयः सन्तु दुर्म्मित्रियास्तस्मैसन्तुयोस्मान्द्वे
ष्टियञ्चवयन्द्विष्मः ॥२३॥ उद्वयम् ॥ उद्वयन्तमसुस्परिस्वः पश्श्यन्तुऽउत्तरम् ॥
देवन्देवत्त्रासूर्य्यमगन्म्मज्ज्योतिरुत्तमम् ॥२४॥ एधोसि ॥ एधोस्येधिषीमहिसमिद
सितेजोसितेजोमयिधेहि ॥२५॥ यावती द्यावापृथिवी ॥ यावच्चसुप्तसिन्धवो वित
स्थिरे ॥ तावन्तमिन्द्रतेग्ग्रहमूर्ज्जागृह्णाम्म्यक्षितम्मयिगृह्णाम्म्यक्षितम् ॥२६॥ म
यित्यत् ॥ मयित्यदिन्द्रियम्बृहन्म्मयिदक्षोमयिक्क्रतुः ॥ घर्म्मस्त्रिशुग्विराजतिवि
राजाज्ज्योतिषासुहब्रह्म्मणातेजसासुह ॥२७॥ पयसोरेतः ॥ पयसोरेतुऽआभृत
न्तस्यदोहमशीमुह्युत्तरामुत्तराᳬंसमाम् ॥ त्विषः संवृक्क्रत्वेदक्षस्यपतेसुषुम्म्ण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्येतेसुषुम्म्णाग्निहुतः ॥ इन्द्रपीतस्यप्प्रजापतिभ्भक्षितस्यमधुमतऽउप
हूतऽउपहूतस्यभक्षयामि ॥२८॥ इतिअष्टत्रिंशोऽध्यायः ॥३८॥ स्वाहा
प्प्राणेब्भ्यः ॥ स्वाहाप्प्राणेब्भ्यः साधिपतिकेब्भ्यः ॥ पृथिव्व्यैस्वाहाग्नयेस्वाहान्तरि
क्षायस्वाहाव्वायवेस्वाहा ॥ दिवेस्वाहासूर्य्यायस्वाहा ॥१॥ दिग्भ्यः स्वाहा ॥ चन्द्रा
यस्वाहानक्षत्रेब्भ्यः स्वाहाद्भ्यः स्वाहाव्वरुणायस्वाहा ॥ नाब्भ्यैस्वाहापूतायस्वा
हा ॥२॥ व्वाचेस्वाहा ॥ प्प्राणायस्वाहा ॥ प्प्राणायस्वाहाचक्षुषेस्वाहाचक्षुषेस्वा
हा ॥ श्श्रोत्त्रायस्वाहाश्श्रोत्त्रायस्वाहा ॥३॥ मनसः कामम् ॥ मनसः काममाकूतिं
व्वाचः सत्यमशीय ॥ पशूनाᳪं रूपमन्नस्यरसोयशः श्रीः श्रयताम्मयिस्वाहा
॥४॥ प्रजापतिः सम्भ्रियमाणः सम्म्राट्सम्भृतोव्वैश्श्वदेवः सᳫं सन्नोघर्म्मः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रवृक्तस्तेजऽ उद्यतऽ आश्विनः पयस्यानीयमाने पौष्णो विष्यन्दमाने मारु-
तः क्लथन्॥ मैत्रः शरसि सन्ताय्यमाने वायव्यो ह्रियमाणऽ आग्नेयो हूयमा-
नो वाग्घुतः॥५॥ सविता प्रथमेऽहन्नग्निर्द्वितीये वायुस्तृतीयऽ आदित्यश्च-
तुर्थे चन्द्रमाः पञ्चमऽ ऋतुः षष्ठे मरुतः सप्तमे बृहस्पतिरष्टमे॥ मित्रो नवमे
वरुणो दशमऽ इन्द्रऽ एकादशे विश्वे देवा द्वादशे॥६॥ उग्रश्च॥ भीमश्च ध्वान्तश्च
धुनिश्च॥ सासह्वांश्चाभियुग्वा च विक्षिपः स्वाहा॥७॥ अग्निꣳ हृदयेन॥ अग्नि-
ꣳ हृदयेनाशनिꣳ हृदयाग्रेण पशुपतिं कृत्स्नहृदयेन भवं यक्ना॥ शर्वं मत-
स्नाभ्यामीशानं मन्युना महादेवमन्तःपर्शव्येनोग्रं देवं वनिष्ठुना वसिष्ठह-
नुः शिङ्गीनि कोश्याभ्याम्॥८॥ उग्रंल्लोहितेन॥ मित्रꣳ सौव्रत्येन रुद्रं दौर्व्रत्ये-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेन्द्रस्यक्रीडेनमरुतोबलेनसाध्यान्प्रमुदा॥ भवस्यकण्ठ्यꣳरुद्रस्यान्तःपा-
र्श्व्यम्महादेवस्ययकृच्छर्वस्यवनिष्ठुःपशुपतेःपुरीतत्॥९॥ लोमभ्यःस्वाहा॥
लोमभ्यःस्वाहात्वचेस्वाहात्वचेस्वाहालोहितायस्वाहालोहितायस्वाहामेदोभ्यः
स्वाहामेदोभ्यःस्वाहा॥ माꣳसेभ्यःस्वाहामाꣳसेभ्यःस्वाहास्नावभ्यःस्वाहास्ना
वभ्यःस्वाहास्थभ्यःस्वाहास्थभ्यःस्वाहामज्जभ्यःस्वाहामज्जभ्यःस्वाहा॥ रेतसे-
स्वाहापायवेस्वाहा॥१०॥ आयासायस्वाहा॥ प्रायासायस्वाहासंयासायस्वाहा
वियासायस्वाहोद्यासायस्वाहा॥ शुचेस्वाहाशोचतेस्वाहाशोचमानायस्वाहाशो
कायस्वाहा॥११॥ तपसेस्वाहा॥ तपसेस्वाहातप्यतेस्वाहातप्यमानायस्वाहात
प्तायस्वाहाघर्म्मायस्वाहा॥ निष्कृत्यैस्वाहाप्रायश्चित्त्यैस्वाहाभेषजायस्वाहा॥१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यमायस्वाहा ॥ यमायस्वाहान्तकायस्वाहामृत्यवेस्वाहा ॥ ब्रह्मणेस्वाहाब्रह्म
हत्यायैस्वाहाविश्वेभ्योदेवेभ्यः स्वाहाद्यावापृथिवीभ्याᳫं स्वाहा ॥१३॥ इतिए
कोनचत्वारिᳫं शोऽध्यायः ॥३९॥ ईशावास्यम् ॥ ईशावास्यमिदᳫं सर्वंय्य
त्किञ्चजगत्याञ्जगत् ॥ तेनत्यक्तेनभुञ्जीथामागृधः कस्यस्विद्धनम् ॥१॥ कुर्व
न्नेव ॥ कुर्वन्नेवेहकर्माणिजिजीविषेच्छतᳫं समाः ॥ एवन्त्वयिनान्यथेतोस्ति
नकर्मलिप्यतेनरे ॥२॥ असुर्य्यानाम ॥ असुर्य्यानामतेलोकाऽअन्धेनतमसा
वृताः ॥ ताँस्तेप्रेत्यापिगच्छन्तियेकेचात्महनोजनाः ॥३॥ अनेजदेकम् ॥ अने
जदेकम्मनसोजवीयोनैनद्देवाऽआप्नुवन्पूर्वमर्शत् ॥ तद्धावतोन्यानत्येतितिष्ठ
त्तस्मिन्नपोमातरिश्वादधाति ॥४॥ तदेजति ॥ तदेजतितन्नैजतितद्दूरेतद्वन्तिके ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्वस्य तदु सर्वस्यास्य बाह्यतः ॥५॥ यस्तु ॥ सर्वाणि भूतान्यात्म
नि ॥ सर्वभूतेषु चात्मानन्ततो न विचिकित्सति ॥६॥ यस्मिन्त्स
न्यात्मैवाभूद्विजानतः ॥ तत्र को मोहः कः शोक एकत्वमनुपश्य
स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम् ॥
नीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समा
८ ॥ अन्धन्तमः ॥ प्रविशन्ति ये सम्भूतिमुपासते ॥ ततो भूय इव ते तमो य
भूत्याꣳ रताः ॥९॥ अन्यदेव ॥ अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवा-
॥ इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥१०॥ सम्भूतिञ्च ॥ विनाशञ्च यस्त
दोभयꣳ सह ॥ विनाशेन मृत्युन्तीर्त्वा सम्भूत्यामृतमश्नुते ॥११॥ अन्धतमः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्धन्तमः प्रविशन्तियेविद्यामुपासते ॥ ततोभूयऽइवतेतमोयऽउविद्यायाꣳ
रताः ॥१२॥ अन्यदेव ॥ अन्यदेवाहुर्विद्यायाऽअन्यदाहुरविद्यायाः ॥ इतिशु
श्रुमधीराणांयेनस्तद्विचचक्षिरे ॥१३॥ विद्याञ्च ॥ विद्याञ्चाविद्याञ्चयस्त
द्वेदोभयꣳसह ॥ अविद्ययामृत्युन्तीर्त्वाविद्ययामृतमश्नुते ॥१४॥ वायुरनिल
मेव ॥ वायुरनिलममृतमथेदम्भस्मान्तꣳशरीरम् ॥ ओ३म् ॥ क्रतोस्मर ॥ क्लि
बेस्मर ॥ कृतꣳस्मर ॥१५॥ अग्नेनय ॥ सुपथारायेऽअस्मान्विश्वानिदेव
वयुनानिविद्वान् ॥ युयोध्यस्मज्जुहुराणमेनोभूयिष्ठान्तेनमऽउक्तिम्विधेम ॥१६
॥ हिरण्मयेनपात्रेण ॥ सत्यस्यापिहितम्मुखम् ॥ योसावादित्येपुरुषः सोसाव
हम् ॥ ओ३म् ॥ खम्ब्रह्म ॥ २ ॥ इतिवाजसनेयसꣳहितायान्दीर्घ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

…शत्तमोऽध्यायः ॥४०॥ ॥श्रीमज्जगदीश्वरार्पणमस्तु॥

…कं भगीरथात्मज हरिप्रसादेन मोहमय्यां जगदीश्वर शिलायंत्रे
…॥ संवत् १९४० ॥ शके १८०६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हु
का
कि
नैव।
नकर्म्मा
वृताः॥त
जुदेकम्मन
तस्मिंन्नप

॥ इतिश्रीयजुर्वेदसंहितासमाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रतिज्ञासूत्र प्रारंभः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्र.

१ श्रीगणेशायनमः ॥ ॥अथप्रतिज्ञामन्त्रब्राह्मणयोर्वेद नामधेयं तस्मिञ्छु सूः

क्ले याजुषाम्नाये माध्यन्दिनीयके मन्त्रे स्वरप्रक्रिया ह्यनुदात्तो मूर्ध्न्युदात्तः

श्रुतिमूले स्वरितः। एवं जात्यादयोभिहिता ब्राह्मणे तूदात्तानुदात्तौ भाषिकस्वरौ

ता नस्वराणि छन्दोवत्सूत्राणि ॥१॥ अथान्तस्थानामाद्यस्य पदादिस्थस्यान्यह

लसंयुक्तस्य, संयुक्तस्यापि रेफोष्मान्त्याभ्यामृकारेण चाविशेषेणादिमध्यावसा

नेषूच्चारणे जकारोच्चारणं, द्विर्भावेप्येवमथापरांतस्थस्यायुक्तान्यहलःसंयुक्त-

स्योष्मऽऋकारे ऋकारसहितोच्चारणमेवं तृतीयांतस्थस्य कचिद्दकारस्य तु

संयुक्तस्याविशेषेण सर्वत्रैवमथान्त्यस्यान्तस्थानां पदादिमध्यान्तस्थस्य त्रि १

विधं गुरुमध्यमलघुवृत्तिभिरुच्चारणमथो मूर्द्धन्योष्मणोऽसंयुक्तस्य दुमृते

CC-0. In Public Domain. Digitization by eGangotri

संयुक्तस्य च खकारोच्चारणमध्ययनादिकर्मस्वर्थवेलायां प्रकृत्या ॥ २॥ अथानुस्वारस्य ꣳ इत्यादेशः शषसहरेफेषु परेषु, तस्य त्रैविध्यमाख्यातम् । ह्रस्वदीर्घगुरुभेदैर्दीर्घात्परो ह्रस्वो ह्रस्वात्परो दीर्घो गुरौ परे गुरुः परसवर्णेषत्प्रकृत्या चान्यत्र विसर्गेष्वीषद्विरामः पदाद्यस्य संयुक्ताकारस्येषद्दीर्घता च भवतीषद्दीर्घता च भवतीति ॥ ३॥ ॥ इति कात्यायनपरिशिष्टसूत्रं समाप्तम् ॥ ॥ श्रीरस्तु ॥ ॥ छ ॥

इदं पुस्तकं भगीरथात्मज हरिप्रसादेन मोहमय्यां जगदीश्वर शिलायंत्रे मुद्रितम् ॥ संवत् १९४० शाकाब्दः १८०६ भाद्रपदमासः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति प्रतिज्ञासूत्रं समाप्तम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

९५८ ४००५

अथ याज्ञवल्क्यशिक्षा प्रारंभः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

या· १

श्रीगणेशायनमः॥ ॥अथातस्त्रैस्वर्यलक्षणंव्याख्यास्यामः॥ उदात्त
श्चानुदात्तश्चस्वरितश्चतथैवच ॥ लक्षणंवर्णयिष्यामि दैवतंस्थानमेवच ॥ १॥
शुक्लमुच्चंविजानीयान्नीचंलोहितमुच्यते ॥ श्यामंतुस्वरितंविंद्यादग्निमुच्च
स्यदैवतं ॥२॥ नीचेसोमंविजानीयात्स्वरितेसविताभवेत् ॥उदात्तंब्राह्मणं
विंद्यान्नीचंक्षत्रियमुच्यते ॥३॥ वैश्यंतुस्वरितंविंद्याद्भारद्वाजमुदात्तकं ॥
नीचंगौतममित्याहुर्गार्ग्यंचस्वरितंविदुः ॥४॥ विंद्यादुदात्तंगायत्रींनीचंत्रैष्टु
भमुच्यते ॥जागतंस्वरितंविंद्यादतएवंनियोगतः ॥५॥ गांधर्ववेदेयेप्रो-
क्ताः सप्तषड्जादयःस्वराः ॥ तएववेदेविज्ञेयास्त्रयउच्चादयःस्वराः ॥६॥ उच्चौ
निषादगांधारौनीचावृषभधैवतौ ॥ शेषास्तुस्वरिताज्ञेयाःषड्जमध्यमपंचमाः

शि· १

॥७॥ षड्जोवेदेशिखंडिस्यादृषभःस्यादजामुखे ॥ गवारंभंतिगांधारंक्रौंचा
श्चैवतुमध्यमम् ॥८॥ कोकिलःपंचमोज्ञेयोनिषादंतु वदेद्गजः ॥ आश्वश्चधै
वतोज्ञेयोस्वराः सप्तविधीयते ॥९॥ निमेषमात्रोकालःस्याद्विद्युत्कालस्तथाप
रे ॥ अक्षरात्तुल्ययोगाच्चमतिःस्यात्सोमशर्मणः ॥१०॥ सूर्यरश्मिप्रतीकाशा
त्कणिकायत्रदृश्यते ॥ अणवस्यतुसामात्रामात्राचचतुराणवा ॥११॥मा
नसेचाणवंविंद्यात्कंठेविंद्याद्द्विराणवं ॥ त्रिराणवंतुजिह्वाग्रेनिःसृतंमात्रि
कंविदुः ॥१२॥ अवग्रहेतुकालःस्यात् अर्धमात्राविधीयते ॥ पदयोरंतरेका
लएकमात्राविधीयते ॥१३॥ ऋचोर्द्धेतु द्विमात्रःस्यात्रिमात्रःस्यादृगंतके ॥
रिक्तंतुपाणिंउत्क्षिप्यद्विमात्रेधारयेद्बुधः ॥१४॥ एकमात्रोभवेद्ध्रस्वोद्विमा

प्रतीकाशः प्रकाशः

CC-0. In Public Domain. Digitization by eGangotri

त्रोदीर्घउच्यते ॥ त्रिमात्रस्तु प्लुतोज्ञेयोव्यंजनंचार्द्धमात्रकं ॥१५॥ विवृतौचा
वसानेचऋचोर्द्धेचतथापरे ॥पदेचपादसंस्थानेशून्यहस्तंविधीयते ॥१६॥ प्र
णवंतुप्लुतंकुर्याद्व्याहृतीर्मातृकाविदुः ॥ चाषस्तुवदतेमात्रां द्विमात्रांवायसो
ब्रवीत् ॥१७॥ शिखीवदतित्रिमात्रां मात्राणामितिसंस्थितिः ॥ वर्णोजाति
श्चमात्राचगोत्रंछंदश्चदैवतं ॥१८॥ एतत्सर्वंसमाख्यातंयाज्ञवल्क्येनधीम
ता ॥ हस्तौतुसंयतौधार्यौजानुभ्यामुपरिस्थितौ ॥१९॥ गुरोरनुमतंकुर्या
त्पठन्नान्यमतिर्भवेत् ॥ ऊरुभागेतृतीयेतुकरंविन्यस्यदक्षिणं ॥२०॥ प्रस-
न्नमानसोभूत्वाकिंचिन्निम्नमधोमुखं ॥ प्रणवंप्राक्प्रयुंजीतव्याहृतीस्तद
नंतरं ॥२१॥ सावित्रींचानुपूर्व्येणततोवेदान्समारभेत् ॥ कूर्मोंगानीवसंहृत्य

नैकुलस्त्वर्धमात्रकं. १ अध्ययनेविधिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेष्टांदृष्टिंदृढंमनः ॥२२॥ स्वस्थःप्रशांतोनिर्भीतोवर्णानुच्चारयेद्बुधः ॥ नाभ्या
हन्यान्ननिर्हन्यान्नगायेन्नैवकंपयेत् ॥२३॥ यथैवोच्चारयेद्वर्णांस्तथैवैतान्स-
मापयेत् ॥ निवेश्यदृष्टिंहस्ताग्रेशास्त्रार्थमनुचिंतयेत् ॥२४॥ सममुच्चारये
द्वर्णान्हस्तेनचमुखेनच ॥ स्वरश्चैवतुहस्तश्चद्वावेतौयुगपद्भवेत् ॥२५॥ हस्त
भ्रष्टःस्वरभ्रष्टोनवेदफलमश्नुते ॥ नकरालोनलंबोष्ठोनाव्यक्तोनाननुनासि-
कः ॥२६॥ गद्गदोबद्धजिह्वश्चनवर्णान्वक्तुमर्हति ॥ प्रकृतिर्यस्यकल्याणीदंतो
ष्ठौयस्यशोभनौ ॥२७॥ प्रगल्भश्चविनीतश्चसवर्णान्वक्तुमर्हति ॥ शंकितंभी
तमुद्घृष्टमव्यक्तमनुनासिकं ॥२८॥ काकस्वरंमूर्द्धिगतंयथास्थानविवर्जितं ॥
विस्वरंविरसंचैवविश्लिष्टंविषमाहतं ॥२९॥ व्याकुलंतालुहीनंचपाठदोषाश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तुर्दश॥संहितासारबहुलःपदसंज्ञासमाकुलः॥३०॥क्रमसंधिसमाकीर्णोदु
स्तरोमंत्रसागरः॥ऋक्संहितांत्रिरभ्यस्ययजुषांवासमाहितः॥३१॥साम्नां
वासरहस्यांचसर्वपापैःप्रमुच्यते॥संहितानयतेसूर्यंपदंचशशिनःपदं॥३२॥
क्रमश्चनयतेसूक्ष्मंयत्तत्पदमनामयं॥कालिंदीसंहिताज्ञेयापदयुक्तासरस्व
ती॥३३॥क्रमेणावर्त्तयेद्गंगांशंभोर्वाणीतुनान्यथा॥यथामहाह्रदंप्राप्य-
क्षिप्तोलोष्टोविनश्यति॥३४॥एवंदुश्चरितंसर्वंवेदेत्रिवृतिमज्जति॥आम्रप
लाशबिल्वानामपामार्गशिरीषयोः॥वाग्यतःप्रातरुत्थायभक्षयेद्दंतधावनं
॥३५॥खदिरश्चकदंबश्चकरवीरकरंजकौ॥एतेकंटकिनःपुण्यःक्षीरिणस्तु
यशस्विनः॥३६॥तेनास्यकरणेसूक्ष्मंमाधुर्यंचैवजायते॥त्रिफलांलवणोक्तं

CC-0. In Public Domain. Digitization by eGangotri

नभक्षयेच्छिष्यकः सदा ॥ क्षीणमेधाजनन्येषास्वरवर्णकरीतथा ॥ ३७ ॥ हस्त
हीनंतुयोधीतेमंत्रंवेदविदोविदुः ॥ नसाधयतियजूꣳषिभुक्तमव्यंजनंयथा
॥ ३८ ॥ हस्तहीनंतुयोधीतेस्वरवर्णविवर्जितं ॥ ऋग्यजुःसामभिर्दग्धोवियोनि
मधिगच्छति ॥ ३९ ॥ ऋचोयजूꣳषिसामानिहस्तहीनानियः पठेत् ॥ अनृचो
ब्राह्मणस्तावद्यावत्स्वारंनविंदति ॥ ४० ॥ ज्ञातव्यश्चतथैवार्थोवेदानांकर्मसि
द्धये ॥ पठन्मात्रापपाठात्तुपंकेगौरिवसीदति ॥ ४१ ॥ स्वरवर्णप्रयुंजानोहस्ते
नाधीतमाचरन् ॥ ऋग्यजुःसामभिः पूतोब्रह्मलोकमवाप्नुयात् ॥ ४२ ॥ नकु
र्वीतपदंदीर्घंनकुर्वीतविलंबितं ॥ पदस्यग्रहमोक्षौचयथाशीघ्रगतिर्हयः ॥ ४३
॥ आगमंकुरुयत्नेनकारणंहितदात्मकं ॥ आस्येनचशयंकुर्यात्पठन्नान्यमति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्भवेत् ॥ ४४ ॥ नचास्यमुष्टिबंधीस्यान्नचात्युत्तममाचरेत् ॥ चुलुनौकास्फुटोदं
डीस्वस्तिकोमुष्टिराकृतिः ॥ एतेवैहस्तदोषास्युः परस्तुश्चैवसत्तमः ॥ ४५ ॥ य
थावाणीतथापाणीरिक्तंतुपरिवर्जयेत् ॥ यत्रयत्रस्थितावाणीपाणिस्तत्रैवति
ष्ठति ॥ ४६ ॥ यथाधनुर्ज्याविततेशरेक्षिप्तेपुनर्गुणः ॥ स्वस्थानंप्रतिपद्येततद्व
द्धस्तगतःस्वरः ॥ ४७ ॥ उत्तानंसोन्नतंकिंचित्सुव्यक्तांगुलिरंजितं ॥ स्वरविंद्वंक
रंकुर्यात्प्रादेशोद्देशगामिनं ॥ ४८ ॥ अंगुष्ठस्योत्तरेपर्वैतर्जन्योपरियद्भवेत् ॥ प्रा
देशस्यतुसोद्देशस्तन्मात्रंचालयेत्करं ॥ ४९ ॥ मनुष्यतीर्थोच्चंकृत्वापितृतीर्थो
दकंव्रजेत् ॥ नामितंकरपृष्ठेतुसुव्यक्तांगुलिमोक्षणं ॥ ५० ॥ स्वरितेत्र्यंगुलंवि
द्यान्निपातेतुषडंगुलं ॥ उत्थानेतुनवांगुल्यमेतत्स्वरस्यलक्षणं ॥ ५१ ॥ अभ्या

CC-0. In Public Domain. Digitization by eGangotri

सार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमां ॥ शिष्याणामुपदेशार्थं कुर्याद्वृत्तिं वि-
लंबितां ॥ ५२ ॥ ऐंद्री तु मध्यमा वृत्तिः प्राजापत्या विलंबिता ॥ अग्निमारुतयो
र्वृत्तिः सर्वशास्त्रेषु निंदिता ॥ ५३ ॥ मुष्ट्याकृतिर्मकारे तु नकारे तु नखाग्रतः
॥ अनुस्वारे गुष्ठक्षेप ऊष्मांते गुलिमोक्षणं ॥ ५४ ॥ उदात्तं भ्रु विपातेन प्रचयं
नासाग्रमेव च ॥ शेषं षडंगुलं विंद्यानिचितं तु विधीयते ॥ ५५ ॥ षडंगुलं तु जा
त्यस्य हस्तस्यानुपथस्य च ॥ तच्चतुर्भागमात्रं तु हस्तस्तेनैव वर्तयेत् ॥ ५६ ॥
ककारांते टकारांते ङणे चांगुलिनामये ॥ पंचांगुल्य मकारे तु तकारे कुंडलाकृ
तिः ॥ ५७ ॥ ऊर्ध्वक्षेपाच्चयोष्मा च अधःक्षेपाच्चयो भवेत् ॥ एकैकामुत्सृजेद्वी
रः स्वरितेतू भयं क्षिपेत् ॥ ५८ ॥ अंगुष्ठाकुंचनं लब्धौ अनुस्वारे त्वपा छं रसं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दीर्घेरंगेचतर्जन्याःप्रसारःपरिकीर्तितः ॥५९॥ तर्जन्यंगुष्ठयोस्पर्शोप्युदात्तंप्र
तिविद्यते ॥ नीचंतुमध्यमंकुर्याच्छेषंनीचतरंक्रमात् ॥६०॥ स्वरितंयद्भवेत्किंचि
द्धकारसहसंयुतं ॥ ऊष्माणंतद्विजानीयान्निक्षिपेदुभयोरपि ॥६१॥ स्वरितसं
ज्ञेचनिक्षिप्तेसंयोगोयत्रदृश्यते ॥ द्विमात्रिकेभवेदेक मात्रिकेतूभयंक्षिपेत् ॥
॥६२॥ जात्येचस्वरितेचैववकारोयत्रदृश्यते ॥ कर्तव्यस्तूभयोःक्षेपोवायव्यःइति
दर्शनं ॥६३॥ शृंगवद्वाथवत्सस्यकुमारीकुचयुग्मवत् ॥ उभक्षेपस्वरोयत्रसाविस
र्गउदाहृतः ॥ विसर्गांतस्वरोयत्रस्वरितोयत्रदृश्यते ॥ दीर्घश्चैवतुकारश्चतत्रो
भक्षेपउच्यते ॥ त्रिविधस्तुभवेदूष्मा प्रचिताबलकातरा ॥ स्वरितेप्रचित्ताविद्या
न्निपातेबलकांविदुः ॥६४॥ उत्थानेतुतथाताराएताभिस्त्रिभिरूष्माभिः ॥ मा

CC-0. In Public Domain. Digitization by eGangotri

त्रामात्रांविदित्वातुततःक्षेपंप्रयोजयेत् ॥६५॥ अक्षरंभजतेकाचित्काचिद्धृत्तेप्र
तिष्ठितं ॥समानेजातिकाकाचित्काचिदूष्माप्रदायिका ॥६६॥ यथाबालस्यस
र्पस्यउश्वासोलघुचेतसः ॥एवमूष्माप्रयोक्तव्याहकारःपरिवर्जितः ॥६७॥वि
वृत्तिंप्रत्ययाऊष्मांप्रवदंतिमनीषिणः ॥ तामेवप्रतिषेधंतियथा आईऊए इति
निदर्शनं ॥६८॥ अष्टौस्वरान्प्रवक्ष्यामितेषामेवतुलक्षणं ॥जात्योभिनिहि
तक्षैप्रप्रश्लिष्टश्चतथापरैः ॥६९॥ पादवृत्तस्तथाभाव्यइतिस्वराः ॥ एकपदे
नीचपूर्वःसयवोजात्यः ॥एकपदइत्याह ॥७०॥ नीचपूर्वःसयकारवकारौवा
जात्यःस्वरितोभवति ॥ यथाजात्यंमनुष्यानिति । सुद्योति । चम्वीव । धान्यं ।
कन्याइव । स्वः । वीर्यं । एवंह्याहयानिचान्यानीदृग्लक्षणानिपदानिभवंति ॥ ए

तैरोव्यंजनः तैरोविरामः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ओआभ्यामुदात्ताभ्यामकारोरिफितश्चयः ॥ अकारोयत्रलुप्येततत्राभिनिहितं
विदुः ॥७१॥ यथाकुक्कुटः। असि। कुक्कुटोसि। वेदः। असि। वेदोसि। भागः।
असि। भागोसि। मारुतः। असि। मारुतोसि। श्वात्रः। असिति। अप्सरसाम्।
तेप्सरसाम्। ते। अवंतु। तेवंतु। कः। असि। कोसि। सः। अहम्। सोहम्। एवङ्
ह्रियानिचान्यानि ईदृग्लक्षणानिपदानिभवंति ॥ इउवर्णौयदोदात्तावापद्येतेय
वौक्वचित् ॥ अनुदात्तेपदेनित्यंविंद्यात्क्षैप्रस्यलक्षणं ॥७२॥ यथात्रि। अंबक-
म्। त्र्यंबकम्। द्रु। अन्नः। द्र्वन्नः। वीडु। अंगः। वीड्वंगः। वाजी। अर्वन्। वाज्य
र्वन्। एवङ्ह्याद्यानिति ॥ इकारोयत्रदृश्येतइकारेणैवसंयुतः ॥ उदात्तश्चानु-
दात्तेनप्रश्लिष्टोभवतिस्वरः ॥७३॥ अभि। इन्धताम्। अभीन्धताम्। अभि। इ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ममृ । अभीमम् । वि । इहि । वीहि । स्रुचि । इव । स्रुचीव । चम्वीवेतिचम्वी ।
इव ।एवथ्ंह्याह्रयानिचान्यानि । उदात्तपूर्वंयत्किंचिच्छंदसिस्वरितंपदं ॥ एषस
र्वंबहुस्वारस्तैरोव्यंजनउच्यते ॥७४॥ इडे । रंते । हव्ये । काम्ये । चंद्रे । ज्योते ॥
अदिति । सरस्वती । महि । विश्रुतीतिभवंति । एवथ्ंह्याह्रयानि· भवंति ॥ अव
ग्रहात्परोयस्तुस्वरितःस्यादनंतरं ॥ तैरोविरामंतंविंद्यादुदात्तोयद्यवग्रहः ॥
॥७५॥ यथा गोमदिति गो । मत् । गोपताविति गो । पतौ । प्रप्रेति प्र । प्र । वितत्ते
तिवि । तता । समिन्द्धइतिसम् । इन्द्धः । एवथ्ंह्याह्रयानि· भवंति ॥ स्वरेतिस्व
रितेचैवविवृतिर्यत्र दृश्यते ॥ पादवृत्तोभवेत्स्वारः श्विन्नआदित्येतिनिदर्शनं
॥ श्विन्नः । आदित्यानां । श्विन्नआदित्यानां । पुत्रः । ईंधे । पुत्रईंधे । दात्रे । एधि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दात्रएधि । कः । ईम् । कईम् । ताः । अस्य । ताअस्य । एवꣳ ह्याह॰नि ॥ उदाता
क्षरयोर्मध्येभवेन्नीचस्त्ववग्रहः ॥ ताथाभाव्यंभवेत्कंपंस्तनूनब्रेतिनिदर्शनम्
॥७६॥ यथातनूनप्त्रइतितनू । नप्त्रे । तनूनपादितितनू । नपात् । तनूनपात
मितितनू । नपातम् । एवꣳ ह्याहयानिपदानिलक्षणानिभवंति ॥ इत्यष्टपदस
माम्नायेवैशेषिकेयाज्ञवल्क्यवचनानांपदानांपाठःसमाप्तः ॥ ॥ माध्यं
दिनविरोधिस्यात्तथाभाव्यस्तुयःस्मृतः ॥ स्वरोनैवात्रदृश्येतभिन्नोदात्तानु
दात्तकौ ॥१॥ स्वराःस्पर्शांतस्थोष्माणः ॥ कंठ्य । जिह्वामूलीय । तालव्य । मूर्ध-
न्य । दंत्य । ओष्ठ्य । यमाविसर्जनीयनिपाताद्याश्चकिंवर्णदैवत्यलिंगाः । स्वराः
शुक्लाः । नानादैवत्याः । स्पर्शाः कृष्णाः । कपिलाअंतस्थाः । उष्माणोरुणाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नीलायमाः । हरितानासिक्याः । पीतोनुस्वारः । रक्तोजिह्वामुलीयः । पीतउ
पध्मानीयः । श्वेतोविसर्जनीयः । शबलोरंगः । नीलोनुनासिक्यः । इत्यंतर्मध्य
मयोर्नासिक्यंविद्यात् ॥ द्विरुदात्तारव्याइतिस्मृतः ॥ उदमनुदनिपातेआद्येचो
पसर्गेनामारव्यातेचोपसर्गनिपाताश्चेति । किंदैवत्याः । अक्षराणांचकेपुरु-
षाः ॥ कास्त्रियः । कानिनपुंसकानिइत्यत्रब्रूमः । कंठ्याआग्नेयाः । अकारादयः
॥ जिह्वामुलीयोनैर्ऋत्याः ककारादयः । तालव्याः सौम्याःचकारादयः । वाय-
व्यामूर्धन्याटकारादयः । रौद्रादंत्याः तकारादयः । औष्ठ्याश्विन्याः पकाराद
यः । शेषावैश्वदेवाः । अंइत्येवमादयः । स्वरास्तुब्राह्मणाज्ञेयावर्गाणांप्रथमा
श्चये ॥ द्वितीयाश्चतृतीयाश्चचतुर्थाश्चापिक्षूमिपाः ॥२॥ वर्गाणांपंचमावैश्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंतस्थाश्चतथैवच ॥ ऊष्माणश्चहकारश्च शूद्राएवप्रकीर्त्तिताः ॥३॥ शुक्लव-
र्णानिनामानिआख्यातारोहितामताः ॥ कपिंजलास्तूपसर्गाः कृष्णाश्चैवनिपात
काः ॥४॥ भार्गवगोत्राणिनामानि भारद्वाजाआख्याताः ॥ वासिष्ठाउपसर्गास्तु निपा
ताः काश्यपाः स्मृताः ॥ पीतवर्णश्चोपसर्गोनिपातः कृष्णवर्णकः ॥ सर्वंतुसौम्यमा
ख्यातंनामवायव्यं दृश्यते ॥ आग्नेयस्तूपसर्गःस्यान्निपातोवारुणःस्मृतः ॥५॥
प्रथमाश्च तथांतस्थास्त्रीलिंगाः परिकीर्त्तिताः ॥ शेषाक्षराणिषंढानि प्राहुर्लिंग
विवेचकाः ॥६॥ नाम्नामिंद्रोदेवतावरुणः उपसर्गाणां आदित्यः सर्वस्याक्षर
गणस्यस्वराविसर्जनीयोयमाश्चपुल्लिंगाः ङञणनमा यरलवाः स्त्रीलिंगाः ।
शेषाण्यक्षराणि नपुंसकलिंगानीति ॥ संधिश्चतुर्विधोभवतीति ॥ लोपागमौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्णविकारः प्रकृतिभावश्चेति । तद्यथा । तत्रलोपोभवति । अयक्ष्माः । मा । अ
यक्ष्मामा । शततेजाः । वायुः । शततेजावायुः । तिग्मतेजाः । द्विषतः । तिग्मते
जाद्विषतः । इतिलोपः ॥ आगमोभवति यथा । प्रत्यङ्सोमः । प्राक् । सोमः ।
प्राङ्सोमः । अस्मान् । सीते । अस्मान्त्सीते । त्रीन् । समुद्रान् । त्रीन्त्समुद्रान् ।
इतिआगमः ॥ विकारोभवति । आ । इदम् । एदम् । आ । इमे । एमे । आ । इ
ष्टयः । एष्टयः । प्र । इषितः । प्रेषितः । इतिविकारः । प्रकृतिभावः । यथा । आ-
शुः । शिशानः । युंजानः प्रथमम् । अदितिः षोडशाक्षरेण । देवोवः सविता ।
इति प्रकृतिभावः ॥ आकाशस्थायथाविद्युत्स्फुरदितंमणिसूत्रवत् ॥ एषछेदोवि
वृतीनांयथाबालेषुकर्तरि ॥ ७ ॥ द्वयोस्तुस्वरयोर्मध्येसंधिर्यत्रनदृश्यते ॥ विवृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिस्तत्रविज्ञेयायईशोतिनिदर्शनम् ॥ ८ ॥ पिपीलिकापाकवतीतथावत्सानुसारि
णी ॥ वत्सानुसंसृताचैवचतस्त्रस्तुविवृत्तयः ॥ ९ ॥ पंचरंगाःप्रवर्तंतेघातनिर्घा
तवज्रिणः ॥ अहर प्रहरोज्ञेयअइउऋओइतिनिदर्शनं ॥ १० ॥ पिपीलिकाआद्यंत
दीर्घानाभ्याआसीदितिनिदर्शनम् ॥ पाकवत्युभयोर्ह्रस्वाविन इन्द्रेतिनिदर्शनम्
॥ ११ ॥ अंतेचवत्सानुसृजताताानेत्यसौआवोढमश्विनेतिनि॰ ॥ वत्सानुसारिणीचा
दौदीर्घांताअस्येतिनि॰ ॥ १२ ॥ करिणीकुर्विणीचैवहरिणीहारिणीतिच ॥ तथा
हंसपदानामपंचैताःस्वरभक्तयः ॥ १३ ॥ करिणीरुहयोर्योगेकुर्विणीलहका
रयोः ॥ हरिणीरषयोर्योगेहारितंऋषकारयोः ॥ १४ ॥ यातुहंसपदानामसा
तुरेफषकारयोः ॥ हरिणीहरयोर्विद्यात्कुर्विणीलहकारयोः ॥ १५ ॥ देवंब

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्हिरितिकरिणीउपव्हरेतिकुर्विणी॥ हरिणींअरेषसइत्याहुः हारिणीज्ञातव
ल्हेतिच॥१६॥ वर्षोवर्षीयतेसीतितथाहंसपदेतिच॥ स्वरभक्तिंप्रयुंजान
स्त्रीन्दोषान्परिवर्जयेत्॥१७॥ इकारंचाप्युकारंचग्रस्तदोषंतथैवच॥एतल्ल
क्षणमाख्यातंयाज्ञवल्क्येनधीमता॥१८॥ सम्यक्पाठस्यसिध्यर्थंशिष्या
णांहितकाम्यया॥अर्धमात्रास्वरंकिंचित्पृथग्न्यूनमिवोच्चरन्॥ऋकारेहका
रहृत्कंठमनसानिच॥१९॥ नैतत्स्वरितपूर्वांगेनापरांगेकथंचन॥ नस्वरे
नचमात्रायांकथंस्वारोविधीयते॥२०॥ परांगस्यतुयत्पूर्वंपूर्वांगस्यतुय
त्परं॥उभयार्द्धार्द्धसंयोगेस्वारंकुर्याद्विचक्षणः॥२१॥ संयोगेतुपरंस्वार्थं
परंसंयोगनायकं॥ संयुक्तस्यतुवर्णस्यनस्वार्थंपूर्वमक्षरं॥२२॥उदात्ताद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नुदात्तेतुवामायाम्भुवआरभेत् ॥ उदात्तात्स्वरितोदात्तौक्रमाद्दक्षिणतोन्यसे
त् ॥२३॥ स्वरितादनुदात्तायेप्रचयास्तान्प्रचक्षते ॥ एकस्वरापिचांतानाहुस्त
त्वार्थचिंतकाः ॥२४॥ प्रचयोयत्रदृश्येततत्रहन्यात्स्वरंबुधः ॥ स्वरितः केवलो-
यत्रमृदुस्तत्रनिपातयेत् ॥ २५ ॥ दुर्बलस्ययथाराष्ट्रंहरतेबलवान्नृपः ॥ एवं-
व्यंजनमासाद्यअकारोहरतेस्वरम् ॥ २६ ॥ उच्चादुच्चतरंनास्तिनीचान्नीच
तरंतथा ॥ अक्षरात्तुल्ययोगाच्चनीचेनीचगतानिच ॥ २७ ॥ स्वर उच्चः स्वरोनी
चः स्वरः स्वरितएवच ॥ स्वरप्रधानैस्तैःस्वार्यंव्यंजनंतेनसस्वरं ॥ २८ ॥ व्यंजना
न्यनुवर्तंतेयत्रतिष्ठतिसस्वरः ॥ स्वरप्रधानंत्रैस्वर्यंआचार्याःप्रवदंतिहि ॥ २९ ॥
मणिवद्व्यंजनंविद्यात्सूत्रवच्चस्वरंविदुः ॥ आचार्याःसममिच्छंति पदच्छेदंतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंडिताः ॥३०॥ स्त्रियोमधुरमिच्छंति विक्रुष्टमितरेजनाः ॥उदात्तंनानुवर्त्ततेनीच
न्नस्वरितंतथा ॥३१॥ विस्वरंतंविजानीयाद्दीर्घह्रस्वविवर्जितं ॥ हरिवरुणव
रेण्येषुधारापुरुषेषुच ॥स्वरितेरेफवैश्वानरोनकारः शेषाकारः स्वरितानकाराः
॥३२॥ द्वौवरुणौचस्वरितौ ॥ उदुत्तमंवरुणधारय्वेवरेरुधाराउरुधाराचद्वोह
ते ॥ मात्रिकंवाद्विमात्रंवास्वरितंयदिहाक्षरं ॥३३॥ तस्यादितोर्द्धमात्रावै
शेषंचपरतोभवेत् ॥ नकारांतेपदेपूर्वेश्मश्रुभिःपरतःस्थिते ॥ छकारंनप्र-
युंजीतञशसंधिंसमुच्चरेत् ॥३४॥ओकारंप्लुतविज्ञेयंप्लुतमग्नाद्वितीयकं ॥
लाजींछाचींतृतीयंचविवेशोतिचतुर्थकं ॥३५॥ अधःस्विदासीत्पंचमंचोपरि
स्विदासीच्चषष्ठकं॥ सप्तमंतुभुवोस्मारअष्टमंनैवविद्यते ॥३६॥ उच्चस्थानग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

या. तेह्रस्वेस्वरितंनोपपद्यते ॥ अंधस्थातुयदागच्छेत्स्वरितंनतदाभवेत् ॥ कचट शि.
११ तपाहश्यंतेसंधिस्थानेषुनित्यशः ॥ स्ववर्गेणैवसंयुक्तामोक्षंतत्रनकुर्वीत ॥ त
कारांतेपदेपूर्वेसकारेपरतःस्थिते ॥ प्रत्यारंभंनकुर्वीतपापाविति निदर्शनम् ॥
ककारांतेपदेपूर्वेसकारेपरतःस्थिते ॥ खसवर्णंविजानीयात्भिरवक्सेतिनिदर्श
नम् ॥ तकारांतेपदेपूर्वेचवर्गेपरतःस्थिते ॥ मोक्षंतत्रचकुर्वीतयच्चपापौनिदर्श
नं ॥ ङकारांतेपदेपूर्वेसकारेपरतःस्थिते ॥ कसवर्णंविजानीयात्प्राङ्क्सोमेतिनि
दर्शनम् ॥ टकारांतेपदेपूर्वेसकारेपरतस्थिते ॥ टसवर्णंविजानीयात्संम्रा
ड्भृतेतिनिदर्शनम् ॥ तकारांतेपदेपूर्वेसकारेपरतःस्थिते ॥ छसवर्णंविजा- ११
नीयात्तत्सवितुरितिनिदर्शनं ॥ नकारांतेपदेपूर्वेसकारेपरतःस्थिते ॥ तसव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्णं विजानीयाच्चीन्त्समुद्रेति निदर्शनम् ॥ पकारांते पदे पूर्वे शकारे परतः स्थिते ॥ छासवर्णं विजानीयादनुष्टुप्छारदीति निदर्शनम् ॥ मकारांते पदे पूर्वे सवर्णे परतः स्थिते ॥ मसवर्णं विजानीयादिमम्मेति निदर्शनम् ॥ वर्णे तु मात्रिके पूर्वे अनुस्वारो द्विमात्रकः ॥ द्विमात्रे मातृको ज्ञेयः संयोगाद्यस्य यो भवेत् ॥ अनुस्वारो द्विमात्रः स्याद्दवर्णव्यंजनादिगः ॥ ह्रस्वाद्वायादिवा दीर्घाद्देवानां छं हृदये भ्य इति ॥ अनुस्वारस्योपरिष्टात्संवृत्तं यत्र दृश्यते ॥ दीर्घं तं तु विजानीयाच्छ्रोता ग्रावाणेति निदर्शनम् ॥ अनुस्वारस्योपरिष्टात्संयोगो यत्र दृश्यते ॥ ह्रस्वं तं तु विजानीयात्स छं स्थेति निदर्शनम् ॥ अनुस्वारश्च यो दीर्घादक्षराद्यो भवेत्परः ॥ स तु ह्रस्व इति ज्ञेयो मंत्रेष्वेवं विभाषया ॥ ओभावश्च विवृत्तिश्च शाषसा रेफ एव च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

या. ॥जिह्वामूलउपध्माचगतिरष्टविधोष्मणः॥यथाभावप्रसंधानमुकारादिपरंप शि.
१२ दम्॥स्वरांततांदृशंविद्याद्यदन्यद्व्यक्तमुष्मणः॥उभावादुस्थितश्चोष्मातालु
केलिंविनिर्दिशेत्॥विवृत्तंप्रतियाऊष्माविज्ञेयाविकंठानना॥ळीढातिळीढवि
द्युच्चशषसेषुप्रकीर्तिताः॥जिह्वामूलेचरेफेचविज्ञेयाविठकाद्वाठ॥उपध्मा-
नीयसहितांपुष्पिणींतांविनिर्दिशेत्॥अन्यत्रयोभवेदूष्मासुलभातांविनिर्दि
शेत्॥पादाद्यंतंपदाद्यंतंतथावग्रहकालिकं॥इषत्स्पृष्टंविजानीयात्तास्मिन्का-
लेतुकारयेत्॥पादादौचपदादौचसंयोगावग्रहेषुच॥यःशव्दइतिविज्ञेयोयो
न्यःसयइतिस्मृतः॥उपसर्गपरोयस्तुपदादिरपिदृश्यते॥ईषत्स्पृष्टयथाविद्यु १२
त्यदछंदात्परंभवेत्॥त्वदर्थवाचिनौवावांवावैयादिनिपातजौ॥आंदेराजविकल्पा

CC-0. In Public Domain. Digitization by eGangotri

र्थाईषत्स्पृष्टा इतिस्मृताः ॥ विभाषयामेकारस्यातथानेतैपदात्परः ॥ भवंतेत्य
पिपूर्वैवंतथाचसपदादपि ॥ यदेवलक्षणंयस्यवकारस्यापितद्भवेत् ॥ यत्रयत्रवि
शेषःस्यादिदानींससकथ्यते ॥ वकारस्त्रिविधः प्रोक्तोगुरुर्लघुलघूतरः ॥ आ
दौगुरुर्लघुर्मध्येपदांतेचलघूतरः ॥ यवर्णस्त्रिविधः प्रोक्तोगुरुर्लघुलघूतरः ॥
आदौगुरुर्लघुर्मध्येपदांतेलघुलघूतरः ॥ उपांशुत्वरितंचैवयोधीतेहृदिसंज्ञकः
॥ अपिरूपसहस्रेषुसदेहेषुप्रवर्त्तते ॥ पंचविद्यांनगृह्णंतिजडास्तब्धाश्चयेनराः
॥ आलस्याश्चैवरोगाश्चयेषांचविस्मृतंमनः ॥ अहिरिवगुणाद्भीतः संमानान्न
रकादिव ॥ राक्षसीभ्यइवस्त्रीभ्यः सविद्यामधिगच्छति ॥ नभोजनविलंबीस्या
न्नचनारीनिबंधनः ॥ सुदूरमपिविद्यार्थीव्रजेद्गरुडहंसवत् ॥ यथानरवारवनि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 त्रेणनरोवार्यधिगच्छति ॥ तथागुरुगतांविद्यांशुश्रूषुरधिगच्छति ॥ सुखार्थीचे-
 त्यजेत् विद्यांविद्यार्थीचेत्त्यजेत्सुखं ॥ सुखिनस्तुकुतोविद्यासुखंविद्यार्थिनः कु
तः ॥ गुणिताशतशोविद्यासहस्रावर्तितापुनः ॥ आगमिष्यति जिह्वाग्रेस्थल नि
म्नमिवोदकं ॥ शतेनगुणिताविद्यासहस्रेणचातिष्ठति ॥ शतानांचसहस्रेणप्रत्यं
चद्वतिष्ठति ॥ जलमभ्यासयोगेनशिलायांकुरुतेक्षयं ॥ कर्कोर्णामृदुतस्तस्य
किमभ्यासान्नसाध्यते ॥ गुरुशुश्रूषयाविद्यापुष्कलेनधनेनवा ॥ अथवा विद्य
याविद्याचतुर्थनोपलभ्यते ॥ शुश्रूषारहिताविद्याह्यल्पमेधागुणैःसह ॥ वंध्या
चयौवनीतस्यानविद्याफलिनीभवेत् ॥ हयानामिवजात्यानामर्धमात्रार्धशा
यिनाम् ॥ नहिविद्यार्थिनांनिद्राचिरंनेत्रेषुतिष्ठति ॥ यथा ॥ पिपीलिकाभिःपां-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुभिर्वल्मीकंक्रियते महान् ॥ नतत्रबलसामर्थ्यंउद्यमस्तत्रकारणं ॥ अंजन
स्यक्षयंदृष्ट्वा वल्मीकस्यतुसंचयं ॥ अवध्यं दिवसंकुर्याद्दानाध्ययनकर्मसु ॥
अन्नव्यंजनयोर्भागस्तृतीयमुदकस्यच ॥ वायोःसंचारणार्थायचतुर्थमुपक-
ल्पयेत् ॥ हकारंपंचमैर्युक्तंअंतस्थैश्चापिसंयुतं ॥ औरसंतंविजानीयात्कंठ्यमा
हुरसंयुतं ॥ हकारोयत्रपूर्वस्थोअंतस्थाद्योभवेत्परः ॥ पदकालेवियुज्येतसं-
हितायांसऔरसः ॥ मेघदुंदुभिनिर्घोषोज्ज्ञायते पयसोह्रदात् ॥ एवंनादंप्रयो
क्तव्यंसिंहस्यरुदितंयथा ॥ मासेभाद्रपदेमेघाःशब्दंकुर्वंतियादृशं ॥ एवंगह्वरमा
साद्यस्नुकंदुंदुस्हेतिदर्शनं ॥ शेषानांवानरायुन्हंउत्पतंतिपतंतिच ॥ एवंवर्णाःप्रयो
क्तव्याइहेहैषान्निदर्शनं ॥ यथापुत्रवतीस्नेहाच्चुंबितेनिजमौरसं ॥ एवंवर्णाःप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

योक्तव्या युंज्जानेति निदर्शनम् ॥ दुर्दरोदयदेशे च प्रफ तेषुर्नयाप्यया ॥ एवंव
र्णाः प्रयोक्तव्याः अपांफेनेतिनिदर्शनम् ॥ यथाभारभराक्रांतानिश्वसंतिनराभु
वि ॥ एवंवर्णाः प्रयोक्तव्याः अभ्य : संभृतइत्यपि ॥ कुक्कुटः कामलुब्धश्च ककार
द्वयमुच्चरेत् ॥ एवंवर्णाः प्रयोक्तव्याः कुक्कुटोसीति दर्शनम् ॥ वडवाच हयंदृष्वा
योनिंविकुरुते यथा ॥ एवंवर्णाः प्रयोक्तव्याः सद्दुदुभेति दर्शनम् ॥ रंगेचैवससमु
त्पन्नेनाग्रसेत्पूर्वमक्षरम् ॥ स्वरंदीर्घंप्रयुंजीत पश्चान्नासिक्यमाचरेत् ॥ यथा
सौराष्ट्रिका नारी अराँ इत्यभिभाषते ॥ एवंरंगः प्रवक्तव्योङ्कारः परिवर्जितः
॥ द्विमात्रिकोमात्रिकोवानासामूलंसमाश्रितः ॥ अंतेप्रयुंजतेरंगः पंचमैः सानु
नासिकः ॥ यथासौराष्ट्रिकानारी अराँ इत्यभिभाषते ॥ एवंरंगंविजानीयाङ्

कारपरिवर्जितं ॥ अनंतरंमकारस्ययोरंगस्तत्ररंज्यते ॥ सवर्णानुनासिकंविंद्या
देषामध्योपधानिका ॥ यरलवश्चापसहरज्यंतेचोपधानिका ॥ वर्गांतेरंगतेय
स्तुसर्वैःसवर्णानुनासिका ॥ नासादुत्पद्यतेरंगःकांस्येनसमनिःस्वनः ॥ मृदु
श्चैवद्विमात्रःस्याद्दृष्टिमान्स्यान्नदर्शनम् ॥ यथाव्याघ्रीहरेत्पुत्रान्दंष्ट्राभि
र्नचपीडयेत् ॥ भीतापतनभेदाभ्यांतद्वद्वर्णान्प्रयोजयेत् ॥ मधुरंचनचाव्य
क्तंव्यक्तंचानपिपीडितम् ॥ सनाथस्यैकदेशस्यनवर्णाःशांकरंगताः ॥ यथा
सुमत्तनागेंद्रःपदात्पदंनिधापयेत् ॥ एवंपदंपदाद्यंतंदर्शनीयंपृथक्पृथक् ॥
गीतीशीघ्रीशिरःकंपीयथालिखितपाठक ॥ अनर्थज्ञोल्पकंठश्चषडेतेपा
ठकाधमाः ॥ माधुर्यमक्षरंव्यक्तिःपदच्छेदस्तुसुस्वरः ॥ धैर्यंलयसमत्वंचप

 डेतेपाठकागुणाः ॥ चतुरक्षरषट्कंचानिवर्तंतेपुनःपुनः ॥ आवर्ततेपदंयच्चाद्वि-
 स्त्रिराम्रेडितंहितत् ॥ यथा धाम्नेधाम्नेति यजुषेयजुषेतिनिदर्शनम् ॥ हीय
तेवर्द्धतेचापिपदंयत्रक्कशोदरम् ॥उपचारःसविज्ञेयः उभेसुश्चंद्रेतिनिदर्श
नम् ॥ अथसप्तविधाः । संयोगपिंडाः ॥ अयःपिंडोदारुपिंडऊर्णापिंडोज्वा
लापिंडोमृत्पिंडोवायुवज्रापिंडश्चेति ॥ यमान्विद्यादयःपिंडान्सांतस्थंदारुपिंड
वत् ॥ अंतस्थंयमवर्जंतुऊर्णापिंडंविनिर्दिशेत् ॥ अंतस्थयमसंयोगेविशेषो
नोपलभ्यते ॥ अशरीरंयमंविद्यादंतस्थःपिंडनायकं ॥ ज्वालापिंडान्सनासि
क्यान्सानुस्वारांस्तुमृन्मयान् ॥ सोपध्मावायुपिंडाश्चजिह्वामूलेतुवज्रिणः
॥ अयःपिंडोनामयथा । अग्नीः । पक्षी । नातनाच्मि । दारुपिंडोनामयथा ।

CC-0. In Public Domain. Digitization by eGangotri

अश्वः । सूर्यः । विश्वाजतीतिभवति । तत्रउर्णापिंडोनामयथायास्मिन् । अ
त्यस्मिन् । अमुष्मिन् । इतिभवति ॥ तत्रज्वालापिंडोनामयथा । ब्रह्मा । वन्हि
। गृह्णामीतिभवति । तत्रमूर्त्तिपिंडोनामयथा । साꣳस्यासꣳस्कर्त्तारं । सꣳ
स्वर्तइति । तत्रवायुपिंडोनामयथा । देवसवितः । युञ्जानः प्रथमम् ॥ प्रादि
वः ककुत्सुमतमितिभवति ॥ तत्रवज्रापिंडोनामयथा । इष्कृतिः निष्कृतिः । ऋ
क्सामइतिभवति ॥ प्रथममेवषकारेण सकारेणैवसंयुतं ॥ एतत्स्वरंसमा-
साद्यअग्निष्वात्तान्निदर्शनं ॥ प्रथमेनठकारेणथकारेणैवसंयुतं ॥ एतत्स्व
रंसमासाद्यअधिष्ठाननिदर्शनं ॥ प्रथममेवणकारेणनकारेणैवसंयुतं ॥ एत
त्स्वरंसमासाद्यत्रिणवत्रपास्थिरꣳशावितिनिदर्शनम् ॥ प्रथममेवरंगेणनका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रेणैवसंयुतम् ॥ एतद्द्विंशतमासाब्रह्मष्टिमानितिनिदर्शनम् ॥ एतेककारा
दयोमकारपर्यवसानाः कृष्णाव्याख्याताः । शनैश्चरदैवत्याः । चत्वार्यंत-
स्थायरलवाः कपिलवर्णाः अग्निदैवत्याः । चत्वार्यूष्माणः शषसहा अरु
णवर्णाः आदित्यदैवत्याः ॥ त्रयस्त्रिंशद्व्यंजनानि स्पर्शा अंतस्थाऊष्माण
श्चेति । चतुर्विधंकरणं ॥ स्पृष्टमस्पृष्टसंवृतंविवृतंचेति ॥ संवृतोघोषा वि
वृताअघोषाः । विंशतिर्घोषास्तेगजडदबाघझढधभाङञणनमाःय
रलवाश्चेति । त्रयोदश अघोषास्ते कचटतपाः खछठथफाः शषसाश्चे
ति ॥ अष्टौवर्णस्थानानि भवंति । उरःकंठ्यमूर्धन्यतालुदंत्योजिह्वामूलय-
मानुनासिक्याश्चेति । हौऔरस्यौह ॥ हाइतिअआआत्रयःकंठ्याः । ऋ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षट् मूर्द्धन्याः। टठडढणष ३ इति॥ दशतालव्याः। चछजझञयशइईई३
इति॥ अष्टदंत्याः। तथदधन ऌॡसाः। एकादश औष्ठ्याः। पफबभमाउऊ
ऊ३ उपध्माचेत्यादयः। एकोदंतमूलयोरेफः। जिह्वामूलीयाःपंच। कुंखुंगुंघुंङुं इति।
क्म ख्म ग्म घ्म कुं खुं गुं घुं इति यमाश्चत्वारः॥ रुक्मेति प्रथमो ज्ञेयः सक्
इत्यपरो भवेत्। तृतीयः सघ्न इत्याहुः उपध्मेति चतुर्थकः॥ प्रथमौ चौष्ठनासि
क्यौ द्वितीयः कंठ्य दंत्यश्च। नासामूलमुपाश्रितः॥ तृतीयः कंठ्य जिह्वाग्रेना-
सायामेव निर्दिशेत्॥ चतुर्थं हृदि नासिक्यः कंठे चाभिहिता यमाः॥ आपंच
मैश्चैकपादः संयुक्तं पंचमाक्षरम्॥ यमास्तत्र निवर्तंते श्मशानादिव बांधवाः
। यत्किंचिद्वाङ्मयं लोके सर्वमत्र प्रतिष्ठितम्॥ सर्वमत्र प्रतिष्ठितमिति। ॠ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्णोत्तिस्परेसादावनुस्वारोह्विमात्रकः। संयोगेपरभूतेषुन्हस्वएवोच्यतेबुधैः॥ ॥इतिश्रीयाज्ञवल्क्यशिक्षासमाप्ता॥ ॥ ५ ॥

इदं पुस्तकं भगीरथात्मज हरिप्रसादेन मोहमय्यां जगदीश्वर शिलायंत्रे मुद्रितं॥ संवत् १९४० शकाब्दः १८०६ भाद्रपदमासः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति याज्ञवल्क्यशिक्षा समाप्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१२८७ ४००५

अथानुवाकसूत्रप्रारंभः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनु श्रीगणेशायनमः ॥ ॥ॐ अथानुवाकान्वक्ष्यामिब्रह्मणानिर्मितान्पुरा सू. अ.
१ ॥शिष्याणामुपदेशाययज्ञसंस्कारएवच ॥ विप्राणांयज्ञकालेषुजपहोमार्चना १
दिषु ॥१॥ इषेत्वेकावसोःपवित्रंतिस्रोग्नेव्रतपतेसप्तपवित्रेस्थोद्वेशर्मासिति
स्रोधूरसिशर्मासिद्विकौदेवस्यत्वातिस्रोदेवस्यत्वापंचप्रत्युष्टꣳरक्षास्तिस्रो
दशैकविꣳशत् ॥१०॥३१॥२॥ कृष्णोसिषडग्नेवाजजित्तिस्रोमयी
दमग्नीषोमयोःपंचकावग्नेदब्धायोचतस्रःसंवर्चसापंचाग्नयेकव्यवा
हनायषट्सप्तचतुस्त्रिꣳशत् ॥७॥३४॥२॥ समिधाग्निंभूर्भुवःस्वश्च
तुष्कावग्निर्ज्योतिर्द्वेउपप्रयंतःषड्विꣳशतिर्भूर्भुवःस्वश्चतस्रोगृहामाति १
स्रःप्रघासिनःपंचपूर्णादर्विद्वेअक्षन्नमीमदंतषडेषतेसप्तदशात्रिषष्टिः ॥१०॥

गिहिनान्. १ रणाय.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६३॥३॥ एदंद्वे महीनांपयश्चतस्र आकूत्याऋक्सामयोर्द्विकौव्रतं कृणुतषडे
षत्तेचतस्रोवस्व्यसितिस्र एषतेद्वे शुक्रंत्वाचतस्रोदित्यास्त्वगष्टौदशसप्त-
त्रिंशत् ॥१०॥३७॥४॥ अग्नेस्तनूरापतयेचतुष्कौतप्तायनीद्वेइंद्रघोष
स्तिस्रोयुंजतेष्टौदेवस्यत्वाचतस्रोदेवस्यत्वापंचविभूरसिचतस्रोज्योतिर
सिषड्उरुविष्णोतिस्रोदशत्रिचत्वारिंशत् ॥१०॥४३॥५॥ देवस्यत्वाषड्उपा
वीरसिपंचमाहिःषट्संते (तिसंते) तिस्रःसमुद्रंगच्छद्वविष्मतीर्द्विकौद्वदेवा
पंचदेवस्यत्वाष्टावष्टौसप्तत्रिंशत् ॥९॥३७॥६॥ वाचस्पतयउपयामगृही
तोसित्रिकावावायोयंवाद्विकौयावामेकातंप्रत्नथाचतस्रोयंवेनोयेदेवास
स्त्रिकाविंद्रायमूर्द्धानंद्विकौयस्तएकाप्राणायतिस्रोमघवइंद्राग्नी आगत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनु माद्यौमासश्चर्षणीधृतोविश्वेदेवासऽआगतेंद्रमरुत्वोमरुत्वंतंवृषभंमरु- सू.अ.
२ तांत्वौजसेसजोषाइंद्रमरुत्वां ॥३॥ इन्द्र"महां ॥३॥ इन्द्रोमहां ॥३॥ इंद्रएकै १
कोदुत्यमष्टौपंचविꣳशतिरष्टाचत्वारिꣳशत् ॥२५॥४८॥७॥ उपयामगृ-
हीतोसि ॥ आदित्येभ्यः पंचवाममद्यद्वेसुशर्मास्येकाबृहस्पतिसुतस्यद्वेह
रिरसिचतस्रः समिन्द्रणोष्टौमाहिरेजतुदशमास्यः पंचकावातिष्टुष्ठ्वा-
हींद्रमिदेकैकायस्मान्नद्वेग्नेपवस्वोत्तिष्ठन्नऽदृश्रमुदुत्यमेकैकाजिघ्रद्वेवि
नइंद्रवाचस्पतिंविश्वकर्मन्नेकैकाग्नयेत्वाचतस्रइहरतिस्तिस्रः परमेष्टीद-
शत्रयोविꣳशतिस्त्रिषष्टिः ॥२३॥६३॥८॥ देवसवितश्चतस्रइंद्रस्यवज्रः पंच २
देवस्याहंदशापयतिस्रोवाजस्येममष्टावग्निरेकाक्षरेणैषतेचतुष्कोसविता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वेअष्टौचत्वारिंशत् ॥८॥४०॥९॥ अपोदेवाग्नितस्त्रः सोमस्यात्विषिः पंचावे
ष्टाः सप्तसोमस्यत्वाचतस्त्रइंद्रवज्रः पंचस्योनासिचतस्त्रः सवित्रेकाश्विभ्यांच
तस्त्रोष्टौचतुस्त्रिंशत् ॥८॥३४॥१०॥ युंजानएकादशप्रतूर्त्तंषोडशदेवस्य-
त्वादशापोदेवीर्द्वादशापोह्येकादशादितिष्ठापंचाकूतिमष्टादशसप्तऽशी
तिः ॥७॥८३॥११॥ दृशानःसप्तदशादिवस्परिद्वादशसमिधाग्निंपंचदशापे
तःसप्तदशासुन्वंतंत्रयोदशयाओषधीःसप्तविंशतिर्माभाषोडशसप्तसप्त
दशशतं ॥७॥११७॥१२॥ मयिगृह्णामिपंचदशध्रुवासिमधुवाताएकादशकौ
सम्यक्स्रवंतिनवेमंमाषडपांत्वैकाऽयंपुरःपंचसप्ताष्टापंचाशत् ॥७॥५८॥१३॥
ध्रुवक्षितिःषट्सजूर्ऋतुभिर्मूर्द्धावयोर्द्विकाविंद्राग्नीआयुर्मेषट्कावाशुस्त्रिवृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अनु देकाग्नेर्भार्गोस्येकयाचतुष्कावष्टावेकत्रिंशत् ॥८॥३१॥१४॥ अग्नेजातान् सू.अ.
३ पंचरश्मिनासत्यायचतस्रोराड्यस्ययंपुरः पंचकावग्निर्मूर्द्धैकोन त्रिंशत्येन १
ऋषयोष्टौतपश्चनवसप्तपंचषष्टिः॥७॥६५॥१५॥ नमस्तेषोडशहिरण्यबाह
वउष्णीषिणेतक्षभ्योज्येष्ठायपंचकाः स्तुत्यायचतस्रः शंभवायैकापार्योयपं
चद्रापेअंधसोत्रिंशतिर्नवषट्षष्टिः॥९।६६॥१६॥ अश्मन्नूर्जं दशनमस्ते
पंचाग्निस्तिग्मेननवचक्षुषः पिताष्टावाशुः शिशानः सप्तदशोदेनंक्रमध्यमग्नि
नापंचदशकौशुक्रज्योतिः सप्तेमठं· स्तनंत्रयोदशनवैकोनशतं॥९॥९९॥१७
॥ वाजः सप्तमूर्के चतुष्का अश्माग्निस्त्रिकावर्ठं· शुः पंचैकाचतस्रोवाजायदे २
वाजस्यत्वष्टावृताषाट्त्रयोदशाग्निंशुनज्मीसप्तयदाकृताहावर्न्हत्यायद

CC-0. In Public Domain. Digitization by eGangotri

शाकौत्रयोदशसप्तसप्ततिः॥१३॥७७॥१८॥स्वाहींत्वैकादश देवाखड्गंविर्ठं शा-
तिः सुरावंतर्ठं सप्तदशोदीरतांत्रयोदशाच्याजानुर्दशसोमोराजाष्टौसीसे
नतंत्रर्ठं षोडशसप्तपंचनवतिः॥७॥९५॥१९॥ क्षत्रस्ययोनिस्त्रयोदशखद्दे-
वादशाभ्यादधाम्यष्टौयोभूतानांचतस्रः समिद्धइंद्रएकादशायात्वष्टौस
मिद्धोअग्निर्द्वादशाश्विनाहविस्त्रयोदशाश्विनातेजसैकादशनवनवतिः
॥९॥९०॥२०॥ इममग्नेसमिद्धोअग्निरेकादशकौवसंतेनऋतुनाषड्ढोताख
त्समीधामिद्दा
क्ष्वद्वादशाश्विनोछागस्यसप्तदेवंबर्हिश्चतुर्दशषडेकषष्टिः॥६॥६१॥२१॥
तेजोसिपंचाग्नयएकाहिंकारायद्वेतत्सवितुर्दशविभूर्मात्रैकाकायद्वेआब्रह्म
न्त्रयोदशशेषादेकैकोन्नविर्ठं शतिश्चतुस्त्रिर्ठं शत्॥१९॥३४॥२२॥ हिरण्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अनु गर्भोयः प्रणातो द्विकौ युंजंत्यष्टौ वायुस्त्वा पंच प्राणाय तिस्र उत्सक्थ्या द्वादश गाय सू॰अ॰
४ त्रीकस्त्वा षड्लोकः स्विदष्टौ कास्विद्दश सुभूः स्वयंभूस्तिस्र एकादश पंचषष्टिः ॥ ११ १
॥ ६५ ॥ २३ ॥ अश्वस्तूपरो धूम्रान्वसंताय समुद्राय शिशुमारान्मयुः प्राजापत्यो
दशकाश्चत्वारश्चत्वारिंशत् ॥ ४ ॥ ४० ॥ २४ ॥ शादं दद्भिर्नवैकैका हिरण्यगर्भ
श्चतस्र आनो दश मानो [मित्रो] ऽदश्चस्याष्टकौ यत्ते षड् इमानुकं द्वे पंचदश सप्तचत्वारि
र्ठ॰ शत् ॥ १५ ॥ ४७ ॥ २५ ॥ अग्निश्च पंचदशो त्वात एकादश द्वौ षड्विंशतिः ॥
२ ॥ २६ ॥ २६ ॥ समास्त्वा दशोर्ध्वा अस्य पीवो अन्ना द्वादश का वाभि त्वैकादश च-
त्वारः पंचचत्वारिंशत् ॥ ४ ॥ ४५ ॥ २७ ॥ होता यक्षदेकादश देवं बर्हिर्द्वादश ४
पुनरप्येवं चत्वारः षट्चत्वारिंशत् ॥ ४ ॥ ४६ ॥ २८ ॥ समिद्धो अंजन्नेकादश

CC-0. In Public Domain. Digitization by eGangotri

यदक्रंदस्त्रयोदशसमिद्धोअद्यद्वादशकेतुंकृण्वंश्चतुर्विंर्ठ॰शतिश्चत्वारःषष्टिः॥
॥४॥६०॥२९॥ देवसवितःषट्वतपसेकौलालर्ठ॰षोडशद्वौद्वाविंर्ठ॰शतिः॥२॥२२
॥३०॥ सहस्रशीर्षाषोडशान्ध्यःसंभृतःषट्द्वौद्वाविंर्ठ॰शतिः॥२॥२२॥३१॥ त
देवसत्तवेनस्तन्नवद्वौषोडश॥२॥१६॥३२॥ अस्याजरासःसप्तदशापश्चित्
द्वादशविभ्राट्चतुर्द्दशप्रवावृजएकादशप्रवायुप्रवीरयापंचदशकावानस्त्र
योदशसप्तसप्तनवतिः॥७॥९७॥३३॥ यज्जाग्रतःपंचनद्यःसोमोधेनुमाकृ
ष्णेनपूषंतवदशकानतदष्टौषडष्टापंचाशत्॥६॥५८॥३४॥ अपेतोदशापा
द्यंद्वादशद्वौद्वाविंर्ठ॰शतिः॥२॥२२॥३५॥ ऋचंवाचर्ठ॰षोडशद्यौःशांतिरष्टौ
द्वौचतुर्विंर्ठ॰शतिः॥२॥२४॥३६॥ देवस्यत्वादशयमायत्वैकादशद्वावेकविंर्ठ॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शतिः ॥२॥२१॥३७॥देवस्यत्वाषौयमायत्वाक्षत्रस्यत्वादशकौत्रयोविंशं-
शतिः ॥३॥२८॥३८॥स्वाहाप्राणेभ्यःषडुग्रश्चसप्तद्वौत्रयोदश ॥२॥१३॥३९
॥ईशावास्यमष्टावंधंतमोनवद्वौसप्तदश ॥२॥१७॥४०॥ ॥दशाध्यायेस-
माख्याता अनुवाकास्तुसंख्यया ॥ शतंदशानुवाकश्चनवान्येचमनीषिभिः॥१
॥सप्तषष्टिरग्नौज्ञेयासौत्रेद्वाविंशतिस्तथा ॥ अश्वएकोनपंचाशत् पंचत्रिंश-
त् षिलेस्मृताः ॥२॥ शुक्रियेषुतुविज्ञेयाएकादशमनीषिभिः ॥एकीकृत्यस
माख्यातंत्रिंशतंअधिकंमतं ॥३॥ इत्यनुवाकाध्यायः ॥ ॥अथानुक्रम-
णिकालिख्यंते ॥ ॥ॐ मंडलंदक्षिणमक्षिहृदयंचाधिष्ठितंयेनशुक्लानि
यजूंषिभगवान्याज्ञवल्क्योयतःप्रापतंविवस्वंतंत्रयीमयमर्चिष्मंतमाभि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यायमाध्यंदिनीये वाजसनेयके यजुर्वेदाम्नाये सर्वे स खिले सशुक्रिय ऋ
षिदैवत छंदांसि स्यनुक्रमिष्यामो यजुषामनियताक्षरत्वादेषां छंदोन वि
द्यते द्रष्टार ऋषयः स्मर्तारः परमेष्ठ्यादयो देवता मंत्रांतर्भूता ग्न्यादिका हवि-
र्भाजस्तुति भाजोवानः शाषोषा ॥ शम्योपवेषकपालेध्मोलूषलाद यश्च प्रति
मा भूतांश्छंदांसि गायत्र्यादीन्येतान्य विदित्वा यो धीतेनुब्रूते जपति जुहोति
यजते याजयते तस्य ब्रह्म निर्वीर्यं यातयामं भवत्यथांतरा श्वगर्त्तं वा पद्यते स्था
णुं वर्छति प्रमीयते वा पापीयान्भवत्यथ विज्ञायैतानि यो धीते तस्य वीर्यवदथ
योर्थवित्तस्य वीर्यवत्तरं भवति जपित्वा हुत्वेष्ट्वा तत्फलेन युज्यते ॥ १ ॥ ईषेत्वा-
दि खं ब्रह्मांतं विवस्वान पश्यत्ततः प्रतिकर्मविभागेन ब्राह्मणानुसारेण ऋषयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनु वेदितव्याःपरमेष्ठीप्राजापत्योदर्शपूर्णमासमंत्राणामृषिर्देवावाप्राजापत्याइषे सू.अ.
६ त्वाशाखानुष्टुब्विनियोगः कल्पकारोक्तएव ऊर्ज्जेत्वा वायवोवायव्यंदेवोवऐंद्रंय १
जमानस्यशाखावसोर्वायव्यंद्यौर्मातरिश्वनउखावसोर्वायव्यंदेवस्त्वापयः
कामधुक्षः प्रश्नः साविश्वायुस्त्रीणिगव्यानींद्रस्यैंद्रं विष्णोपयः ॥ २॥ अग्नइद्
माग्नेयेकस्त्वाप्राजापत्यंकर्मणेस्रुक्शूर्पंप्रत्युष्टंह्वेराक्षसेउरुब्रह्मरक्षोघ्नठं·
सर्वत्रधूरसिधूर्द्देवानां विष्णुस्त्वानउरुहविष्याऽअपहतठं· रक्षोयच्छंतांठं·ह
विष्यादेवस्यत्वासावित्रठं· सर्वत्राग्नयेलिंगोक्तेभूतायत्वाहविःस्वसूर्योदृठं·
हंतांगृहाःपृथिव्यास्त्वाहव्यंपवित्रेलिंगोक्तठं· सवितुर्द्देवीः प्रोक्षिताआपांत्यग्न ६
येलिंगोक्तेदैव्यायपात्राणि ॥ ३॥ शर्मास्यदित्याः कृष्णाजिनमवधूतठं·राक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समभ्द्रिर्ग्रावोलूखले अग्नेर्हविर्बृहत्तऽ इदं मौसले ॥ हविष्कृदधिदैवतं वागधि
यज्ञं पत्नी कुक्कुटोवाग्वर्षवृद्धं शूर्पं प्रतित्वाहविः परापूतमपहतं राक्षसेवा
युर्वोदेवोवस्तंडुलाधृष्टिरुपवेषोपाग्नआदेवयजमाग्नेये ध्रुवमसिषणां क
पालान्यग्नेब्रह्माग्नेयं धिषणासिदार्षदं दिवः शम्याधिषणोपलं धान्यमसि-
षणां हविर्महीनामाज्यं ॥ ४ ॥ संवपामिहविः समापआपं जनयत्यैत्वे
दं हविरिषेत्वाज्यं घर्मोसिषण्णां पुरोडाशाश्चितायत्रयाणां त्रितोद्धितएक-
तः क्रमेणाददइंद्रस्यस्फ्यः पृथिवीवेदिव्रजं पुरीषं वर्षंतु वेदिर्बधानसावित्र
मपाररुमररो आसुरेंद्रप्सस्तेवेदिर्गायत्रेणत्रीणिवैष्णवानि सूक्ष्मात्रयाणां
वेदिः पुराघशां सोपश्यच्चांद्रमसीत्रिष्टुभं प्रोक्षणीः प्रैषोद्विषतऽ आभिचा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अनु॰ रिकमनिशितः स्रुवो निशितास्रुगदित्यै विष्णोर्वोक्रमूर्जेत्रयाणामा सू॰अ॰
७ ज्यर्ठं सवितुरापंतेजोसि धामाज्यं ॥ ५॥ कृष्णोसींध्मो वेदिर्बर्हिर्लिंगो १
क्तेअदित्याऽआपं विष्णोः प्रास्तरमूर्णंम्रदसं वेदिर्भुवपतये त्रीण्या
ग्नेयानि गंधर्वस्त्रयाणां परिधयो वीतिहोत्रं घिस्थावस्करा ग्नेयीं गा
यत्रीर्ठं समिदाग्नेयर्ठं सूर्यस्त्वा लिंगोक्तर्ठं सवितुर्विधृती ऊर्णंम्र
दसमात्वा प्रास्तरे घृताच्यसित्रयाणां जुहूपभृध्रुवाः क्रमेण प्रिये
ण हविर्ध्रुवाऽअसदनूपाहि मां वैष्णवे अग्ने वाजजिदाग्नेयं न-
मोदेवर्ठं स्वधापित्र्यर्ठं स्कयमेस्कचा वंध्रिणा वैष्णवं वस्कमतीमा ७
ग्नेयं मित ऐंद्रर्ठं संज्योतिषाज्यं मर्यादमाशीः प्रतिग्रहणमुपहुता

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्यावापृथिव्यं ॥ ६ ॥ ब्रह्मत्वं प्रतिष्ठां तं बृहस्पतिरांगिरसोपश्यद
ग्ने ह्व्या प्राशित्र मेतं ते वैश्वदेव मेषाते नुष्टुबाग्नेप्यग्ने वाज जिदा
ग्नेय मग्नीषोमयोश्चत्वारि लिंगोक्तानि वस्कभ्य स्त्रयाणां परिध-
यः संज्ञानार्थां व्यंतु प्रास्तरे मरुतां कपिर्बृहतीं प्रास्तरीमर्त्यः पाद
आग्नेयो यं परिधिं देवल आग्नेयीं त्रिष्टुभं विराड्रूपां यजुरंताम
ग्नेः प्रियं यजुः सꣳ स्त्रव भागाः सोमस्तुष्मो वैश्वदेवीं त्रिष्टुभं यजुरंताꣳ
स्वाहा वाडयजुर्घृताची स्रुचौ यज्ञ नमः शूर्पं यव मान्कपिरुद्दाल वाधानांतर्वा
निति पंचार्षेय्यो यज्ञो देवताग्ने दक्षायो गार्हपत्यो ग्नये दक्षिणाग्निः सरस्व
त्यै लिंगोक्तं वेदोसि वेदो देवा मनसस्पतिर्वात देवत्यां विराजꣳ संबर्हि लिंगो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनु क्ताग्निष्टुब्विराड्रूपाकस्त्वाप्राजापत्यर्ठं रक्षसार्ठं राक्षसं ॥७॥ अथयाजमान सू.अ.
८ ठं संवर्च्चसात्वाष्ट्रीत्रिष्टुप्द्विविविष्णुस्त्रीणिवैष्णवान्यस्माद्भागोस्यैभूमिरग १
न्मदेवर्ठं संज्योतिषाहवनीयः स्वयंभूः सूर्यस्यसौरे ॥ अग्नेगृहपतेगार्हपत्यः
सूर्यस्यसौरमग्नइदमाग्नेये ॥८॥ पितृयज्ञः प्रजापतेरार्षमग्नयेसोमायहेदे
वेस्वाहाकारश्रुतेरपहताआसुरंयेरूपाणिकव्यवाहनोग्निस्त्रिष्टुबत्रामीमदं
तपित्र्येनमोवःषडूलिंगोक्तानिपरे पित्र्येआधत्तपित्र्यागायत्र्यूर्ज्जमापीवि
राट् ॥९॥ अग्न्याधेयंप्रजापतेरार्षंदेवानामग्नेर्गंधर्वाणांवासमिधाग्नेद्ध्व-
श्चतस्त्रोगायत्र्यःसमिधाविरूपऽआंगिरसः सुसमिद्धायवसुश्रुतस्तंत्वा ८
भरद्वाजोभूर्भुवस्वस्तिस्त्रोमहाव्याहृतयोग्निवायुसूर्यदेवत्याःक्रमेणद्यौरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वयजमानाशीर्लिंगोक्तदेवतायंगौः सार्प्पराज्ञस्तृचोगायत्र्योग्निः परावररूपेण देवता ॥१०॥ अग्निहोत्रंप्रजापतेरार्षमग्निर्ज्योतिः सप्तलिंगोक्तदेवतागायत्र्यआद्याः पंचैकपदाअग्निर्वर्च्चोद्वैतक्षापश्यत् परांजीवलश्चैलकिः ॥११॥ यजमानाग्न्युपस्थानंबृहद्देवानामार्षमुपप्रयंतइत्यनुवाकआद्येद्वेआग्नेय्यौगायत्र्यानुपवत्यागोतमोराहूगणोमूर्द्धन्वत्याविरूपउभावांभरद्वाजऽऐंद्राग्नीं॥ त्रिष्टुभमयंतेदेवश्रवादेववातश्चभारतावाग्नेयीमनुष्टुभमयमिहवामदेवोजगतीमस्यप्रत्नामवत्सारोगव्यांवाग्नेयींवापयोदेवत्यांवागायत्रीं॥ तनूपाआग्नेयानींधानाआग्नेयीमहापंक्तिस्त्र्यवसाना ॥१२॥ चित्रावसोराष्ट्रिदेवत्यमृषयोपश्यन्त्संत्वमाग्नेयमंधस्थरेवतीसठं·हितेतित्रीणिगव्यान्युपत्वाग्नेयंतृचं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अनु. गायत्रंमधुछंदावैश्वामित्रोग्नेत्वंचतस्त्रोद्विपदाआग्नेयीबंधुःसुबंधुःश्रुतबंधु सू.अ.
१ र्विप्रबंधुरेकैकशइडेकाम्यागव्येसोमानंब्राह्मणस्पत्यंतृचंगायत्रंब्रह्मणस्पति १
र्मेधातिथिर्वामहित्रीणार्ठं·सत्यधृतिर्वारुणिरादित्यदैवतंतृचंगायत्रंपथिस्व-
स्त्ययनंकदाचनैंद्रींपथ्याबृहतींमधुछंदास्तत्सवितुर्विश्वामित्रःसावित्रींगायत्रीं
परितेवामदेवउआग्नेयीमनिरुक्तांगायत्रीं ॥१३॥ क्षुल्लकोपस्थानमासुरेरार्षं
भूर्भुवःस्वः प्रवत्स्यदुपस्थानमागतोपस्थानंचादित्यस्यार्षंनर्वंगार्हपत्यः·शर्ठं·
स्याहवनीयोथर्वदक्षिणाग्निरागन्माहवनीयोनुष्टुबयमग्निर्न्यंकुसारिणी ॥
बृहतीगार्हपत्योयमग्निरन्वाहार्यपचनोनुष्टुब्गृहामात्रिष्टुप्विराड्रूपासेषा १
मनुष्टुबुपहूतामहापंक्तिरूयवसानातिस्त्रोपिवास्तवीः शंयुर्बार्हस्पत्यः ॥१४॥

CC-0. In Public Domain. Digitization by eGangotri

चातुर्मास्यानि प्रजापतेरार्षं प्रघासिनो मारुती गायत्री खद्गामे मारुत्यनुष्टुबनि
रुक्तामोषूणोगस्त्यऐंद्रामारुतीं विराजमकन्ननिरुक्तागनेप्यनुष्टुबवभृथय
ज्ञदैवतं पूर्णादर्विद्वे और्णवाभऐंद्यावनुष्टुभावक्षंद्वेगौतमऐंद्यौपंक्तीमनोन्नु
मानसंतृचंबंधुर्गायत्रंवयर्ठं सौमींगायत्रींबंधुरेषतेद्वे रौद्रे अवरुद्रर्ठं रौद्या
